RGVEDA DARSANA

A SET OF THIRTEEN VOLUMES

VOLUME EIGHT

Rgartha Sara

(Part One)

Vidyalankara

Prof S. K. Ramachandra Rao

Prof S. K. Ramachandra Rao Memorial Trust®

Bangalore 560 011

RgVeda Darsana, (A set of Thirteen volumes) Volume Eight, Rgartha Sara, Part One, by Prof S. K. Ramachandra Rao, published by Dr. S. R. Sudarshan for Surama Prakashana, the publication wing of the Prof. S. K. Ramachandra Rao Memorial Trust®, 305, 6th Cross, 1st Block, Jayanagar, Bangalore 560011.

Phone: 080-26563957 E mail: profskr.trust@gmail.com

www.profskr.com

© Prof S. K. Ramachandra Rao Memorial Trust®

First Edition: 2002

Second Edition: 2015

ISBN 978-93-84069-15-5 (SET)

Introduction

Rgartha Sara (The essential Import of Rg Veda) is a selection of two hundred mantras from the Rg Vedic corpus, made by Dinakara Bhatta, who lived between A .D. 1575 and A. D. 1640. He also appended brief glosses on each of the mantras he selected, and he has followed Sayana-bhasya closely. The present publication has taken this selection as its starting point, but has presented the mantras in a new light, and with English renderings of the mantras.

S. K. Ramachandra Rao

CONTENTS

List of Mantras Selected Here (Part I)

(The numbers in the references indicate the maṇḍala, the sūkta and the mantra; The names of the seers are also given. Within brackets are the deities invoked)

1. 1,1,1 Madhuchchhandā – Vaiśvāmitra (Agni)
2. 1,1,6 Madhuchchandā – Vaiśvāmitra (Agni)
3. 1,1,9 Madhuchchandā – Vaiśvāmitra (Agni)
4. 1,9,5 Madhuchchandā – Vaiśvāmitra (Indra)
5. 1,10,2 Madhuchchandā – Vaiśvāmitra (Indra)
6. 1,11,8 Jetā – Mādhuchchhandasa (Indra)
7. 1,16,9 Medhātithi – Kāṇva (Indra)
8. 1,22,17 Medhātithi – Kāṇva (Vishṇu)
9. 1,22,18 Medhātithi – Kāṇva (Vishṇu)
10. 1,22,19 Medhātithi – Kāṇva (Vishṇu)
11. 1,22,20 Medhātithi – Kāṇva (Vishṇu)

12.	1,22,21	Medhātithi – Kāṇva (Vishṇu)
13.	1,23,24	Medhātithi – Kāṇva (Agni)
14.	1,24,1	Śunahaśepa – Ājīgarti (Kah Prajāpati)
15.	1,24,2	Śunahaśepa – Ājīgarti (Agni)
16.	1,24,11	Śunahaśepa – Ājīgarti (Varuṇa)
17.	1,24,15	Śunahaśepa – Ājīgarti (Varuṇa)
18.	1,27,13	Śunahaśepa – Ājīgarti (Visvedeva)
19.	1,31,10	Hiraṇyastūpa – Āṅgīrasa (Agni)
20.	1,31,14	Hiraṇyastūpa – Āṅgīrasa (Agni)
21.	1,31,15	Hiraṇyastūpa – Āṅgīrasa (Agni)
22.	1,33,5	Hiraṇyastūpa – Āṅgīrasa (Indra)
23.	1,35,2	Hiraṇyastūpa – Āṅgīrasa (Savitṛ)
24.	1,39,5	Kāṇva – Ghaura (Maruta)
25.	1,40,1	Kāṇva – Ghaura (Brahmaṇaspati)
26.	1,41,8	Kāṇva – Ghaura (Varuṇa-Mitrā-Aryamā)
27.	1,41,9	Kāṇva – Ghaura (Varuṇa-Mitrā-Aryamā)
28.	1,48,4	Praskaṇva – Kāṇva (Ushāh)
29.	1,50,11	Praskaṇva – Kāṇva (Sūrya)
30.	1,50,12	Praskaṇva – Kāṇva (Sūrya)
31.	1,50,13	Praskaṇva – Kāṇva (Sūrya)
32.	1,71,10	Pārāśara – Śāktya (Agni)
33.	1,73,3	Pārāśara – Śāktya (Agni)
34.	1,73,8	Pārāśara – Śāktya (Agni)
35.	1,80,7	Gotama – Rāhūgaṇa (Indra)

36.	1,81,5	Gotama – Rāhūgaṇa (Indra)
37.	1,84,5	Gotama – Rāhūgaṇa (Indra)
38.	1,84,18	Gotama – Rāhūgaṇa (Indra)
39.	1,84,19	Gotama – Rāhūgaṇa (Indra)
40.	1,89,6	Gotama – Rāhūgaṇa (Viśvedeva)
41.	1,89,8	Gotama – Rāhūgaṇa (Viśvedeva)
42.	1,89,9	Gotama – Rāhūgaṇa (Viśvedeva)
43.	1,89,10	Gotama – Rāhūgaṇa (Viśvedeva)
44.	1,93,7	Gotama – Rāhūgaṇa (Agnīshomau)
45.	1,93,8	Gotama – Rāhūgaṇa (Agnīshomau)
46.	1,93,9	Gotama – Rāhūgaṇa (Agnīshomau)
47.	1,93,10	Gotama – Rāhūgaṇa (Agnīshomau)
48.	1,93,11	Gotama – Rāhūgaṇa (Agnīshomau)
49.	1,93,12	Gotama – Rāhūgaṇa (Agnīshomau)
50.	1,94,1	Kutsa – Āṅgirasa (Agni)
51.	1,94,2	Kutsa – Āṅgirasa (Agni)
52.	1,94,3	Kutsa – Āṅgirasa (Agni)
53.	1,94,4	Kutsa – Āṅgirasa (Agni)
54.	1,94,5	Kutsa – Āṅgirasa (Agni)
55.	1,94,6	Kutsa – Āṅgirasa (Agni)
56.	1,94,7	Kutsa – Āṅgirasa (Agni)
57.	1,94,8	Kutsa – Āṅgirasa (Agni and Devas)
58.	1,94,9	Kutsa – Āṅgirasa (Agni)
59.	1,94,10	Kutsa – Āṅgirasa (Agni)

60.	1,94,11	Kutsa – Āṅgirasa (Agni)
61.	1,94,12	Kutsa – Āṅgirasa (Agni)
62.	1,94,13	Kutsa – Āṅgirasa (Agni)
63.	1,94,14	Kutsa – Āṅgirasa (Agni)
64.	1,94,15	Kutsa – Āṅgirasa (Agni)
65.	1,94,16	Kutsa – Āṅgirasa (Agni)
66.	1,95,7	Kutsa – Āṅgirasa (Draviṇodā Agni)
67.	1,99,1	Kaśyapa – Mārīcha (Agni-Jātaveda)
68.	1,106,1	Kutsa – Āṅgirasa (Viśvedevāḥ)
69.	1,106,2	Kutsa – Āṅgirasa (Viśvedevāḥ)
70.	1,106,3	Kutsa – Āṅgirasa (Viśvedevāḥ)
71.	1,106,4	Kutsa – Āṅgirasa (Viśvedevāḥ)
72.	1,106,5	Kutsa – Āṅgirasa (Viśvedevāḥ)
73.	1,106,6	Kutsa – Āṅgirasa (Rudra)
74.	1,114,1	Kutsa – Āṅgirasa (Rudra)
75.	1,114,2	Kutsa – Āṅgirasa (Rudra)
76.	1,114,3	Kutsa – Āṅgirasa (Rudra)
77.	1,114,4	Kutsa – Āṅgirasa (Rudra)
78.	1,114,5	Kutsa – Āṅgirasa (Rudra)
79.	1,114,6	Kutsa – Āṅgirasa (Rudra)
80.	1,114,7	Kutsa – Āṅgirasa (Rudra)
81.	1,114,8	Kutsa – Āṅgirasa (Rudra)
82.	1,114,9	Kutsa – Āṅgirasa (Rudra)
83.	1,114,10	Kutsa – Āṅgirasa (Rudra)

84.	1,114,11	Kutsa – Āṅgirasa (Rudra)
85.	1,117,25	Kakshīvān – Dairghatamasa (Aśvinau)
86.	1,125,5	Kakshīvān – Dairghatamasa (Svanaya)
87.	1,125,6	Kakshīvān – Dairghatamasa (Svanaya)
88.	1,125,7	Kakshīvān – Dairghatamasa (Svanaya)
89.	1,126,1	Kakshīvān – Dairghatamasa (Svanaya)
90.	1,126,2	Kakshīvān – Dairghatamasa (Svanaya)
91.	1,126,3	Kakshīvān – Dairghatamasa (Svanaya)
92.	1,126,4	Kakshīvān – Dairghatamasa (Svanaya)
93.	1,126,5	Kakshīvān – Dairghatamasa (Svanaya)
94.	2,28,9	Kūrma – Gārtsamada (Varuṇa)
95.	2,28,10	Kūrma – Gārtsamada (Varuṇa)
96.	2,28,11	Kūrma – Gārtsamada (Varuṇa)
97.	2,26,9	Viśvāmitra (Agni)
98.	3,62,10	Viśvāmitra (Savitṛ)

ओँ श्रीदेवायनमः॥ ओँ श्रीदेवायनमः॥ ओँ श्रीदेवायनमः॥ ओँ श्रीदेवायनमः॥

[illegible]

ṚGARTHASĀRA

Ṛgarthasāra is the name given to a selection of two hundred mantras from among 10,552 mantras of the *Ṛgveda-saṃhitā,* as representing the thrust of the Vedic corpus. The selection was made by Dinakara-bhaṭṭa, who lived between 1575 and 1640 A.D. His purpose was to present the essential import of the Ṛgveda ('ṛgveda-sāra-bhūtānāṃ ṛchāṃ'); and he also sought to provide a brief gloss for each of the mantras selected by him ('artham brūte'). He follows in the main the Bhāshya of Sāyaṇāchārya (1315-1387); but he differs from him quite frequently, as he himself points out ('kvachid bhāshya-virodhataḥ').

Dinakara-bhaṭṭa was the son of Rāmakṛshṇa-bhaṭṭa and Umāmbā. He was the younger brother of the more renowned Kamalākara bhaṭṭa, the author of *Nyāya-Sindhu,* whose son Viśveśvara-bhaṭṭa, (better known as Gāgā-bhaṭṭa) officiated as the principal priest (purohita) during the coronation of the celebrated Śivāji as Chattrapati in 1674. We have, besides *Ṛgarthasāra,* many works from the pen of Dinakara-bhaṭṭa: *Karma-vipāka-sāra, Prāyaśchitta-sāra, Śānti-sāra, Dinakara-bhaṭṭīya* (commentary on the Mīmāṃsā digest

Śāstra-dīpikā) and *Dinakarodyota* (unfinished). It becomes evident from these works that Dinakara-bhaṭṭa was a fervent Karma-kāṇḍin (given to ritualism), even as Sāyaṇa was. His interpretation of the Ṛgvedic mantras is oriented in favour of the Yajñika outlook.

His selection of the two hundred mantras follows the ashṭaka-varga arrangement of the *Ṛgveda-samhitā* :

86 mantras from the 1st ashṭaka;
13 mantras from the 2nd ashṭaka;
6 mantras from the 3rd ashṭaka;
2 mantras from the 4th ashṭaka;
one each from the 5th and 6th ashṭakas;
4 mantras from the 7th ashṭaka; and
94 mantras from the 8th ashṭaka.

The Sanskrit Academy of the Osmania University, Hyderabad, brought out in 1959 an edition of the mantras selected by Dinakara-bhaṭṭa along with his commentaries on them (ed. by Aryendra Sharma and K. Sitaramaiya).

While the present publication has accepted Dinakara's selections of the mantras, it does not follow his explanations (although his glosses have been reproduced here). For purposes of comparison and additional information, excerpts from Sāyaṇa's bhāshya on the selected mantras have been given,

alongside Dinakara's glosses. Dinakara-bhaṭṭa himself admits that he follows Sāyaṇa's bhāshya in the main ('bhāshyānurodhataḥ').

And Dinakara follows the ritualistic line of the thought (adhi-yajña) adopted by Sāyaṇa in his gloss. And he never even once suggests that the Ṛgvedic mantras admit of being interpreted in the adhyātma manner, although Sāyaṇa occasionally does suggest this possibility. In the translations (or rather paraphrases) attempted by me, I am inclined in favour of the adhyātma interpretation. This may be preceived as quite contrary to the texts of Sāyaṇa-bhāshya and Dinakara's gloss. Sāyaṇa's bhāshya has been given here for the fidelity with which he follows Yāska's *Nirukta* in his etymological and semantic explanations. This is of value even for the adhyātma interpretation. Dinakara's gloss has been reproduced here, for this follows the selection of the mantras that he has made. Otherwise, the English rendering of the mantras follows an independent line of thought, and does not subscribe either to Sāyaṇa's or Dinakara's approach.

It is difficult to determine the basis on which Dinakara has selected the mantras. It is certainly not the devatā, chhandas or viniyoga (use in rituals). There is a large number of mantras selected from the first and last ashṭakas (86 and 94 respectively).

Also given in the present volume are, besides samhitā-pāṭha, pada-pāṭha and details of ṛshi-chhanda-devatā for each mantra, anvaya and a running

English traslation. It is impossible to provide a literal rendering in English or in any other language for the original Vedic passages; there is also the element of hidden meaning (niṇya) in the mantras, which does not become evident for one who is not himself something of a seer or who has not engaged himself in austerity

न प्रत्यक्षमस्ति अनृषेरतपसो वा।

The import of the mantra can only be paraphrased, leaving much to the imagination and intuition of the reader. This is what has been done here. While doing so, help has been taken from the writings of Yāska, Śaunaka, Skanda-svāmin, Veṅkaṭa-mādhava, Ānanda-tīrtha, Rāghavendra-tīrtha, Śrī Aurobindo and Kapāli-śāstri. Also borne in mind is the suggestion that Vedic mantras have three meanings ('trayorthās sarva-vedeshu'); ritualistic, metaphorical and esoteric (adhi-yajña, adhi-daiva and adhyātma).

Dinakara-bhaṭṭa has prefaced his gloss on the selected mantras with the following verses:

संसारचक्रे मुनयोऽप्यनाथा
यां मातरं मात्रुदरे निवासम्।
नेच्छन्त्युमां तामभिनम्य पात्रं
न स्यामहं कस्य मनोरथस्य ॥१॥

श्रीरामकृष्णं पितरं नत्वोमाम्बां च मातरम्।
ऋग्वेदसारभूतानामृचां भाष्यानुरोधतः ॥२॥

अर्थं ब्रूते दिनकरः क्वचिद्भाष्यविरोधतः ।
लोकरञ्जनसिद्ध्यर्थमनेन प्रीयतां गुरुः ॥३॥

This is probably the earliest attempt at a selection of mantras from the Ṛgvedic corpus for the edification of the common folk (Dinakara's expression 'loka-rañjana' may mean this). The corpus is immense in its bulk, which forbids an ordinary aspirant from daring to enter into the fortress. And there has always been the warning that the Vedas can be understood aright only with the help of the Vedāṅgas like Śikshā, Vyākaraṇa, Nirukta, Chhandas and Kalpa. An attempt to present the major thrust of the Vedic corpus briefly and "without tears" is always welcome. Dinakara-bhaṭṭa's effort in this direction is to be appreciated.

अथ

ऋगर्थसारः

(1)

ऋषिः मधुच्छन्दा वैश्वामित्रः।
छन्दः गायत्री।
देवता अग्निः॥

(संहितापाठः)

॥ॐ॥ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्।
होतारं रत्नधातमम्॥१॥ (१.१.१.)

(पदपाठः)

अग्निम्। ईळे। पुरःऽहितम्। यज्ञस्य। देवम्। ऋत्विजम्॥
होतारम्। रत्नऽधातमम्॥१॥

(अन्वयः)

यज्ञस्य पुरोहितं देवं होतारं ऋत्विजं रत्नधातमं अग्निं ईळे।

The seer of this mantra is Madhuchchhandas, son of the sage Viśvāmitra; the metrical form is Gāyatri (24 aksharas); and the deity addressed is Agni.

(Sāyaṇa)

अग्निनामकं देवमीळे। स्तौमि। ईड स्तुतौ। कीदृशमग्निम्? यज्ञस्य पुरोहितम्। यज्ञस्यापेक्षितं होमं सम्पादयति। यद्वा यज्ञस्य सम्बन्धिनि पूर्वभाग आहवनीयरूपेणावस्थितम्। पुनः कीदृशम्? देवं दानादिगुणयुक्तम्। पुनः कीदृशम्? होतारं ऋत्विजम्। देवानां यज्ञेषु होतृनामक ऋत्विगग्निरेव। 'अग्निर्वै देवानां होता' इत्यैतरेयब्राह्मणे (३,१४)।

पुनरपि कीदृशम्? रत्नधातमम् यागफलरूपाणां रत्नानामतिशयेन धारयितारम् पोषयितारं वा ॥१॥

This hymn is employed in the morning ritual (kratu) known as prātar-anuvāka; hence the ritual is called Āgneya-kratu. It is also employed as yājyamantra in the svishṭi-kṛt sequence of Pavamāneshṭi.

(Dinakara)

(अस्या मधुच्छन्दा ऋषिः।) अहम् अग्निम् ईळे स्तौमि। कीदृशं, पुरोहितं पुरो धीयते तम्। अथवा देवानां पुरोहितम्। पुनः कीदृशं यज्ञस्य देवं प्रकाशकम्। (दानाद्दीपनाद्वेति यास्कः ७.१५) पुनः कीदृशम्, ऋत्विजम् ऋतौ वसन्तादिकाले यजति तादृशम्। होतारम् आह्वातारं होमनिष्पादकं वा। पुनः कीदृशं, रत्नधातमं रमणीयानां धनानां दातृतमम् ॥१॥

Agni is addressed here. He is praised as the principal priest (purohita) of life as sacrifice (yajñasya), as the luminous spirit (devam) in the body, as the priest who beckons unto us all the gods (ṛtvijam hotāram), and as the best nourisher (dispenser) of precious gifts from nature (ratna-dhātamam) Agni is the inspirer of all physical, vital, physiological, and mental functions of the body (सर्व शरीर प्रवर्तक), as of the universe.

(NOTE ON AGNI)

The fire-god is the most important of the Vedic gods. According to Yāska he is the god of the Earth realm (pṛthvīsthāna). He is described as

the leader of the hosts of gods (agraṇīr bhavati); he is at the head of all sacrificial activities and he is carried to the altar where offerings are made (nayati) (yajñeshu praṇīyate).

नीतो णीङ् प्रापणे। (Dhātu-pāṭha, 22,5)

According to Sthaulāshṭhīvin (son of Sthūlāshṭhīva), Agni is so called because he burns dry wood (aknopanah), viz., does not have attachment (from knu, snehe) to objects (na snehayati).

Śākapūṇi (Rathītara, son of Śakapūṇa) suggests that the word Agni is formed from three different roots:

(1) अ इण्गतौ (Dhāṭupāṭha 24,36); eti (ayana) "comes" (इत)

(2) ग-अक्तोऽञ्जू व्यक्तिम्रक्षण कान्तिगतिषु (ibid, 29,21); anakti; क here becomes ग; "burns" (अक्त)

or दग्धो दह भस्मीकरणे (ibid, 23 22); dahati → dagdha;

(3) नि-णीङ् प्रापणे (ibid, 22,5); nīh, the long becomes short, नि. अ+ग्+नि "carries" (नीत).

Agni comes to the spot of sacrifice, burns the offerings made into the fire, and carries the offerings to the god for whom it is meant.

(त्रिभ्य आख्यातेभ्यो जायत इति शाकपूणिः। इतात् अक्तात् दग्धाद्वा नीतात् सः खलु एतेरकारं आदत्ते गकारमक्तेर्वा दहतेर्वा नीः परस्तस्यैषा भवति॥ Yāska, *Nirukta* 7,14)

(2)

ऋषिः मधुच्छन्दा वैश्वामित्रः
छन्दः गायत्री।
देवता अग्निः॥

(संहितापाठः)

यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि।
तवेत् तत् सत्यमङ्गिरः॥२॥ (१.१.६)

(पदपाठः।)

यत्। अङ्ग। दाशुषे। त्वम्। अग्ने। भद्रम्। करिष्यसि॥
तव। इत्। तत्। सत्यम्। अङ्गिरः॥२॥

(अन्वयः)

अङ्ग अग्ने त्वं दाशुषे यद् भद्रं करिष्यसि, तत् तवेत्। (हे) अङ्गिरः, सत्यम्॥

The seer of this mantra is Madhuchchhandas, son of Viśvāmitra; the metrical form is Gāyatrī; and the deity addressed is Agni.

(Sāyaṇa)

अङ्गेत्यभिमुखीकरणार्थो निपातः। अङ्ग अग्ने हे अग्ने। दाशुषे हविर्दत्तवते यजमानाय तत्प्रीत्यर्थं यद्भद्रं वित्तगृहप्रजापशुरूपं कल्याणं करिष्यसि तद्भद्रं तवैव। सुखहेतुरिति।

है अङ्गिरोऽग्ने। एतच्च सत्यं न त्वत्र विसंवादोऽस्ति॥

(Dinakara)

अङ्ग अग्ने। हे अग्ने त्वं दाशुषे दानशीलाय (दाशृ दाने इति धातोः दाश्वान् साह्वानिति क्वसुन्प्रत्ययः। पा० ६.१.१२) यद् भद्रं प्रजापश्वादिरूपं कल्याणं करिष्यसि।

तत् सत्यम् तव इत् तत् तवैव। इच्छब्द एवार्थः। हे अङ्गिरः अङ्गाररूपाऽग्ने। (अङ्गिरा अङ्गाराः इति यास्कात्। ३.१७) यजमानस्य सम्पत्तौ सत्यां पुनरुत्तरक्रत्वनुष्ठानेन तवैव भद्रं भवतीति भावः ॥२॥

Agni as Aṅgirā is addressed here as the dear one (aṅga). He is acclaimed as bestowing on the pious devotee (dāśushe) all that is auspicious and meritorious (bhadram). Whatever is auspicious and meritorious is indeed the work accomplished (karishyasi) by Agni. That in fact is the truth (satyam) of Agni (viz., his real nature).



(3)

ऋषिः मधुच्छन्दा वैश्वामित्रः
छन्दः गायत्री।
देवता अग्निः॥

(संहितापाठः)

स नः पितेव सूनवेऽग्ने सूपायनो भव।
सचस्वा नः स्वस्तये॥३॥ (१.१.९)

(पदपाठः)

सः। नः। पिताऽइव। सूनवे। अग्ने। सुऽउपायनः। भव॥
सचस्व। नः। स्वस्तये॥३॥

(अन्वयः)

अग्ने सः सूनवे पितेव नः सूपायनः भव। नः स्वस्तये सचस्व॥

The seer of this mantra is Madhuchchhandas, son of Viśvāmitra; the metrical form is Gāyatri; and the deity addressed is Agni.

(Sāyaṇa)

हे अग्ने। स त्वं नोऽस्मदर्थं सूपायनः शोभनप्राप्तियुक्तो भव।
तथा नोऽस्माकं स्वस्तये विनाशराहित्यार्थं सचस्व, समवेतो भव॥
तत्रोभयत्र दृष्टान्तः – यथा सूनवे पुत्रार्थं पिता सुप्रापः प्रायेण समवेतो भवति, तद्वत्॥

(Dinakara)

हे अग्ने सः त्वं नः अस्मदर्थं सूपायनः शोभनम् उपायनं यस्येति तादृशः भव। तथा, नः अस्माकम् स्वस्तये विनाशराहित्यार्थं सचस्व समवेतो भव। क इव, सूपायनः पितेव। पुत्रार्थं यथा पिता (सुप्रापः) तद्वदेव ॥३॥

The seer pleads with Agni to become easily accessible for him (sūpāyano bhava) and become threrby a source of all plenitude. Even as the dear father is of easy access to his son (piteva sūnave) and becomes his well-wisher in all ways (sūpāyano), so should Agni be to his devotees (sachasvā nah svastaye).



(4)

ऋषिः मधुच्छन्दा वैश्वामित्रः
छन्दः गायत्री।
देवता इन्द्रः॥

(संहितापाठः)

सं चोदय चित्रमर्वाग् राध इन्द्र वरेण्यम्।
असदित् ते विभु प्रभु ॥४॥ (१.९.५)

(पदपाठः)

सम्। चोदय। चित्रम्। अर्वाक्। राधः। इन्द्र। वरेण्यम्।
असत्। इत्। ते। विऽभु। प्रऽभु॥४॥

(अन्वयः)

(हे) इन्द्र, वरेण्यं चित्रं राध अर्वाक् संचोदय। ते विभु प्रभु असत् इत्॥

The seer of this mantra is Madhuchchhandas, son of Viśvāmitra; the metrical form is Gāyatri; and the deity addressed is Indra.

(Sāyaṇa)

हे इन्द्र, वरेण्यं श्रेष्ठं राधो धनं चित्रं मणिमुक्तादिरूपेण बहुविधम्। अर्वाक् अस्मदभिमुखं यथा भवति तथा। संचोदय सम्यक् प्रेरय। भोगाय यावत्पर्याप्तम्।

तावद्विभुशब्देनोच्यते। ततोऽप्यधिकं प्रभुशब्देन। तादृशं ते धनं ते तवैवासदित् अस्त्येव। तस्मादस्मभ्यं प्रयच्छेत्यर्थः।

(Dinakara)

हे इन्द्र वरेण्यं श्रेष्ठं राधः धनं चित्रं मणिमुक्तादिरूपेण बहुविधम् अर्वाक् अस्मदभिमुखं यथा भवति तथा सं चोदय सम्यक् प्रेरय। विभु भोगाय पर्याप्तं प्रभु ततोऽधिकं तादृशं धनं ते तव असत् इत् अस्त्येव, अतो ददस्व ॥४॥

Indra is being addressed here. He is implored to present before the devotee manifold gifts (chitram) so that he may easily possess them. For Indra indeed is in sure possession (asat it) of excellent (vareṇyam) wealth (rādhah), enough for us to enjoy (vibhu) and much more (prabhu).

(5)

ऋषिः मधुच्छन्दा वैश्वामित्रः
छन्दः गायत्री।
देवता इन्द्रः॥

(संहितापाठः)

यत् सानोः सानुमारुहद् भूर्यस्पष्ट कर्त्वम्।
तदिन्द्रो अर्थं चेतति यूथेन वृष्णिरेजति॥५॥ (१.१०.२)

(पदपाठः)

यत्। सानोः। सानुम्। आ। अरुहत्। भूरि। अस्पष्ट। कर्त्वम्॥
तत्। इन्द्रः। अर्थम्। चेतति। यूथेन। वृष्णिः। एजति॥५॥

(अन्वयः)

यत् (यदा) सानोः सानुं आ अरुहत् भूरि कर्त्वं अस्पष्ट, तत् (तदा) इन्द्रः अर्थं चेतति (जानाति)। वृष्टिः यूथेन एजति।

The seer of this mantra is Madhuchchhandas, son of Viśvāmitra; the metrical form is Anushṭup; and the deity invoked is Indra.

(Sāyaṇa)

यद्यदा सानोः सानुमारुहत् यजमानः सोमवल्ली समिदाद्याहरणाय एकस्मात्पर्वतभागादपरं पर्वतभागमारूढवान्। तदा भूरि प्रभूतं कर्त्वं कर्म सोमयागरूपं अस्पष्ट स्पृष्टवान्। उपक्रान्तवानित्यर्थः।

तत् तदानीं इन्द्रोऽर्थं यजमानस्य प्रयोजनं चेतति जानाति। ज्ञात्वा च वृष्णिः कामानां वर्षिता सन्। यूथेन मरुद्गणेन सह। एजति कम्पते। स्वस्थाद्यज्ञभूमिमागन्तुमुद्युङ्क्त इत्यर्थः॥

(Dinakara)

यत् यदा सानोः सानुम् आरुहत् यजमानः सोमसमिदाद्याहरणार्थम् एकस्मात् पर्वतभागादपरमारूढवान्, तथा भूरि प्रभूतं कर्त्वं कर्तव्यं (कृत्यार्थे त्वन्। पा० ३.४.१४) सोमयागरूपं कर्म अस्पष्ट स्पृष्टवान् उपक्रान्तवान्। तत् तदानीम् इन्द्रः अर्थं यजमानस्य प्रयोजनं चेतति जानाति। ज्ञात्वा च वृष्णिः कामानां वर्षिता सन् यूथेन मरुद्गणेन सह एजति कम्पते गन्तुमुद्युङ्क्ते यज्ञभूमिमित्यर्थः ॥५॥

When the devotee ascends one peak from another (sānoh sānum āruhat) in earnest quest of ambrosial wisdom, and reaches out (aspashṭa) to the ultimate work of human existence (kartvam), Indra knows (chetati) the devotee's purpose (artham), and arrives instantly there (ejati), along with all his hosts (yūthena), for he is verily the bestower of all blessings (vṛshṇih).



(6)

ऋषिः जेता माधुच्छन्दसः।
छन्दः अनुष्टुप्।
देवता इन्द्रः॥

(संहितापाठः)

इन्द्रमीशानमोजसाभि स्तोमा अनूषत।
सहस्रं यस्य रातय उत वा सन्ति भूयसीः ॥६॥ (१.११.८)

(पदपाठः)

इन्द्रम्। ईशानम्। ओजसा। अभि। स्तोमाः। अनूषत॥
सहस्रम्। यस्य। रातयः। उत। वा। सन्ति। भूयसीः॥६॥

(अन्वयः)

यस्य रातयः सहस्रं उत वा भूयसीः सन्ति, ईशानं इन्द्रं सोमाः ओजसा अभि अनूषत॥

The seer of this mantra is Jetā son of Madhuchchhandas; the metrical form is Anushṭup; and the deity invoked is Indra.

(Sāyaṇa)

स्तोमाः स्तोतारः। ऋत्विजः ओजसा बलेन। ईशानम्। जगतो नियामकं। इन्द्रम्। अभ्यनूषत सर्वत्र स्तुतवन्तः।

यस्य इन्द्रस्य। रातयो धनदानादि। सहस्रं सहस्रसंख्योपेतानि। सन्ति। उत अथवा। भूयसीः सहस्रसंख्यया अपि अधिकाः। सन्ति॥

(Dinakara)

स्तोमाः स्तोतारः ऋत्विजः ओजसा बलेन ईशानं जगतो नियामकमिन्द्रम् अभि अनूषत सर्वत्र स्तुतवन्तः। यस्य इन्द्रस्य रातयः धनानि सहस्रं सहस्रसंख्याकानि उत वा अथवा भूयसीः भूयस्यः सहस्रसंख्याधिकाः सन्ति। इन्द्रमिति पूर्वत्रान्वयः॥६॥

Indra is eulogized here. The mighty Indra is the lord (īśānam) of the worlds outside and inside of us. Him the articulate devotees (stomā) praise, (anūshata) in all ways and in accordance with their fervour and power. His wealth (rātayah, gifts) is a thousand-fold (sahasram) or (uta) even more (bhūyasīh santi).

(7)

ऋषि: मेधातिथि: काण्व: ।
छन्द: गायत्री
देवता इन्द्र: ॥

(संहितापाठ:)

सेमं नः काममा पृण गोभिरश्वैः शतक्रतो ।
स्तवाम त्वा स्वाध्यः ॥७॥ (१.१६.९)

(पदपाठ:)

सः। इमम्। नः। कामम्। आ। पृण। गोभिः। अश्वैः। शतक्रतो इति शतऽक्रतो॥ स्तवाम। त्वा। सुऽआध्यः ॥२॥

(अन्वय:)

(हे) शतक्रतो, सः त्वं नः इमं कामं गोभिरश्वैः आ पृण। (वयमपि) स्वाध्यः त्वा स्तवाम॥

The seer of this mantra is Medhātithi, son of Kaṇva; the metrical form is Gāyatri; and the deity invoked is Indra.

(Sāyaṇa)

हे शतक्रतो। स त्वं। नोऽस्मदीयं इमं कामं काम्यमानं फलम्। गोभिरश्वैश्च सह। आपृण सर्वतः पूरय।

वयमपि। स्वाध्यः सुष्ठु सर्वतो ध्यानयुक्ताः सन्तः। त्वा त्वाम्। स्तवाम॥

(Dinakara)

हे शतक्रतो सः त्वं नः अस्माकम् इमं कामं गोभिरश्वैश्च सह आ पृण सर्वतः पूरय। वयमपि स्वाध्यः (ध्यै चिन्तायां) सुष्ठु आ सर्वतो ध्यानयुक्ताः सन्तः त्वां स्तवाम। (सेममिति सः इमम्। सोऽचि लोपे चेदिति सुलोपः। पा० ६.१.१३४) ॥७॥

Indra is here addressed. He is the god of a hundred wise resolutions (śata-kratu). The seer expects from him a complete sense of fulfilment (āpṛṇa) in the form of possession of cows (knowledge) and horses (strength) (gobhih aśvaih). And the seer promises that he with others would keep the mighty Indra in their thoughts (stavāma) in a mood of devout contemplation (svādhyah).

(8)

ऋषिः मेधातिथिः काण्वः।
छन्दः गायत्री।
देवता विष्णुः॥

(संहितापाठः)

इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्।
समूळ्हमस्य पांसुरे॥८॥ (१.२२.१७)

(पदपाठः)

इदम्। विष्णुः। वि। चक्रमे। त्रेधा। नि। दधे। पदम्॥
सम्ऽऊळ्हम्। अस्य। पांसुरे॥८॥

(अन्वयः)

विष्णुः इदं विचक्रमे। त्रेधा पदं निदधे। अस्य पांसुरे समूळ्हम्।

The seer of this mantra is Medhātithi, son of Kaṇva; the metrical form is Gāyatri; and the deity invoked is Vishṇu.

(Sāyaṇa)

विष्णुस्त्रिविक्रमावतारधारीदं प्रतीयमानं सर्वं जगदुद्दिश्य विचक्रमे। विशेषेण क्रमणं कृतवान्। तदा। त्रेधा त्रिभिः प्रकारैः। पदं निदधे। स्वकीयं पादं प्रक्षिप्तवान्।

अस्य विष्णोः पांसुरे धूलियुक्ते पादस्थाने। समूळ्हमिदं सर्वं जगत् सम्यग् अन्तर्भूतम्।

(विष्णुर्विशतेर्वा व्यश्नोतेर्वा। यदिदंकिञ्च तद्विक्रमते विष्णुस्त्रिधा निधत्ते पदं त्रेधाभावाय पृथिव्यामन्तरिक्षे दिवीति शाकपूणिः। समारोहणे विष्णुपदे गयशिरसीति और्णवाभः। इति यास्कः॥)

(Dinakara)

(एताः सोमातिरेकशस्त्रे विनियुक्ताः।) त्रिविक्रमावतारधारी विष्णुः इदं जगत् वि चक्रमे क्रामति स्म। तदा च त्रेधा पदं नि दधे प्रक्षिप्तवान्। अस्य विष्णोः पांसुरे धूलियुक्ते पादस्थाने इदं जगत् समूळ्हं (वह प्रापणे, निष्ठेति क्तः। पा० ३.२.१०२) प्रविष्टम् ॥८॥

Vishṇu is the deity of this hymn. His traversing the universe (vichakrame) is here celebrated. He strode across, in just three strides (tredhā nidadhe padam). And the entire existence was thereby covered (samūḷham) by the dust of his feet (asya pāmsure).

(9)

ऋषिः मेधातिथिः काण्वः।
छन्दः गायत्री।
देवता विष्णुः॥

(संहितापाठः)

त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः।
अतो धर्माणि धारयन्॥९॥ (१.२२.१८)

(पदपाठः)

त्रीणि। पदा। वि। चक्रमे। विष्णुः। गोपाः। अदाभ्यः॥
अतः। धर्माणि। धारयन्॥९॥

(अन्वयः)

अदाभ्यः गोपाः विष्णुः धर्माणि धारयन् अतः त्रीणि पदा विचक्रमे॥

The seer of this mantra is Medhātithi, son of Kaṇva; the metrical form is Gāyatri; and the deity invoked is Vishṇu.

(Sāyaṇa)

अदाभ्यः केनापि हिंसितुमशक्यः। गोपाः सर्वस्य जगतो रक्षकः। (गोपामृतस्य १,९,८) विष्णुः। अतः तृथिव्यादिस्थानेष्वतः। एतेषु त्रीणि पदानि विचक्रमे।

किं कुर्वन्? धर्माणि अग्निहोत्रादीनि। धारयन् पोषयन्॥

(Dinakara)

अदाभ्यः केनापि हिंसितुमशक्यः (दभ हिंसायाम्) गोपाः पृथ्वीरक्षकः अतः धर्माणि अग्निहोत्रादीनि धारयन् फलदानेन पोषयन् विष्णुः पृथिव्यादिस्थानेषु त्रीणि पदा (सुपां सुलिगिति डादेशः। पा० ७.१.३९) पदानि वि चक्रमे चक्राम ॥९॥

The indefatigable and invincible (adābhyah) Vishṇu, protects the universe (gopāh) (nourishes immortality). It is in order to uphold the universal order (dharmāṇi dhārayan), that he strode across in three steps (trīṇi padā vi chakrame).

(10)

ऋषिः मेधातिथिः काण्वः।
छन्दः गायत्री।
देवता विष्णु॥

(संहितापाठः)

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे।
इन्द्रस्य युज्यः सखा ॥१०॥ (१.२२.१९)

(पदपाठः)

विष्णोः। कर्माणि। पश्यत। यतः। व्रतानि। पस्पशे॥
इन्द्रस्य। युज्यः। सखा॥१०॥

(अन्वयः)

यतः व्रतानि पस्पशे विष्णोः कर्माणि पश्यत (सः) इन्द्रस्य युज्यः सखा॥

or, as Jayatīrtha suggests

अत्र यः पस्पशे यश्च इन्द्रस्य युज्यः सखा तस्य विष्णोः इति एकवाक्यतया योजना॥

The seer of the mantra is Medhātithi, son of Kaṇva; the metrical form is Gāyatri; and the deity invoked is Vishṇu.

(Sāyaṇa)

(ऽ) हे ऋत्विगादयः। विष्णोः कर्माणि पालनादीनि पश्यत। यतो। यैः कर्मभिः। व्रतानि अग्निहोत्रादीनि। पस्पशे सर्वो यजमानः स्पृष्टवान्। विष्णोः अनुग्रहात् अनुतिष्ठति इत्यर्थः।

तादृशो विष्णुः। इन्द्रस्य युज्योऽनुकूलः। सखा। भवति।

(Dinakara)

हे ऋत्विगादयः विष्णोः कर्माणि जगत्पालनादीनि पश्यत। यतः विष्णुप्रसादात् यजमानः व्रतानि अग्निहोत्रादीनि पस्पशे स्पृष्टवान् कृतवान् (स्पश बाधनस्पर्शनयोः) तादृशश्च विष्णुः इन्द्रस्य युज्यः योग्यः सखा भवति॥१०॥

Look, look at (paśyata, understand) the accomplishments of Vishṇu (vishṇoh karmāṇi) (viz., the striding accross). It is through them that we can recognize (paspaśe, from spaśa ajñāta-dṛśau) the hidden principles (vṛatāni) (behind the working of the three worlds, projected from the three strides of Vishṇu). For Vishṇu is the invariable associate (yujyah sakhā) of Indra (viz., the principle of life, prāṇa or mukhya-prāṇa, cf. Aitareya).



(11)

ऋषिः मेधातिथिः काण्वः।
छन्दः गायत्री।
देवता विष्णुः॥

(संहितापाठः)

तद् विष्णोः परमं पदं सदा पश्यन्ति सूरयः।
दिवीव चक्षुराततम् ॥११॥ (१.२२.२०)

(पदपाठः)

तत्। विष्णोः। परमम्। पदम्। सदा। पश्यन्ति। सूरयः॥
दिविऽइव। चक्षुः। आऽततम्॥११॥

(अन्वयः)

सूरयः विष्णोः तत् परमं पदं दिवि आततं चक्षुरिव सदा पश्यन्ति॥

The seer of the mantra is Medhātithi, son of Kaṇva; the metrical form is Gāyatrī; and the deity invoked is Vishṇu.

(Sāyaṇa)

सूरयः विद्वांसः ऋत्विगादयः। विष्णोः सम्बन्धि परमं उत्कृष्टं तच्छास्त्रप्रसिद्धम्। पदं स्वर्गस्थानम्। शास्त्रदृष्ट्या सर्वदा पश्यन्ति।

तत्र दृष्टान्तः। दिवीव आकाशे यथा। आततं सर्वतः प्रसृतम्। चक्षुः निरोधाभावेन विशदं पश्यति। तद्वत्॥

(Dinakara)

विष्णोः तत् परमं पदं स्थानं सूरयः पण्डिताः शास्त्रदृष्ट्या सदा सर्वदा पश्यन्ति। यथा दिवीव आकाशे इव आततं प्रसृतं (तनु विस्तारे) चक्षुः पदार्थान् विशदं पश्यति। तथा विष्णुपदस्यापि शास्त्रदृष्ट्या दर्शनात् न सन्देहः कर्तव्यः ॥२१॥

The wise folk (sūrayah) (viz. the liberated ones) uninterruptedly contemplate (sadā paśyanti) upon that supreme foothold (viz., a nature) of Vishṇu (vishṇoh paraman padam; padam rūpam, cf. (सूरः पश्यति चक्षसा) 10,10,9), like into (iva) the eye that is directed towards (or fixed upon) the wide space of the sky (chakshur ātatam divi) (viz., the eye does not see any object or shape, but the formless Vishṇu that is all-pervasive).



(12)

ऋषिः मेधातिथिः काण्वः

छन्दः गायत्री।

देवता विष्णुः॥

(संहितापा*ठः)

तद् विप्रासो विपन्यवो जागृवांसः समिन्धते।
विष्णोर्यत् परमं पदम्॥१२॥ (१.२२.२१)

(पदपाठः)

तत्। विप्रासः। विपन्यवः। जागृऽवांसः। सम्। इन्धते॥
विष्णोः। यत्। परमम्। पदम्॥१२॥

(अन्वयः)

विपन्यवः विप्रासः विष्णोः यत् परमं पदं तत् जागृवांसः सं इन्धते॥

The seer of this mantra is Medhātithi, son of Kaṇva; the metrical form is Gāyatri; and the deity invoked is Vishṇu.

(Sāyaṇa)

पूर्वोक्तं विष्णोः। यत् परमं पदमस्ति तत् पदम्। विप्रासो मेधाविनः। समिन्धते सम्यक् दीपयन्ति। विपन्यवो विशेषेण स्तोतारः। जागृवांसः शब्दार्थयोः प्रमादराहित्येन जागरूकाः॥

That (tat) supreme foothold (or nature) of Vishṇu (yat vishṇoh paramam padam) is eulogized (glorified, illumined, sam indhate), by the brilliant ones (viprāsah), who are also wise (vipanyavah from 'pana jñāne', viśesheṇa jñāninah) and spiritually ever awake (jāgṛvāmsah, viz., nirṇidrāh, nityonmesha-śālinah)

(13)

ऋषिः मेधातिथिः काण्वः।
छन्दः अनुष्टुप्।
देवता अग्निः॥

(संहितापाठः)

सं माग्ने वर्चसा सृज सं प्रजया समायुषा।
विद्युर्मे अस्य देवा इन्द्रो विद्यात्सह ऋषिभिः ॥१३॥
(१,२३,२४)

(पदपाठः)

सम्। मा। अग्ने। वर्चसा। सृज। सम्। प्रऽजया। सम्। आयुषा॥
विद्युः। मे। अस्य। देवाः। इन्द्रः। विद्यात्। सह। ऋषिऽभिः ॥१३॥

(अन्वयः)

(हे) अग्ने, मा वर्चसा प्रजया आयुषा सं सृज। देवाः अस्य मे विद्युः। इन्द्रः ऋषिभिः सह (अस्य मे) विद्यात्॥

The seer of this mantra is Medhātithi, son of Kaṇva; the metrical form is Anushṭup; and the deity invoked is Agni.

(Sāyaṇa)

हे अग्ने, वर्चः प्रजायुर्भिः मां संयोजय। देवाः सोमपातारोऽस्य मे यजमानस्य।

विद्युः अनुष्ठानं जानीयुः। किञ्च इन्द्रश्च। ऋषिगणैः सह। ममानुष्ठानम्। विद्यात् जानीयात्।

(Dinakara)

हे अग्ने मा मां वर्चसा तेजसा सं सृज संयोजय। तथा प्रजया सं सृज। आयुषा सं सृज। (किं च) देवाः सोमपातारः अस्य मे मम यजमानस्य विष्णुः अनुष्ठानं जानीयुः। अपि च ऋषिभिः सह इन्द्रो विद्यात् जानीयात्॥१३॥

Agni is addressed here for the conferment of lustre (vigour, varchasā), progeny (wisdom, prajayā) and longevity (āyushā). The shining ones (devāh) will be witnesses (vidyuh) to my devotion to Vishṇu (asya me); so will be Indra with the host of seers (indro ṛshibhih saha).



(14)

ऋषिःशुनःशेप अजीगर्तिः
(कृत्रिमो वैश्वामित्रो देवरातः।)
छन्दः त्रिष्टुप्।
देवता कः (प्रजापतिः॥)

(संहितापाठः)

कस्य नूनं कतमस्यामृतानां मनामहे चारु देवस्य नाम।
को नो मह्या अदितये पुनर्दात् पितरं च
दृशेयं मातरं च ॥१४॥ (१.२४.१)

(पदपाठः)

कस्य। नूनम्। कतमस्य। अमृतानाम्। मनामहे। चारु। देवस्य। नाम॥ कः। नः। मह्यै अदितये। पुनः। दात्। पितरम्। च। दृशेयम्। मातरम्। च॥१४॥

(अन्वयः)

अमृतानां कतमस्य देवस्य चारु नाम मनामहे ? कः नः मह्यै अदितये दात्? पितरं च मातरं च पुनः दृशेयम् ?

The seer of this mantra is Śunahśepa, son of Ajīgarta; the metrical form is Trishṭup; and the deity invoked is Ka (Prajāpati).

(Sāyaṇa)

(शुनःशेपो यूपे बद्धः विचकित्सति) वयं (शुनःशेपनामका)। अमृतानां देवतानां मध्ये। कतमस्य किंजातीयकस्य। कस्य देवस्य। चारू शोभनम्। नाम। मनामहे उच्चारयामः।

को वा देवा माम् मुमूर्षुम्। पुनरपि मह्यै महत्यै। आदितये पृथिव्यै। दात् दद्यात्। तेन देवेन अहं अमृतः सन्। पितरं मातरं च। दृशेयं पश्येयम्। (को ह वै नाम प्रजापतिरिति श्रुतेः)

(Dinakara)

यूपे बद्धः कांदिशीकः शुनःशेपः के देवमुपधावामीति संसारं विचिकित्सति। वयं शुनःशेपनामकाः अमृतानां देवानां मध्ये कतमस्य किंजातीयस्य (वा बहूनां जातिपरिप्रश्ने डतमच्। पा० ५.३.१३) कस्य नूनं कस्य वाग्न्यादेश्चारु शोभनं नाम मनामहे उच्चारयामः (मन ज्ञाने) को देवः नः अस्मान् मृतप्रायान् पुनरपि मह्यै महत्यै अदितये पृथिव्यै दात् दद्यात् पृथिव्यां स्थापयेदित्यर्थः। येनाहममृतः सन् पितरं मातरं च दृशेयं पश्येयम्। यद्वा कः प्रजापतिरस्मान् स्थापयत्विति प्रार्थना। अस्मिंश्च पक्षे पूर्वार्धमात्रेण विचिकित्सा – हन्ताहं कां देवताम् उपधावामीति ॥१४॥

Prajāpati (whose name is Kah) is adored here. Among the immortal ones (viz., the gods, amṛtānām), whose (kasya, katamasya) splendid name (chāru nāma) are we to take to mind (manāmahe)? who indeed (kah, viz., which god) will render us back to this vast earth, so that I can behold my father and my mother (my progenitors, pitaram mātaram cha), viz., dyāvā-pṛthivī, the sky and the earth?

(15)

ऋषिः शुनःशेप आजीगर्तिः
(कृत्रिमो वैश्वामित्रो देवरातः।)
छन्दः त्रिष्टुप्।
देवता अग्निः॥

(संहितापाठः)

अग्नेर्वयं प्रथमस्यामृतानां मनामहे चारु देवस्य नाम।
स नो मह्या अदितये पुनर्दात् पितरं च दृशेयं मातरं च॥१५॥
(१.२४.२)

(पदपाठः)

अग्नेः। वयम्। प्रथमस्य। अमृतानाम्। मनामहे। चारु। देवस्य नाम॥
सः। नः। मह्यै। अदितये। पुनः। दात्। पितरम्। च। दृशेयम्। मातरम्।
च॥१५॥

(अन्वयः)

वयं अमृतानां प्रथमस्य देवस्य अग्नेः चारु नाम मनामहे। सः नः मह्यै अदितये पुनः दात्। पितरं मातरं च दृशेयम्॥

The seer of this mantra is Śunahśepa, son of Ajīgarta; the metrical form is Trishṭup; and the deity invoked is Agni.

(Sāyaṇa)

इत्थं प्रथमयर्चा विचिकित्सां कृत्वा प्रजापतेः सकाशात्तं देवमग्निं निश्चित्य अनया तुष्टाव। पूर्ववद्योजना। दाद्दातु। दृशेयं पश्यानीत्येवमाशीः॥

(Dinakara)

अस्यार्थः स्पष्टत्वान्नोक्तः॥

Agni is here described as the first among the immortals (devas). Rest as earlier.

(16)

ऋषिः शुनःशेप आजीगर्तिः।
छन्दः त्रिष्टुप्।
देवता वरुणः॥

(संहितापाठः)

तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः।
अहेळमानो वरुणेह बोध्युरुशंस मा न आयुः प्र मोषीः ॥१६॥
(१.२४.११)

(पदपाठः)

तत्। त्वा। यामि। ब्रह्मणा। वन्दमानः। तत्। आ। शास्ते। यजमानः।
हविःऽभिः। अहेळमानः। वरुण। इह। बोधि। उरुऽशंस। मा। नः।
आयुः। प्र। मोषीः ॥१६॥

(अन्वयः)

(हे) वरुण, ब्रह्मणा वन्दमानः त्वा तत् यामि। यजमानः हविर्भिः हविर्भिः तत् आशास्ते। इह अहेळमानः बोधि। उरुशंस, नः आयुः मा प्रमोषीः॥

The seer of this mantra is Śunahśepa, son of Ajīgarta; the metrical form is Trishṭup; and the deity invoked is Varuṇa.

(Sāyaṇa)

हे वरुण, मुमूर्षुरहं। त्वां प्रति तदायुः। यामि याचे। कीदृशः? ब्रह्मणा प्रौढेन स्तोत्रेण। वन्दमानः स्तुवन्। सर्वत्र। यजमानोऽपि हविर्भिः तदायुः। आशास्ते प्रार्थयते।

त्वं च। इह कर्मणि। अहेळमानः अनादरमकुर्वन्। बोधि अस्मदपेक्षितं बुद्ध्यस्व। हे उरुशंस बहुभिः स्तुत्य। नः अस्मदीयम्। आयुः मा प्रमोषीः। प्रमुषितं मा कुरु॥

(Dinakara)

'अत्र शुनःशेपो वरुणं प्रार्थयते। हे वरुण त्वा त्वां तत् आयुः यामि याचामि याचे। (२यामि याचामीत्यर्थे चलोपश्छान्दसः। वर्णस्य वर्णयोर्लोपो बहूनां व्यञ्जनस्य चेति बृहद्देवतायाम्। २.११६) ब्रह्मणा वन्दमानः स्तुतिं नमस्कारं वा कुर्वाणोऽहम् (वदि अभिवादनस्तुत्योः)। यजमानोऽपि (हविर्भिः) तदायुराशास्ते प्रार्थयते। त्वं चेह कर्मणि अहेळमानः अनादरमकुर्वाणः अक्रुध्यन् वा (अहेळमानोऽक्रुध्यन्निति यास्कोक्तेः ४.४.२५। प्रार्थनायां क्रोधोऽनादरो भवति वा तदुभयं परिहृतम्।) बोधि बुध्यस्व अस्मत्प्रार्थितम्। अहेळमान इति हेळ अनादरे शानच्। बोधीति बुध अवगमने लोटः सेर्हिः। वहुलं छन्दसि (पा० २.४.७३) इति विकरणस्य लुक्। हुझल्भ्यः (पा० ६.४.१०१) इति हेर्धिरित्यादेशः। धातोरन्त्यलोपश्छान्दसः। ननु बोधीति, सेर्ह्यपिच्च (पा० ३.४.८७) इत्यपित्त्वात् सार्वधातुकमपित् (पा० १.२.४) इति अपितो ङित्त्वात् क्ङिति च (पा० १.१.५) इति गुणनिषेधात् कथं गुण उच्यते? वा छन्दसि (पा० ३.४.८८) इति पित्त्वात् पुगन्तलघूपधस्य (पा० ७.३.८६) इति गुणः।) हे उरुशंस बहुभिः स्तुत्य (उरु, तुवि, पुरु, भूरि इति उरुशब्दस्य बहुनामसु पाठात्।) प्रार्थितमायुर्मा प्रमोषीः प्रमुषितं मा कुर्विति। (मुष स्तेये, लोडर्थे लुङ्। छन्दसिलुङ्लङ्लिटः (पा० ३.४.३) इति। वदव्रज (पा० ८.२.३.) इति प्राप्तायाः वृद्धेः, नेटि (पा० ८.२.४.) इति निषेधात् लघूपधगुणः)॥१६॥

The verse is addressed to Varuṇa. Longevity (āyuh) is begged from him (tvā yāmi) through supplication (vandamānah), along with excellent hymns (brahmaṇā); the sacrificing priest too begs the same (ā śāste) through offerings (havirbhih). Varuṇa is prevailed upon not to be indifferent (ahelamānah). He is the much-praised one (uruśaṁsa). The seer begs him to cut not his life short (āyuh mā pramoshīh), nor the lives of others (nah).

(17)

ऋषिः शुनःशेप आजीगर्तिः
(कृत्रिमो वैश्वामित्रो देवरातः)
छन्दः त्रिष्टुप्।
देवता वरुणः ॥

(संहितापाठः)

उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥१७॥
(१.२४.१५)

(पदपाठः)

उत्। उत्ऽतमम्। वरुण। पाशम्। अस्मत्। अव। अधमम्। वि।
मध्यमम्। श्रथय ॥ अथ। वयम्। आदित्य। व्रते। तव। अनागसः।
आदितये। स्याम ॥१७॥

(अन्वयः)

(हे) वरुण, उत्तमं पाशं अस्मत् उत्श्रथाय। अदमं अव (श्रथाय)। विश्रथाय। अथ आदित्य, वयं तव व्रते अदितये अनागसः स्याम ॥१७॥

The seer of this mantra is Śunahśepa, son of Ajīgarta; the metrical form is Trishṭup; and the deity invoked is Varuṇa.

(Sāyaṇa)

हे वरुण। उत्तमं उत्कृष्टं। शिरसि बद्धं पाशम्। अस्मत् अस्मत्तः। उच्छ्रथाय उत्कृष्य शिथिलं कुरु। अधमं निकृष्टम्। पादेऽवस्थितं पाशम्। अव श्रथाय अधस्तादवकृष्य शिथिलीकुरु। मध्यमं नाभिप्रदेशगतं पाशम्। वि श्रथाय वियुज्य शिथिलीकुरु।

अथ अनन्तरं। हे आदित्य अदितेः पुत्र वरुण। वयं शुनःशेपाः। तव व्रते त्वदीये कर्मणि। अदितये खण्डनराहित्याय। अनागसोऽपराधरहिताः। स्याम भवेम॥

(Dinakara)

हे वरुण उत्तमं शिरसि स्थितं पाशं मध्यमं नाभिदेशस्थितम् अधमं पाददेशस्थितमपि पाशं (विशब्दोऽप्यर्थेः) अस्मत् उत् उत्कृष्य अव श्रथय शिथिलीकुरु। [अथ] हे आदित्य अदितेः पुत्र वरुण वयम् अपि तव व्रते त्वदीयकर्मणि अदितये खण्डनराहित्याय अनागसः अपराधरहिताः स्याम भवेम॥१८॥

Varuṇa, the son of Aditi (hence Āditya), is supplicated here for the sake of loosening up (śrathāya) the bonds that are upper (at), lower (ava) and in the middle (vi) (viz. the fetters that tie the head, the feet and the navel region). When the bonds are thus weakened or removed (atha), the devotees may be free from defects and faults (anāgasah) and attend to the gods without interruption (aditaye syāma).



(18)

ऋषिः शुनःशेप आजीगर्तिः।
छन्दः त्रिष्टुप्।
देवता विश्वेदेवाः ॥

(संहितापाठः)

नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो नम आशिनेभ्यः।
यजाम देवान् यदि शक्नवाम मा ज्यायसः शंसमा वृक्षि देवाः ॥१८॥
(१.२७.१३)

(पदपाठः)

नमः। महत्ऽभ्यः। नमः। अर्भकेभ्यः। नमः। युवऽभ्यः। नमः।
आशिनेभ्यः॥ यजाम। देवान्। यदि। शक्नवाम। मा। ज्यायसः। शंसम्।
आ। वृक्षि। देवाः ॥१८॥

(अन्वयः)

महद्भ्यः नमः। अर्भकेभ्यः नमः। युवभ्यः नमः। आशिनेभ्यः नमः। यदि शक्नवाम देवान् यजाम। (हे) देवाः, ज्यायसः आ शंसं मा वृक्षि॥

The seer of this mantra is Śunahśepa, son of Ajīgarta; the metrical form is Trishṭup; and the deity invoked is Viśvedeva.

(Sāyaṇa)

(अग्निना प्रषितः शुनःशेपो विश्वान् देवान् अनया तुष्टाव।)

महान्तो गुणैरधिकाः। अर्भको गुणैर्न्यूनाः। युवानस्तरुणाः। आशिना वयसा व्याप्ता वृद्धाः। यथोक्त चतुर्विधदेहयुक्तेभ्यो देवेभ्यो नमोऽस्तु।

यदि शक्नवाम कथञ्चिद्धनादिसम्पत्त्या शक्ताश्चेत् तदानीम्। देवान् यजाम। हे देवाः। ज्यायसो ज्येष्ठस्य देवताविशेषस्य। आ सर्वतः प्रसृतम्। शंसं स्तोत्रम्। मा वृक्षि अहं विच्छिन्नं मा कार्षम्।

(Dinakara)

महान्तः गुणैरधिकाः अर्भकाः गुणरहिताः युवानः तरुणाः आशिनाः (अशू व्याप्तौ) वयसा व्याप्ताः वृद्धा इत्यर्थः। चतुर्विधदेहयुक्तेभ्यो देवेभ्यो नमोऽस्तु। यदि शक्नवाम सम्पत्त्या वयं शक्ताश्चेत्तदा देवान् यजमाहे। [हे देवाः] ज्यायसः उत्तमस्य शंसं स्तोत्रम् अहं मा वृक्षि विच्छिन्नं मा कार्षम् (ओव्रश्चू छेदने)॥१८॥

The verse offers adoration (namas) to the great ones (mahadbhyah), to the young ones (arbhakebhyah), to the youth (yuvabhyah), and to the elderly (āśinebhyah). And offerings are made to the gods to the best of ones ability. The seer assures the gods (devāh) that his devotion to them will never cease (śaṁsa mā vṛkshi).



(19)

ऋषिः हिरण्यस्तूप आङ्गिरसः।
छन्दः जगती।
देवता अग्निः॥

(संहितापाठः)

**त्वमग्ने प्रमतिस्त्वं पितासि नस्त्वं वयस्कृत् तव जामयो वयम्।
सं त्वा रायः शतिनः सं सहस्रिणः सुवीरं यन्ति
व्रतपामदाभ्य ॥१९॥ (१.३१.१०)**

(पदपाठः)

**त्वम्। अग्ने। प्रऽमतिः। त्वम्। पिता। असि। नः। त्वम्। वयःऽकृत्।
तव। जामयः। वयम्॥ सम्। त्वा। रायः। शतिनः। सम्। सहस्रिणः।
सुऽवीरम्। यन्ति। व्रतऽपाम्। अदाभ्य ॥१९॥**

(अन्वयः)

(हे) अग्ने, त्वं प्रमतिः त्वं नः पिता असि। त्वं वयस्कृत्। वयं तव जामयः। (हे) अदाभ्य, सुवीरं व्रतपां शतिनः रायः सं यन्ति। सहास्रिणः। (अपि) सं (यन्ति)

The seer of the mantra is Hiraṇyastūpa, son of Aṅgiras; the metrical form is Jagatī; and the deity invoked is Agni.

(Sāyaṇa)

हे अग्ने। त्वम्। प्रमतिः अस्मदनुग्रहरूप-प्रकृष्टमतियुक्तः। असि। तथा त्वं। नः अस्माकम्। पिता पालकः। असि। तथा त्वम्। वयस्कृत् आयुष्यप्रदः। असि। वयं अनुष्ठातारः। तव जामयो बन्धवः।

हे अदाभ्य केनाप्यहिंसनीय अग्ने। सुवीरं शोभनपुरुषयुक्तम्। व्रतपां कर्मणः पालकम्। त्वाम्। शतिनः शतसंख्यायुक्ताः। रायो धनानि। सं यन्ति सम्यक् प्राप्नुवन्ति। तथा सहस्रिणः सहस्रसंख्याकाः। रायः सं यन्ति॥

(Dinakara)

हे अग्ने त्वं प्रमतिः प्रकृष्टा मतिर्यस्य सः नः अस्माकं पिता पालकोऽसि। तथा वयस्कृत् आयुष्यप्रदोऽसि। वयं तव जामयः बन्धवः। [हे] अदाभ्य केनाप्यहिंसनीय शतिनः शतसंख्याकाः तथा सहस्रिणः सहस्रसंख्याकाः रायः धनानि सुवीरं शोभनपुरुषयुक्तं [व्रतपां त्वा सं यन्ति]। पालकत्वाद्युक्त्या धनं देहीत्यत्र तात्पर्यम्॥१९॥

The indefatigable and invincible (adābhya) Agni is proclaimed as favourably disposed (pramatih) towards his devotees. He is the protector (pitā) and promoter of life (vayaskṛt); and the devotees are his close kinsmen (jāmayah). He is of mighty valour (suvīra) and he defends the immaculate order of the universe and man (vrata-pā). His riches (rāyah) are hundred-fold (śatinah) and thousand-fold (sahasriṇah).



(20)

ऋषिः हिरण्यस्तूप आङ्गिरसः।
छन्दः जगती।
देवता अग्निः॥

(संहितापाठः)

त्वमग्ने उरुशंसाय वाघते स्पार्हं यद् रेक्णः परमं वनोषि तत्।
अध्रस्य चित् प्रमतिरुच्यसे पिता प्र पाकं शास्सि प्र दिशो
विदुष्टरः॥२०॥ (१,३१,१४)

(पदपाठः)

त्वम्। अग्ने। उरुऽशंसाय। वाघते। स्पार्हम्। यत्। रेक्णः। परमम्।
वनोषि। तत्॥ आध्रस्य। चित्। प्रऽमतिः। उच्यसे। पिता। प्र। पाकम्।
शास्सि। प्र। दिशः। विदुःऽतरः॥२०॥

(अन्वयः)

(हे) अग्ने, त्वं उरुशंसाय वाघते स्पार्हं परमं यद्रेक्णः तत् वनोषि। आध्रस्य चित् प्रमतिः पिता (इति) उच्यसे। विदुष्टरः पाकं प्रशास्सि। दिशः। प्र (शास्सि)॥

The seer of the mantra is Hiraṇyastūpa, son of Aṅgiras; the metrical form is Jagatī; and the deity invoked is Agni.

(Sāyaṇa)

हे अग्ने त्वं। उरुशंसाय बहुभिः स्तोतव्याय। वाघते ऋत्विजे। तदुपकारार्थम्। स्पार्हम् स्पृहणीयम्। परमं उत्तमम्। यद्रेक्णो धनमस्ति (Nirukta 3,9) तद्धनं। वनोषि अनुष्ठाता लभतामिति कामयसे॥

तथा त्वं। आध्रस्य चित् सर्वतो धारणीयस्य पोषणीयस्य दुर्बलस्य यजमानस्यापि। प्रमतिः प्रकृष्टबुद्धियुक्तः। पिता पालकः। इत्याभिज्ञैः उच्यसे। तथा। विदुष्टरः अतिशयेन अभिज्ञः त्वं। पाकं शिशुम्। तथाविधं यजमानं प्रशास्सि॥

(Dinakara)

हे अग्ने उरुशंसाय बहुभिः स्तोतव्याय। उरुः शंसो यस्येति वा। अस्मिन् पक्षे स्वरश्छान्दसः(?)। तादृशाय वाघते ऋत्विजे तदुपकारार्थं स्पार्हं स्पृहणीयं परमम् उत्तमं यद् रेक्णः धनमस्ति तद् धनं वनोषि अनुष्ठाता लभतामिति कामयसे। तथा त्वम् आध्रस्य चित् दुर्बलस्यापि यजमानस्य प्रमतिः प्रकृष्टा मतिर्यस्मात् तादृशः पिता पालक इत्युच्यसे। तथा विदुष्टरः अतिशयेन विद्वान् (अयस्मयादीनि पा० १.४.२०) इत्यनेन भत्वात्संप्रसारणे षत्वम्) त्वं पाकं शिशुं यजमानं प्रशास्सि प्रकर्षेणानुशिष्टं करोषि। तथा दिशः प्राच्यादिकाः विदुष्टरः प्रशास्सि। त्वदीयशासनाभावे अनुष्ठातॄणां विभ्रमः स्यात्। (देवा वै देवयजनमध्यवसाय दिशो न प्राजानन्निति श्रुतिः तै० स० ६.१.५.१.)॥२०॥

Agni is eulogized as the much-praised one (uru-śamsa). Whatever is the most desirable and excellent wealth (spārham, paramam reknah) for the devotee (vāghate) is secured lovingly for him by Agni (vanoshi tat). He is indeed the protector (pitā) for him who is utterly helpless and weak (ādhrasya). So do humans recognize him (uchyase). He is supremely wise (pramati). He instructs and guides the young aspirant (pākam śāsti; pākah paktavyo bhavati). His knowledge is unsurpassed (vidushṭarah).

(21)

ऋषिः हिरण्यस्तूप आङ्गिरसः।
छन्दः जगती।
देवता अग्निः॥

(संहितापाठः)

**त्वमग्ने प्रयतदक्षिणं नरं वर्मेव स्यूतं परि पासि विश्वतः।
स्वादुक्षद्मा यो वसतौ स्योनकृज् जीवयाजं यजते
सोपमा दिवः॥२१॥ (१.३१.१५)**

(पदपाठः)

**त्वम्। अग्ने। प्रयतऽदक्षिणम्। नरम्। वर्मऽइव। स्यूतम्। परि। पासि।
विश्वतः॥ स्वादुऽक्षद्मा। यः। वसतौ। स्योनऽकृत्। जीवऽयाजम्। यजते।
सः। उपऽमा। दिवः॥२१॥**

(अन्वयः)

(हे) अग्ने, त्वं प्रयतदक्षिणं नरं विश्वतः स्यूतं वर्मेव परिपासि। स्वादुक्षद्मा वसतौ। स्योनकृत् यः जीवयाजं यजते सः दिवः उपमा (भवति)॥

The seer of the mantra is Hiraṇyastūpa, son of Aṅgiras; the metrical form is Jagatī; and the deity invoked is Agni.

(Sāyaṇa)

हे अग्ने। त्वं। प्रयतदक्षिणं येन यजमानेन ऋत्विग्भ्यो दक्षिणा दत्ता तादृशम्। नरं पुरुषं यजमानम्। विश्वतः सर्वतः। परि पासि सम्यक् पालयसि। तत्र दृष्टान्तः। स्यूतं निश्छिद्रत्वेन सूचीभिः सम्यक् निष्पादितम्। वर्मेव यथा कवचं युद्धे पालयति तद्वत्॥

स्वादुक्षद्मा स्वाद्वन्नो। वसतौ। निवासभूते स्वगृहे। स्योनकृत् अतिथीनां सुखकारी यो यजमानः। जीवयाजं जीवयजनसहितं यज्ञम्। यद्वा जीवनिष्पाद्यं। यजते अनुतिष्ठति। स यजमानो। दिवः स्वर्गस्योपमा दृष्टान्तो भवति। यथा स्वर्गोऽनुष्ठातॄन् सुखयति तथा त्वमपि ऋत्विगादीन् इत्यर्थः॥

(Dinakara)

हे अग्ने त्वं प्रयतदक्षिणं पवित्रदक्षिणं नरं मनुष्यं विश्वतः सर्वतः परि पासि परिपालयसि। तत्र दृष्टान्तः। स्यूतं निश्छिद्रत्वेन सूचिभिः सम्यङ् निष्पादितं वर्मेव यथा कवचं युद्धे पालयतितद्वत् परिपासि। स्वादुक्षद्मा स्वादून् क्षादयतीति स्वादुक्षद्मा (क्षदतिरत्तिकर्मा अन्तर्भावितण्यर्थः) तथा वसतौ स्वगृहे स्योनकृत् अतिथीनां सुखकारी (स्योनमिति सुखनामेति यास्कः) एतादृशो [यः] यजमानः जीवयाजं जीवाः जीवन्त ऋत्विजः इज्यन्ते दक्षिणाभिः पूज्यन्ते यत्र तं यज्ञं यजते अनुतिष्ठति। सः यजमानः दिवः स्वर्गस्य उपमा दृष्टान्तः। यथा स्वर्गोऽनुष्ठातॄन् सुखयति तथा यजमान ऋत्विगादीनित्यर्थः। यजमानस्योपमानत्वेन स्वर्गादाधिक्ये तात्पर्यम्, तेनाग्नेरपि॥२१॥

Agni is hailed as the sure protector from all sides (viśvatah paripāsi) of the generous devotee (prayatadakshiṇam naram), even as the well-stitched armour (syūtam varma iva) protects the warrior on the battle-field. The man who entertains the guests with good food (svādukshadmā) in his own house (vasatau) and makes them happy (syonakṛt), is the one who performs sacrifice all his life (jīvayājam yajate), and he is indeed like the very heavens (divah upamā) (or like the wide sky which showers bountiful light and rains).

(22)

ऋषिः हिरण्यस्तूप आङ्गिरसः।
छन्दः त्रिष्टुप्।
देवता इन्द्रः॥

(संहितापाठः)

परा चिच्छीर्षा ववृजुस्त इन्द्रायज्वानो यज्वभिः स्पर्धमानाः।
प्र यद् दिवो हरिवः स्थातरुग्र निरव्रताँ अधमो रोदस्योः॥२२॥
(१.३३.५)

(पदपाठः)

परा। चित्। शीर्षा। ववृजुः। ते। इन्द्र। अयज्वानः। यज्वऽभिः।
स्पर्धमानाः॥ प्र। यत्। दिवः। हरिऽवः। स्थातः। उग्र। निः। अव्रतान्।
अधमः। रोदस्योः॥२२॥

(अन्वयः)

हरिवः स्थातः उग्र(हे) इन्द्र, यत् दिवः रोदस्योः अव्रतान् निः प्र अधमः (निष्प्रधमः) अयज्वानः यज्वभिः स्पर्धमानाः ते शीर्षा परा चित् ववृजुः॥

The seer of the mantra is Hiraṇyastūpa, son of Angiras; the metrical form is Trishṭup; and the deity invoked is Indra.

(Sāyaṇa)

हे इन्द्र, ते वृत्रानुचराः। शीर्षा स्वकीयानि शिरांसि। परा चित् पराङ्मुखान्येव कृत्वा। ववृजुः गतवन्तः। कीदृशास्ते? अयज्वानः स्वयं यागरहिताः। प्रत्युत। यज्वभिः यागानुष्ठातृभिः। सह स्पर्धमानाः।

हे हरिवो हरिनामकाश्वयुक्त। स्थातः स्थितियुक्त। युद्धे पलायनरहितउग्रशौर्ययुक्तेन्द्र। यद् यदा। दिवोऽन्तरिक्षात्। रोदस्योः द्यावापृथिव्योः सकाशात् च। अव्रतान् व्रतरहितान् वृत्रानुचरान्। विष्प्राधमो निःशेषेण धमनं कृतवानसि। तदानीं त्वदीयमुखवायुना नुन्नाः सन्तः। ववृजुरिति पूर्वत्रान्वयः॥

(Dinakara)

हे इन्द्र ते वृत्रानुचराः शीर्षा स्वशिरांसि परा चित् पराङ्मुखान्येव कृत्वा ववृजुः गतवन्तः। निमित्तं विशेषणेनाह। अयज्वानः [यज्वभिः स्पर्धमानाः] इति। हे हरिवः हरिनामकाश्वयुक्त स्थातः स्थितियुक्त उग्र शौर्ययुक्तेन्द्र त्वं [यत्] यस्मात् अव्रतान् व्रतरहितान् वृत्रानुचरान् दिवः अन्तरिक्षात् [रोदस्योः] द्यावापृथिव्योश्च सकाशात् निः प्र अधमः (ध्मा शब्दाग्निसंयोगयोः) धमनं कृतवानसि। निष्कासितवानिति भावः॥२२॥

Indra is being praised here for making the hosts of men devoid of devotion (ayajvānah) turn their heads (parāchit śīrsha) and run away (vavṛjuh); for they were fighting with men of devotion (yajvabhih spardhamānāh). Indra, the lord of horses (harivah), is mighty and ferocious (ugra). By a breath-blast of his, the irreligious and the unscrupulous (avratān) are made to disappear from the earth and the sky (rodasyoh)' (nih pra adhamah).

(23)

ऋषिः हिरण्यस्तूप आङ्गिरसः।
छन्दः जगती।
देवता सविता॥

(संहितापाठः)

आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥२३॥ (१.३५.२)

(पदपाठः)

आ। कृष्णेन। रजसा। वर्तमानः। निऽवेशयन्। अमृतम्। मर्त्यम्। च॥
हिरण्ययेन। सविता। रथेन। आ। देवः। याति। भुवनानि। पश्यन्॥२३॥

(अन्वयः)

देवः सविता कृष्णेन रजसा आ वर्तमानः अमृतं मर्त्यं निवेशयन् हिरण्ययेन रथेन भुवनानि पश्यन् आ याति॥

The seer of the mantra is Hiraṇyastūpa, son of Aṅgiras; the metrical form is Jagatī; and the deity invoked is Savitṛ.

(Sāyaṇa)

सविता सूर्यः। कृष्णेन रजसा कृष्णवर्णेन लोकेन। (कृष्णं कृष्यतेर्निकृष्टो वर्णः इति यास्कः)। लोका रजांस्युच्यन्ते। अन्तरिक्षलोको हि सूर्यगमनात्पुरा कृष्णवर्णो भवति। तेनान्तरिक्षमार्गेण। आ

वर्तमानः पुनः पुनरागच्छन्। अमृतं देवम्। मर्त्यं मनुष्यं च। निवेशयन् स्वस्वस्थानेऽवस्थापयन्। यद्वा। अमृतं मरणरहितः प्राणं मरणसहितं शरीरं च निवेशयन्।

यथोक्तगुणोपेतः। सविता देवो। भुवनानि सर्वान् लोकान्। पश्यन् अवेक्षमाणः। प्रकाशयन् इत्यर्थः। हिरण्ययेन सुवर्णनिर्मितेन। रथेन। आयति अस्मत्समीपं आगच्छति॥

(Dinakara)

सविता सूर्यः कृष्णेन कृष्णवर्णेन रजसा लोकेन अन्तरिक्षमार्गेणेत्यर्थः आ वर्तमानः पुनः पुनरागच्छन् अमृतं देवं मर्त्यं मनुष्यं च निवेशयन् स्वस्वस्थाने स्थापयन् भुवनानि लोकान् पश्यन् अवेक्षमाणः हिरण्ययेन हिरण्मयेन रथेन आ याति अस्मत्समीपमागच्छति। देव इत्यर्थः॥२२॥

The luminous one (deva), Savitṛ, is invoked here. He traverses in a golden chariot (hiraṇyayena rathena) through the dark space (kṛshṇena rajasā), arousing to activity both the mortals (viz. the body) and the immortals (viz. the spirit). He arrives (ā yāti), beholding (paśyan) all the worlds (bhuvanāni).



(24)

ऋषिः कण्वो घौरः।
छन्दः बृहती।
देवता मरुतः॥

(संहितापाठः)

प्र वेपयन्ति पर्वतान् वि विञ्चन्ति वनस्पतीन्।
प्रो आरत मरुतो दुर्मदाइव देवासः सर्वया विशा॥२४॥
(१.३९.५)

(पदपाठः)

प्र। वेपयन्ति। पर्वतान्। वि। विञ्चन्ति। वनस्पतीन्॥
प्रो इति। आरत। मरुतः। दुर्मदाःऽइव। देवासः। सर्वया। विशा॥२४॥

(अन्वयः)

(मारुतः) पर्वतान् प्रवेपयन्ति। वनस्पतीन् वि विञ्चन्ति। देवासः मरुतः, सर्वया विशा दुर्मदा इव प्रो आरत॥

The seer of this mantra is Kāṇva, son of Ghora; the metrical form is Bṛhatī; and the deity addressed is Marutas.

(Sāyaṇa)

पर्वतान् मेरु हिमवदादीन् प्रवेपयन्ति। मरुतः प्रकर्षेण कम्पयन्ति। वनस्पतीन्। वटांश्चाश्वत्थादींश्च। विञ्चन्ति परस्पर वियुक्तान् कुर्वन्ति।

हे मरुतो देवासो। देवाम्। सर्वया विशा प्रजया सहिताः। यूयम्। प्रो आरत प्रकर्षेणैव सर्वतो गच्छत। तत्र दृष्टान्तः। दुर्मदा इव। यथा मदोन्मत्ताः स्वेच्छया सर्वतः क्रीडन्ति तद्वत्॥

(Dinakara)

हे देवासः देवाः वायवः मेरुहिमवदादीन् पर्वतान् प्र वेपयन्ति कम्पयन्ति। तथा वनस्पतीन् वटादीन् वि विञ्चन्ति (विचिर् पृथग्भावे) उत्पाटयन्ति। हे मरुतः यूयं सर्वया विशा प्रजया सहिताः सन्तः प्रो आरत (ऋ गतौ) सर्वतो गच्छत। दुर्मदा इव यथा मदोन्मत्ताः सर्वत्र क्रीडन्ति तद्वत् ॥२४॥

The divine breezes (maruto devāsah) are addressed here. They shake (vepayanti) the mountains (parvatān) well (pra) as they waft across. They throw apart (vi viñchanti) the trees and plants (vanaspatīn). They are like the inebriated ones (durmadā iva), they move freely in all directions (pro ārata), taking with them all beings (sarvayā viśā).

(25)

ऋषिः कण्वो घौरः।
छन्दः बृहती।
देवता ब्रह्मणस्पतिः॥

(संहितापाठः)

उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे।
उप प्र यन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा॥२५॥
(१.४०.१)

(पदपाठः)

उत्। तिष्ठ। ब्रह्मणः। पते। देवऽयन्तः। त्वा। ईमहे॥
उप। प्र। यन्तु। मरुतः। सुदानव। इन्द्र। प्राशूः। भव। सचा॥२५॥

(अन्वयः)

(हे) ब्रह्मणस्पते, उत्तिष्ठ। देवयन्तः (वयं) त्वा ईमहे। सुदानवः मरुतः उप प्र यन्तु। इन्द्र, सचा प्राशूः भवः।

The seer of this mantra is Kāṇva, son of Ghora; the metrical form is Bṛhatī; and the deity invoked is Brahmaṇaspati.

(Sāyaṇa)

हे ब्रह्मणस्पते एतन्नामक देव। उत्तिष्ठ अस्मदनुग्रहाय त्वदीयनिवासादुत्थानं कुरु। देवयन्तः देवान् कामयमानाः वयम्। त्वा त्वां। ईमहे याचामहे।

सुदानवः शोभनदानयुक्ताः। मरुतः। उप प्र प्राशूः सोमस्य प्राशको भव। यद्वा। वृत्रस्य हिंसको भव॥

(Dinakara)

(इयं प्रवर्ग्येऽप्यभिष्टवे विनियुक्ता।) हे ब्रह्मणस्पते एतन्नामक देव अस्मदनुग्रहाय स्वनिवासात् उत्तिष्ठ। देवयन्तः देवान् कामयमानाः वयं त्वा ईमहे याचामहे। सुदानवः शोभनदानयुक्ताः मरुतः उप प्र यन्तु समीपे प्रकर्षेण गच्छन्तु। हे इन्द्र त्वं सचा ब्रह्मणस्पतिना सह प्राशूः सोमस्य प्राशको भव। यद्वा वृत्रस्य हिंसको भव॥२५॥

Brahmaṇaspati is the deity addressed here. He is implored to arise and arrive in our midst (utthishṭha), for we are earnestly longing for him (devayantah tvā īmahe). Besides, may the divine winds (marutah) (viz. the vital currents) also come close to us (upa pra yantu), for they are generous and bountiful (sudānavah). Alongside Brahmaṇaspati, Indra is also invited to come and drive away the demon of darkness (prāśūh, from Śṛī himsāyām).



(26)

ऋषिः काण्वो घौरः।
छन्दः गायत्री।
देवता वरुणमित्रार्यमणः॥

(संहितापाठः)

मा वो घ्नन्तं मा शपन्तं प्रति वोचे देवयन्तम्।
सुम्नैरिद् व आ विवासे॥२६॥ (१.४१.८)

(पदपाठः)

मा। वः। घ्नन्तम्। मा। शपन्तम्। प्रति। वोचे। देवऽयन्तम्॥ सुम्नैः।
इत्। वः। आ। विवासे॥२६॥

(अन्वयः)

देवयन्तं घ्नन्तं मा प्रति वोचे। शपन्तं मा (प्रति वोचे)। सुम्नैरित् वः आ विवासे॥

The seer of this mantra is Kāṇva, son of Ghora; the metrical form is Gāyatri; and the deities addressed are Varuṇa, Mitra and Aryamā (all solar deities).

(Sāyaṇa)

हे मित्रादयो देवाः। देवयन्तं देवान् कामयमानं यजमानम्। यः शत्रुमर्हन्ति घ्नन्तं तादृशं शत्रुम्। वो युष्मभ्यम्। मा प्रति वोचे दुरुक्तकथनभीत्याहं न कथयामि। तथा यजमानं यः शत्रुः शपति तमपि शपन्तं प्रति मा वोचे। भवद्भिरेव विचार्य शिक्षणीय इत्यर्थः।

अहं तु सुम्नैः इत् धनैरेव। वो युष्मान्। आ विवासे सर्वतः परिचरामि॥

(Dinakara)

हे मित्रादयो देवाः देवयन्त देवान् कामयमानं यजमानं यः शत्रुः हन्ति तादृशं घ्नन्तं शत्रुं वः युष्मभ्यं मा प्रति वोचे दुरुक्तकथनभीत्या अहं न कथयामि। तथा [शपन्तं] यजमानं यः शपति तमपि न प्रति वोचे। भवद्भिरेव शिक्षणीयौ तावित्यर्थः। अहं सुम्नैः इत् धनैरेव हेतुभिः वः युष्मान् आ विवासे सर्वतः परिचरामि ॥२६॥

The deities Varuṇa, Mitra and Aryamā are addressed here. They are assured by the seer that he would devote himself to them with joy (sumnaih vivāse, from 'mnā abhyāse', *Nirukta* 3,13 includes the word 'sumna' under sukha-nāma; and 'vivasatih paricharaṇa-karmā'). The devotee refuses to complain (mā prati voche) against the injurers (ghnantam, from 'han') and revilers (śapantam, from 'śap ākróśe') (viz. let them do what they like; I am not affected).



(27)

ऋषिः कण्वो घौरः।
छन्दः गायत्री।
देवता वरुणमित्रार्यमणः।।

(संहितापाठः)

चतुरश्चिद् ददमानाद् बिभीयादा निधातोः।
न दुरुक्ताय स्पृहयेत् ।।२७।। (१.४१.९)

(पदपाठः)

चतुरः। चित्। ददमानात्। बिभीयात्। आ। निऽधातोः।।
न। दुःऽउक्ताय। स्पृहयेत्।।२७।।

(अन्वयः)

दुरुक्ताय न स्पृहयेत्। चतुरः ददमानात् आ निधातोः चित् बिभीयात्।।

The seer of this mantra is Kāṇva, son of Ghora; the metrical form is Gāyatri; and the deities are Varuṇa, Mitra and Aryamā.

(Sāyaṇa)

घ्नन्तं शपन्तं च मा प्रतिवोच इति यदुक्तं तत्रोपपत्तिरुच्यते। दुरुक्ताय न स्पृहयेत् दुष्टं वाक्यं न कामयेत्। किन्तु दुरुक्ताद् बिभीयात्।

तत्रावशिष्टो मन्त्रभागः सर्वोपि दृष्टान्तः। चिदित्युपमार्थे वर्तते। अक्षद्यूतं कुर्वतोरुभययोर्मध्ये यः पुमान्। चतुरः चतुः संख्याकान् कपर्दकान्। ददमानात् ददतो हस्ते धारयतः पुरुषात्।

आ निधातोः कपर्दक निपातपर्यन्तं बिभीयात्। अस्य जये भविष्यति। न भविष्यतीत्यन्यो भीतिं प्राप्नुयात्। अत्र यथा भयं तथा दुरुक्ताद् भेतव्यमिति धर्मरहस्यम्।

(Dinakara)

दुरुक्ताय न स्पृहयेत् दुष्टं वक्तुमिच्छामपि न कुर्यात्। किन्तु [दुरुक्ताद्] बिभीयात्। अवशिष्टो दृष्टान्तः। चिदित्युपमार्थे। यथा कश्चित् पुरुषः चतुरः चतुःसंख्याकान् कपर्दकान् ददमानात् हस्ते धारयतः प्रक्षिपतो वा कितवात् आ निधातोः कपर्दकनिपातपर्यन्तं बिभीयात्, अस्य जयो भविष्यतीति, तद्वत्। दुरुक्ताद् भेतव्यमित्युपदेशः। (अत्र निरुक्तं – "चतुरोऽक्षान् धारयत इति तद्यथा कितवाद्बिभीयादेवमेव दुरुक्तात् बिभीयान्न दुरुक्ताय स्पृहयेदिति" (३.१६) ददमानादित्यत्र दद दाने इति धातुर्धारणार्थः) ॥२७॥

Although the deities Varuṇa, Mitra and Aryamā are not mentioned, addressed or invoked in the mantra itself, the mantra is taken as a continuation of the previous mantra, where the seer refuses to complain against the injurers and revilers. Here the seer tells us that one should not desire (na spṛhayet) to speak ill of anyone (duruktāya). An illustration is given (chit). In a game of dice when one holds in his hands the four-dice (chaturah; dadamānāt, from 'dada dāne', dhāraṇārthah), the opponent is in the grip of fear until the dice are thrown down (bibhīyād nidhātoh).

The fear is that the dice thrown down may be unfavourable to the opponent. The illustration of the game of dice is suggested by Yāska (*Nirukta*, 3,16).

(28)

ऋषिः प्रस्कण्वः काण्वः।
छन्दः सतो बृहती।
देवता उषाः ॥

(संहितापाठः)

उषो ये ते प्र यामेषु युञ्जते मनो दानाय सूरयः।
अत्राह तत् कण्व एषां कण्वतमो नाम गृणाति नृणाम् ॥२८॥
(१.४८.४)

(पदपाठः)

उषः। ये। ते। प्र। यामेषु। युञ्जते। मनः। दानाय। सूरयः॥
अत्र। अह। तत्। कण्वः। एषाम्। कण्वऽतमः। नाम। गृणाति।
नृणाम् ॥२८॥

(अन्वयः)

उषः, ते यामेषु ये सूरयः दानाय मनः प्रयुञ्जते एषां नृणां तत् नाम कण्वतमः कण्वः अत्राह गृणाति ॥

The seer of this mantra is Praskaṇva, son of Kaṇva; the metrical form is Sato-bṛhatī; and deity addressed is Ushas (Dawn)

(Sāyaṇa)

हे उषः। ते तव। यामेषु गमनेषु सत्सु। ये सूरयो विद्वां दानाभिज्ञाः। दानाय धनादि दानार्थम्। मनः स्वकीयम्। प्र युञ्जते प्रेरयन्ति। दानशीला उदाराः। प्रभवः प्रातः काले। दातुमिच्छन्तीत्यर्थः।

एषां दातुमिच्छतां नृणाम्। तन्नाम दानविषये लोकप्रसिद्धं नाम। कण्वतमोऽतिशयेन मेधावी। कण्वो महर्षिः। अत्राह अत्रैव उषःकाले। गृणाति उच्चारयति। यो दातुमिच्छति यश्च नामग्रहणेन दातारं प्रशंसति तावुभौ अपि उषःकाल एव तथा कुरुत इत्युषसः स्तुतिः॥

(Dinakara)

हे उषः प्रातःकाल दानाभिज्ञाः सूरयो दानपण्डिताः ते तव यामेषु गमनेषु मनः स्वकीयं प्रयुञ्जते दानार्थं प्रेरयन्ति। एषां नृणां दातॄणां [तत्] दातृत्वेन प्रसिद्धं नाम कण्वतमः अतिशयेन मेधावी कण्वो महर्षिर्नाम अत्राह अत्रैव उषःकाले गृणात्युच्चारयति। यो नित्यं प्रातः दातुमिच्छति तस्य नाम लोका अपि प्रातर्गृणन्तीति भावः। प्रातःकालस्येयं स्तुतिः॥२८॥

The Dawn (Ushas) is eulogized here. It is when it dawns (te yāmeshu) that the wise ones (sūrayah) set their minds (mano yuñjate) on the giving of gifts (dānāya). It is only then (atrāha, viz., at dawn) that the sage Kaṇva who is the wisest of all (kaṇvah kaṇvatamah) articulates (gṛṇāti) the praise of those who intend to give away gifts (nṛṇām nāma).

(29)

ऋषिः प्रस्कण्वः काण्वः।
छन्दः अनुष्टुप्।
देवता सूर्यः॥

(संहितापाठः)

उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवम्।
हृद्रोगं मम सूर्य हरिमाणं च नाशय ॥२९॥ (१.५०.११)

(पदपाठः)

उत्ऽयन्। अद्य। मित्रऽमहः। आऽरोहन्। उत्ऽतराम्। दिवम्॥
हृत्ऽरोगम्। मम। सूर्य। हरिमाणम्। च। नाशय॥२९॥

(अन्वयः)

(हे) मित्रमहं सूर्य, अद्य उद्यन् उत्तरां दिवं आरोहन् मम हृद्रोगं हरिमाणं च नाशय॥

The seer of this mantra is Praskaṇva, son of Kaṇva; the metrical form is Anushṭup; and deity invoked is Sūrya.

(Sāyaṇa)

हे सूर्य सर्वस्य प्रेरक। मित्रमहः सर्वेषामनुकूल दीप्तियुक्त। अद्य अस्मिन् काले। उद्यन् उदयं गच्छन्। उत्तरां उद्गततराम्। दिवं अन्तरिक्षम्। आरोहन् आभिमुख्येन प्राप्नुवन्। यद्वा। दिवमन्तरिक्षमुत्तरामारोहन् उत्कर्षेण प्राप्नुवन्।

एवंविधस्त्वम्। मम हृद्रोगं हृदयगतमान्तरं रोगम्। हरिमाणं शरीरगतकान्तिहरणशीलं बाह्यं रोगम्। तदुभयमपि नाशय। मां स्तोतारमुभयविधाद्रोगान्मोचयेत्यर्थः।

This and the next two mantras (tṛcha) are recited for curing diseases (rogaśāntyarthah). This mantra is reputed to eliminate sins (pāpa-praṇāśanah).

(Dinakara)

मित्रं च तन्महश्च मित्रमहः। मित्रमनुकूलं महस्तेजो दीप्तियुक्त सूर्य अद्यास्मिन् काले उद्यन् उदयं गच्छन् उत्तरां दिवम् अन्तरिक्षम् आरोहन् एवंविधस्त्वं मम हृद्रोगम् आन्तरव्याधिमाधिं वा हरिमाणं शरीरगतं हरिद्वर्णं च नाशय॥२९॥

Sūrya is the source of all things and inspires all activities. His light is supremely beneficial to all beings (mitramahah). He rises now (adya udayan) and ascends (ārohan) the highest sky (uttarām divam). So doing, he drives away (nāśaya) the troubles of the heart (hṛdrogam) and the ailments of the body (harimāṇam).

(30)

ऋषिः प्रस्कण्वः काण्वः।
छन्दः अनुष्टुप्।
देवता सूर्यः॥

(संहितापाठः)

शुकेषु मे हरिमाणं रोपणाकासु दध्मसि।
अथो हारिद्रवेषु मे हरिमाणं नि दध्मसि॥३०॥ (१.५०.१२)

(पदपाठः)

शुकेषु। मे। हरिमाणम्। रोपणाकासु। दध्मसि॥
अथो इति। हारिद्रवेषु। मे। हरिमाणम्। नि। दध्मसि॥३०॥

(अन्वयः)

मे हरिमाणं शुकेषु रोपणाकासु दध्मासि। अथो हारिद्रवेषु मे हरिमाणं निदध्मसि॥

The seer of this mantra is Praskaṇva, son of Kaṇva; the metrical form is Anushṭup; and deity invoked is Sūrya.

(Sāyaṇa)

मे मदीयम्। हरिमाणं शरीरगतं शरीरगतं हरिद्वर्णस्य भावम्। शुकेषु तादृशं वर्णं कामयमानेषु पक्षिषु। तथा रोपणकासु शारिकासु पक्षिविशेषेषु। दध्मसि स्थापयामः। अथो अपि। च। हारिद्रवेषु हरितालद्रुमेषु तादृग्वर्णवत्सु। मे मदीयम्। हरिमाणं नि दध्मसि निदधीमाहि। स च हरिमा तत्रैव सुखेनास्तां, अस्मान्मा व्याधिष्ट इत्यर्थः॥

(Dinakara)

मे हरिमाणं शुकेषु पक्षिविशेषेषु रोपणाकासु शारिकासु च दध्मसि स्थापयामः। अथो अपि च हारिद्रवेषु हरितालद्रुमेषु तादृग्वर्णेषु मे हरिमाणं नि दध्मसि निदधीमहि। स हरिमा तत्रैवास्तां अस्मान् मा बाधिष्टेत्यर्थः ॥३०॥

This is probably a magical spell. The bodily ailment (harimāṇam, from 'hriṅg haraṇe', Uṇādi-sūtra 4,588 suffix 'imanin') is sought to be transferred (dadhmasi) to the hem of ones garment (śukeshu, from śubha dīptau, Hemachandra, 'vastrāñchalam') or to the healing application (ropaṇākāsu, from 'rupa vimohe'); and (atho), the ailment may be transplanted in a tree (hāridraveshu). The mantra is rather emigmatic.

(31)

ऋषिः प्रस्कण्वः काण्वः।
छन्दः अनुष्टुप्।
देवता सूर्यः॥

(संहितापाठः)

उदगादयमादित्यो विश्वेन सहसा सह।
द्विषन्तं मह्यं रन्धयन् मो अहं द्विषते रधम्॥३१॥ (१.५०.१३)

(पदपाठः)

उत्। अगात्। अयम्। आदित्यः। विश्वेन। सहसा। सह।
द्विषन्तम्। मह्यम्। रन्धयन्। मो इति। अहम्। द्विषते। रधम्॥३१॥

(अन्वयः)

अयं आदित्यः विश्वेन सहसा सह मह्यं द्विषन्तं रन्धयन् उदगात्। अहं द्विषते मो रधम्॥

The seer of this mantra is Praskaṇva, son of Kaṇva; the metrical form is Anushṭup; and deity invoked is Sūrya.

(Sāyaṇa)

अयं पुरोवर्ति। आदित्यो अदितेः पुत्रः सूर्यः। विश्वेन सहसा सर्वेण बलेन सह। उदगात् उदयं प्राप्तवान्।

किं कुर्वन्? मह्यं द्विषन्तं रन्धयन्। ममोपद्रवकारिणं हिंसन्। अपि चाहं द्विषते अनिष्टकारिणे रोगाय। मो रधम् नैव हिंसां करोमि। सूर्य एव अस्मदनिष्टकारिणं रोगं विनाशयतु इत्यर्थः ॥

(Dinakara)

अयम् आदित्यः विश्वेन सहसा सर्वेण बलेन सह उदगात् उदयं प्राप्तवान् मह्यं द्विषन्तं रोगं वैरिणं वा रन्धयन् हिंसन् (रध हिंसायाम्) अहं द्विषते रोगाय मो रधं नैव हिंसां करोमि। सूर्य एव नाशयत्वित्यर्थः ॥३१ ॥

The Āditya (viz. Sūrya) who is in front of me (ayam) has arisen on the horizon (udagāt) with all his might (viśvena sahasā saha, cf. 'sahas' in 'bala-nāma'), smothering (randhayan) the enemy (viz., the disease, dvishantam) for me (mahyam). I, however, attack it not, although it is enemy to me (aham dvishate mo radham).

(32)

ऋषिः पाराशरः शाक्त्यः।
छन्दः त्रिष्टुप्।
देवता अग्निः॥

(संहितापाठः)

मा नो अग्ने सख्या पित्र्याणि प्र मर्षिष्ठा अभि विदुष्कविः सन्।
नभो न रूपं जरिमा मिनाति पुरा तस्या
अभिशस्तेरधीहि॥३२॥ (१.७१.१०)

(पदपाठः)

मा। नः। अग्ने। सख्या। पित्र्याणि। प्र। मर्षिष्ठाः। अभि। विदुः। कविः।
सन्॥ नभः। न। रूपम्। जरिमा। मिनाति। पुरा। तस्याः। अभिऽशस्तेः।
अधि। इहि॥३२॥

(अन्वयः)

(हे) अग्ने, पित्र्याणि सख्या कविः सन् अभि विदुः मा प्र मर्षिष्ठाः। जरिमा रूपं नभो न मिनाति। अभिशस्तेः तस्याः पुरा अधीहि॥

The seer of the mantra is Pārāśara, son of Śakti; the metrical form is Trishṭup; and deity invoked is Agni.

(Sāyaṇa)

हे अग्ने। पित्र्याणि पितरं वसिष्ठमुपक्रम्य आगतानि। सख्या सखित्वानि। मा प्र मर्षिष्ठाः मा विनाशय। (अत्र मृष्यतेः उपसर्गवशात् अर्थान्तरे वृत्तिः।) यतस्त्वं कविः क्रान्तिदर्शी सन्। अभि आभिमुख्येन। विदुः सर्वं विद्वान्॥

नभो न रूपम्। यथान्तरिक्षं रूपवन्तः सूर्यरश्मयः आच्छादयन्ति तद्वदाच्छादयति। जरिमा जरा। मिनाति मां सूक्तद्रष्टारं हिनस्ति। अभिशस्तेः हिंसाहेतोः। तस्या जरायाः। पुराधीहि मां बुद्ध्यस्व। स यथा न प्राप्नोति तथा कुरु। अमृतत्वं प्रयच्छेति यावत् ॥

(Dinakara)

हे अग्ने पित्र्याणि पितरमुपक्रम्यागतानि सख्या सखित्वानि मा प्र मर्षिष्ठाः मा विनाशय। यतस्त्वं कविः [सन्] अभि विदुः सर्वं विद्वान्। जरिमा (जृष् वयोहानौ) जरा मिनाति (मिन हिंसायाम्) आच्छादयतीत्यर्थः। [नभो न] न शब्द इवार्थे। रूपं रूपवन्तः। [यथा] सूर्यरश्मयोऽन्तरिक्षमाच्छादयन्ति तद्वदित्यर्थः। अभिशस्तेः हिंसाहेतोः तस्या जरायाः पुरा अधीहि मां बुध्यस्व। अमृतत्वं प्रयच्छेति भावः॥३२॥

Agni, who is all-knowing (kavih san, abhi viduh), is implored to preserve and not cut asunder (mā pra marshishṭhāh) the friendly feelings (sakhyā, 'sakhyur bhāvah) that have come down from the ancestors (pitrayāṇi, 'pitṛbhya āgatāni). The seer is concerned that he is being overpowered (mināti) by old age (jarimā). He conjures up the vision of the light spreading all over the sky (nabho na rūpam, the expression 'na' having the sense of the 'like'). Old age is troublesome (abhiśasteh); Agni is invoked to cause wakefulness (adhīhi, viz., enlightenment) in the seer before the onset of bodily decay and impairment.

(33)

ऋषिः पाराशरः शाक्त्यः।
छन्दः त्रिष्टुप्।
देवता अग्निः॥

(संहितापाठः)

देवो न यः पृथिवीं विश्वधाया उपक्षेति हितमित्रो न राजा।
पुरःसदः शर्मसदो न वीरा अनवद्या पतिजुष्टेव नारी॥३३॥
(१.७३.३)

(पदपाठः)

देवः। न। यः। पृथिवीम्। विश्वऽधायाः। उपऽक्षेति। हितऽमित्रः। न। राजा॥ पुरःऽसदः। शर्मऽसदः। न। वीराः। अनवद्या। पतिजुष्टाऽइव। नारी॥३३॥

(अन्वयः)

देवो न (इव) यः (अग्नि) विश्वधायाः हितमित्रः राजा न (इव) पृथिवीं उपक्षेति। पुरः सदः शर्मसदः वीरा न (इव), अनवद्या पतिजुष्टा नारीव॥

The seer of this mantra is Pārāśara, son of Śakti; the metrical form is Trishṭup; and deity invoked is Agni.

(Sāyaṇa)

देवो न द्योतमानः सूर्य इव। यः अग्निः। विश्वधायाः सर्वस्य जगतो धर्ता। (यथा सूर्यो वृष्ट्यादि प्रदानेन सर्वं जगद् धत्ते, एवमग्निः अपि यज्ञादिसाधनेन कृत्स्नस्य जगतो धारयिता। सोऽग्निः। पृथिवीं पुथिव्याम्। उपेक्षति सर्वेषां प्रियः सन् यज्ञगृहादौ निवसति। तत्र दृष्टान्तः। हितमित्रो न राजा हितान्यनुकूलानि मित्राणि यस्य तादृशो राजा यथा सुखेन निवसति तद्वत्। यथा सर्वजनमित्रो राजा एवमग्निरपि सर्वजनमित्र इत्यर्थः। न ह्यग्निं कश्चन द्विष्टे।

यस्य अग्नेः। पुरः सदः पुरस्तात् सीदन्त उपविशन्तः पुरुषाः। शर्मसदो न वीराः पितृगृहे वर्तमानाः पुत्रा इव वर्तन्ते। पिता पुत्रानिवाग्निः स्वस्य परिचारकान् रक्षतीति भावः। सोऽयं अग्निः अतिशयेन शुद्धः कर्मयोग्यो भवति। तत्र दृष्टान्तः। अनवद्या अनिन्दिता। पतिजुष्टेव नारी स्वपतिना सेविता स्वीकृता योषिदिव। सर्वकर्मयोग्या भवति तथा॥

(Dinakara)

यः देवः राजा विश्वधायाः विश्वस्य जगतो धर्ता हितमित्रः अनुकूलमित्रः सन् पृथिवीं न [उपक्षेति] पालयति स राजा न। तस्य पुरः सीदन्त प्रविशन्तः पुरः सदः वीराः शर्मसदः सुखदातारो न। अनवद्या अनिन्दिता पतिजुष्टा स्वपतिसेविता नारी योषित् यथा मनसः सुखं प्रयच्छति तथा वीराः मनसो न सुखदाः। किन्तु बाह्यमेवानुकूल्यं तेषामिति भावः। मत्कल्पितं व्याख्यानमेतत्॥३३॥

This is a eulogy of Agni. Like the sun (devo na) supporting the universe of beings, Agni upholds all that is on earth (pṛthivīm viśvadhāyā). Like a ruler who is beloved of the people (hitamitro rājā na), Agni abides on earth, loved by all (upaksheti). Those who settle down in front of Agni (purah-sadah) with joy in their hearts (śarma-sadah), as valiant ones (vīrā na), are accepted and protected by Agni, even as the blemishless wife (anavadyā nārī) is received and protected by her husband (patijushṭā iva).

(34)

ऋषिः पाराशरः शाक्त्यः।
छन्दः त्रिष्टुप्।
देवता अग्निः॥

(संहितापाठः)

यान् राये मर्तान्त्सुषूदो अग्ने ते स्याम मघवानो वयं च।
छायेव विश्वं भुवनं सिसक्ष्यापप्रिवान् रोदसी
अन्तरिक्षम्॥३४॥ (१.७३.८)

(पदपाठः)

यान्। राये। मर्तान्। सुसूदः। अग्ने। ते। स्याम। मघऽवानः। वयम्। च॥
छायाऽइव। विश्वम्। भुवनम्। सिसक्षि। आपप्रिऽवान्। रोदसी इति।
अन्तरिक्षम्॥३४॥

(अन्वयः)

यान् मर्तान् राये सुषूदः ते वयं च मघवानः स्याम। रोदसी अन्तरिक्षं च आपप्रिवान् (त्वं) छायेव विश्वं भुवनं सिसक्षि॥

The seer of the hymn is Pārāśara, son of Śakti; the metrical form is Trishṭup; and the deity invoked is Agni.

(Sāyaṇa)

यान् मर्तान् मनुष्यान् अस्मान्। राये धनाय। सुषूदः अग्निहोत्रादि कर्मसु प्रेरयसि। ते तादृशा वयं च। मघवानो धनिनः स्याम। भवेम।

रोदसी द्यावापृथिव्यौ। अन्तरिक्षं च। आपप्रिवान् स्वतेजसा वृष्ट्युदकेन वा पूरितवान्। त्वं च। विश्वं भुवनं सर्वं जगत्। सिसक्षि सेवसे। अनुगृह्य सर्वं रक्षसीत्यर्थः। तत्र दृष्टान्तः। छायेव। यथा छत्रादेश्छायातपादिजनितं क्लेशं निवार्य रक्षति तद्वत्॥

(Dinakara)

हे अग्ने त्वं यान् मर्तान् मनुष्यान् अस्मानन्यान् वा राये धनाय सुषूदः (षूद प्रेरणे लेटि अडागमः) यज्ञादिषु प्रेरयसि [ते] वयं च त्वत्प्रसादात् मघवानः धनिनः स्याम। ये कर्म कुर्वन्ति ते धनिनो भवन्तु। वयं तु कर्म कर्तुमशक्ता अपि धनिनः स्याम। रोदसी व्द्यावपृथिव्यौ च अन्तरिक्षं च आपप्रिवान् (प्रा पूरणे) स्वतेजसा वृष्ट्युदकेन धनेन वा आपूरितवान् त्वं विश्वं भुवनं सर्वं जगत् सिसक्षि (षच समवाये) रक्षसीत्यर्थः, छायेव, यथा छत्रादेश्छाया आतपक्लेशं निवार्य रक्षति तद्वत्॥३४॥

Agni is implored here for making the seer full of wealth (viz. knowledge, maghavānah), as he it is that inspires and prompts (sushūdah) the human beings for the sake of wealth (rāye, viz., knowledge). Agni fills (āpaprivān) the earth and the sky (rodasī), as well as the midregion (antariksham) and protects (sisakshi) the entire universe (viśvam bhuvanam), even as shade (chhāyeva) comforts us.

(35)

ऋषिः गोतमो राहूगणः।
छन्दः पंक्तिः।
देवता इन्द्रः॥

(संहितापाठः)

इन्द्र तुभ्यमिदद्रिवोऽनुत्तं वज्रिन् वीर्यम्।
यद्ध त्यं मायिनं मृगं तमु त्वं माययावधीरर्चन्ननु
स्वराज्यम्॥३५॥ (१.८०.७)

(पदपाठः)

इन्द्र। तुभ्यम्। इत्। अद्रिऽवः। अनुत्तम्। वज्रिन्। वीर्यम्॥
यत्। ह। त्यम्। मायिनम्। मृगम्। तम्। ऊम् इति। त्वम्। मायया।
अवधीः। अर्चन्। अनु। स्वऽराज्यम्॥३५॥

(अन्वयः)

(हे) अद्रिवः वज्रिन् इन्द्र, तुभ्यमित् वीर्यं अनुत्तम्। यत् मायिनं त्यं मृगं तं त्वं मायया स्वराज्यं आनु अर्चन् अवधीः ह॥

The seer of the hymn is Gotama, son of Rahūgaṇa; the metrical form is Paṅkti; and the deity eulogized is Indra. Gotama the seer was the chief priests to the two tribes Kuru and Sṛñjaya.

(Sāyaṇa)

अद्रिरिति मेघनाम। हे अद्रिवो वाहनरूपमेघयुक्त। वज्रिन् वज्रवन् इन्द्र। तुभ्यं इत्। षष्ट्यर्थे चतुर्थी। तवैव। वीर्यं सामर्थ्यम्। अनुत्तं शत्रुभिरतिस्कृतम्।

यद्ध यस्मात् खलु। मायिनं मायाविनम्। त्यं तं प्रसिद्धं वञ्चयितारम्। लोकोपद्रवकारिणं इत्यर्थः। मृगं मृगरूपमापन्नम्। तं वृत्रम्। त्वमपि माययैव। अवधीः हतवानसि॥

(Dinakara)

हे इन्द्र (इन्दतीति व्युत्पत्त्या) रघुनाथ (!) अद्रिवः अद्रिरिति मेघनाम तद्वत् तच्छायया युक्त मेघश्याम वज्रिन् कठोरबाणधारिन् अनुत्तं शत्रुभिरतिरस्कृतं वीर्यं सामर्थ्यं तुभ्यम् इत् तवैव। यत् यस्मात् ह खलु त्वं तं मायिनं मायावित्वेन प्रसिद्धं (त्यमिति त्यशब्दस्य द्वितीयैकवचनम्।) त्यं लोकोपद्रवकारिणं प्रसिद्धं मृगं मृगरूपधारिणं मारीचं मायया रघुनाथरूपां मायां कृत्वा अवधीः हतवानसि। किंभूतस्त्वं, स्वराज्यं स्वर्गराज्यम् अनु लक्षीकृत्य मृगम् अर्चन् पूजयन्। तन्मारणान्मृगस्य स्वर्गप्राप्तिर्भवितेति भावः ॥३५॥

Indra is praised here for his incomparable valour in destroying the demon of darkness, Vṛtra (viz., Ignorance). It is his valour (vīryam) that is unsurpassed (anuttam), and undisputed. It is unique for him (tubhyam it). He rides on the cloud (adrivah, adri is megha-nāma, *Nirukta* 2,2), and wields the invincible weapon vajra (vajrin). He destroyed (avadhīh) the crafty demon of darkness (māyinam) by his supernormal skill (māyayā), thereby establishing his own sovereignty (svarājyam anu archan). (cf. 1,11,7, मायाभिरिन्द्र मायिनं त्वं शुष्णमवातिरः।)

Dinakara sees in this mantra a reference to the hero of Rāmāyaṇa. Indra here is Rāma, whose complexion was cloud-blue, and who killed the demon Mārīcha who appeared before him in the guise of an antelope. It was to kill him that Indra too had assumed the form of Rāma. The desired end for killing Mārīcha was the heavenly state of self-rule.

(36)

ऋषिः गोतमो राहूगणाः ।
छन्दः पंक्तिः ।
देवता इन्द्रः ॥

(संहितापाठः)

आ पप्रौ पार्थिवं रजो बद्बधे रोचना दिवि ।
न त्वावाँ इन्द्र कश्चन न जातो न जनिष्यतेऽति विश्वं
विवक्षिथ ॥३६ ॥ (१.८१.५)

(पदपाठः)

आ । पप्रौ । पार्थिवम् । रजः । बद्बधे । रोचना । दिवि ॥
न । त्वाऽवान् । इन्द्र । कः । चन । न । जातः । न । जनिष्यते । अति ।
विश्वम् । ववक्षिथ ॥३६ ॥

(अन्वयः)

(हे) इन्द्र, पार्थिव रजः आ पप्रौ । दिवि रोचना बद्बधे । (इन्द्र) त्वावान् कश्चन न जातः न च जनिष्यते । विश्वं अति ववक्षिथ ॥

The seer of this mantra is Gotama, son of Rahūgaṇa; the metrical form is Paṅkti; and the deity invoked is Indra.

(Sāyaṇa)

इन्द्रः स्वतेजसा। पर्थिवः पृथिव्याः सम्बन्धि वस्तुजातम्। रजोऽन्तरिक्षलोकम्। च। आ पप्रौ आपूरयति। तथा। दिवि द्युलोके। रोचना रोचमानानि दीप्तानि नक्षत्राणि। बद्बधे बबन्ध स्थापितवान्॥

अतो हे इन्द्र। त्वावान् त्वत्सदृशः। कश्चन। न जातो नोत्पन्नेऽस्ति। न च जनिष्यते उत्पत्स्यमानोऽपि नास्ति। तादृशस्त्वम्। विश्वं सर्वम् रक्षितव्यं जगत्। अति ववक्षिथ अतिशयेन वोढुमिच्छसि। सर्वस्य जगतो निर्वाहको भवसीत्यर्थः॥

(Dinakara)

इन्द्रः पार्थिवं पृथिव्याः सम्बधि वस्तुजातं रजः अन्तरिक्षलोकं च आ पप्रौ (प्रा पूरणे लिटि, आत औ णलः इत्यौकारादेशः) पूरितवान्। तथा दिवि द्युलोके रोचना रोचमानानि दीप्तानि नक्षत्राणि बद्बधे (बध बन्धने) स्थापितवान्। हे इन्द्र अतः त्वावान् त्वत्सदृशः कश्चन न पूर्वं जातः न च जनिष्यते। अत एव त्वं विश्वं जगत् अति विवक्षिथ अतिशयेन बोढुमिच्छसि नान्य इति भावः॥३६॥

Indra is praised as one who fills entirely (ā paprau from 'prī pūraṇe') the realm of the earth (pārthivam) and the midregion (rajah, from 'rañj rāge' pleasure-resort for the celestial denizens), and who fixes up (bad badhe) the luminous stellar bodies (rochanā) in the sky (divi). No one like Indra (kaśchana) has appeared earlier (na jātah), nor will appear in future (na janishyate). He intends bearing the entire responsibility of all existence (viśvam vavakshitha, from 'vah prāpaṇe; ichchhārthe san').

(37)

ऋषिः गोतमो राहूगणः।
छन्दः अनुष्टुप्।
देवता इन्द्रः॥

(संहितापाठः)

इन्द्राय नूनमर्चतोक्थानि च ब्रवीतन।
सुता अमत्सुरिन्दवो ज्येष्ठं नमस्यता सहः ॥३७॥ (१.८४.५)

(पदपाठः)

इन्द्राय। नूनम्। अर्चत। उक्थानि। च। ब्रवीतन॥
सुताः। अमत्सुः। इन्दवः। ज्येष्ठम्। नमस्यत। सहः ॥३२॥

(अन्वयः)

इन्द्राय नूनं अर्चत। उक्थानि च ब्रवीतन। सुताः इन्दवः अमत्सुः। ज्येष्ठं सह नमस्यत॥

The seer of the mantra is Gotama, son of Rahūgaṇa; the metrical form is Anushṭup; and the deity invoked is Indra.

(Sāyaṇa)

हे ऋत्विजः। इन्द्राय। नूनं क्षिप्रम्। अर्चत पूजनं कुरुत। एतदेव स्पष्टीक्रियते। उक्थानि अप्रगीतमन्त्रसाध्यानि स्तोत्राणि च। ब्रवीतन ब्रूत॥

सुताः अभिषुताः। इन्दवः सोमाश्च। अमत्सुः आगतमेनमिन्द्रं मत्तं कुर्वन्तु। अनन्तरं ज्येष्ठं प्रशस्यतमम्। सहः सहस्विनं बलवन्तम्। तमिन्द्रम्। नमस्यत नमस्कुरुत॥

(Dinakara)

हे ऋत्विजः नूनं क्षिप्रम् इन्द्राय अर्चत पूजनं कुरुत। उक्थानि स्तोत्राणि च ब्रवीतन [ब्रूत]। सूताः अभिषुताः इन्दवः सोमाः अमत्सुः इन्द्रं मत्तं कुर्वन्तु। अनन्तरं ज्येष्ठं गुणवत्तरं सहः बलवन्तमिन्द्रं नमस्यत नमस्कुरुत। (सुता इति ऋत्विक्सम्बोधनमिति वयम्। ब्रवीतनेति ब्रवीतेर्लोटि तप्तनप्तनथनाश्येति तनबादेशः)॥३७॥

The devotees (sutāh) are called upon to surely and quickly (nūnam) offer worship (archata) to Indra (indrāya), and to loudly acclaim (bravītana) the glory of Indra by chants (ukthāni). They must gladden Indra (amatsuh, from 'madī harshe') with the Soma offering (indavah), and bow before (namasyata) Indra, who is the supreme (jyeshṭham) and mighty one (sahah, 'balārthe sahas').

(38)

ऋषिः गोतमो राहूगणः।
छन्दः त्रिष्टुप्।
देवता इन्द्रः॥

(संहितापाठः)

को अग्निमीट्टे हविषा घृतेन स्रुचा यजाता ऋतुभिर्ध्रुवेभिः।
कस्मै देवा आ वहानाशु होम को मंसते
वीतिहोत्रः सुदेवः॥३८॥ (१.८४.१८)

(पदपाठः)

कः। अग्निम्। ईट्टे। हविषा। घृतेन। स्रुचा। यजातै। ऋतुऽभिः। ध्रुवेभिः॥
कस्मै। देवाः। आ। वहान्। आशु। होम। कः। मंसते। वीतिऽहोत्रः।
सुऽदेवः॥३८॥

(अन्वयः)

कः अग्निं ईट्टे? (को वा) स्रुचा ध्रुवेभिः ऋतुभिः घृतेन हविषा यजातै? कस्मै होम आशु देवाः आ वहन्? वीतिहोत्रः सुदेवः कः मंसते?

The seer of the mantra is Gotama, son of Rahūgaṇa; the metrical form is Trishṭup and the deity invoked is Indra.

(Sāyaṇa)

को यजमानः। अग्निं ईट्टे इन्द्रार्थं हविर्निरूप्याग्निं स्तौति। इन्द्राय हविनिर्वापोऽपि सम्यक्कर्तुं न शक्यते। इन्द्रस्य दुर्विज्ञानत्वात्। को वा इन्द्रयागार्थं अग्निम्। स्रुचा जुह्वा। ध्रुवेभिः ध्रुवैः नित्यैः। ऋतुभिः वसन्तादिकालैः उपलक्षितेन। घृतेन हविषा। यजातै यजेत्। (न कोऽपीत्यर्थः।)

कस्मै यजमानाय। होम ह्वतव्यम् प्रशस्यं धनम्। आशु शीघ्रम्। देवा आ वहन् आवहन्ति प्रयच्छन्ति। (न कस्मा अपीत्यर्थः) इन्द्र एव धनस्य दाता नान्ये देवा इतीन्द्रः स्तूयते। वीतिहोत्रः प्राप्तयज्ञः। सुदेवः शोभनदेवताकः। को यजमानः। मंसते इन्द्रं सम्यग् जानाति। (न कोऽपीत्यर्थः।) बहुविधेन स्तोत्रेण चिरकालोपासनेन चेन्द्रः प्रत्यक्षो भवति, नान्येन प्रकारेण इति तात्पर्यार्थः॥

(Dinakara)

को यजमानः अग्निम् ईट्टे स्तौति। स्तोतुमपि कश्चिन्न समर्थः। को वा अग्निं स्रुचा जुह्वा ध्रुवेभिः ध्रुवैः ऋतुभिः वसन्तादिकालैः उपलक्षितेन घृतेन हविषा यजातै यजेत्। कर्म कर्तुं सुतरामशक्त इत्यर्थः। वीतिहोत्रः अग्निः सुदेवः शोभना देवता इत्यपि को यजमानः मंसते जानाति। देवाः अपि कस्मै यजमानाय होम होतव्यमपि धनम् आशु शीघ्रम् आ वहान् प्रयच्छन्ति। न कस्मा अपीत्यर्थः। यतः कर्म साङ्गं न भवत्यतो देवाः फलं न प्रयच्छन्तीति भावः। (ईट्टे ईड स्तुतौ अदादित्वाच्छपो लुक्। यजातै यजतेर्लेटि आडागमः। वैतोऽन्यत्र (पा० ३.४.१६) इत्यैकारः। वहान् वहतेर्लेटि आडागमः। होमशब्दो मनिन्प्रत्ययान्तो निपातः। मंसते मन ज्ञाने)॥३८॥

Who (ko) indeed can praise Indra enough (īṭṭe, from 'īḍa stutau')? Who is verily the Agni? And who can make proper offerings (dhruvebhih ṛtubhih ghṛtena) and with what ladle (sruchā) and worship Indra (yajātai). To which devotee (kasmai) can the gods (devāh) provide quickly (āśu) and sufficiently (ā vahān) the wealth necessary for such worship (homa)? Who verily (kah) can know (mansate, from 'man avabodhane') Indra by performing sacrifices (vītihotrah) and by being favoured by other gods (sudevah)?

(39)

ऋषिः गोतमो राहूगणः ।

छन्दः बृहती ।

देवता इन्द्रः ॥

(संहितापाठः)

त्वमङ्ग प्र शंसिषो देवः शविष्ठ मर्त्यम् ।
न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥३९॥
(१.८४.१९)

(पदपाठः)

त्वम् । अङ्ग । प्र । शंसिषः । देवः । शविष्ठ । मर्त्यम् ॥ न । त्वत् । अन्यः । मघऽवन् । अस्ति । मर्डिता । इन्द्र । ब्रवीमि । ते । वचः ॥३९॥

(अन्वयः)

अङ्ग शविष्ठ, देवः त्वं मर्त्यं प्रशंसिषः । मघवन् इन्द्र, त्वदन्यः मर्डिता न अस्ति । ते वचः ब्रवीमि ॥

The seer of the mantra is Gotama-Rahūgaṇa; the metrical form is Bṛhatī; and the deity addressed is Indra.

(Sāyaṇa)

अङ्ग इत्यभिमुखीकरणे। अङ्ग। शविष्ठ हे बलवत्तम। इन्द्र। देवः द्योतमानः। त्वम्। मर्त्यं मरणधर्माणम्। त्वां स्तुतवन्तं पुरुषम्। प्र शंसिषः सम्यगनेन स्तुतमिति प्रशंस॥

हे मघवन् धनवन्। इन्द्र। त्वदन्यः त्वत्तोऽन्यः कश्चित्। मर्डिता सुखयिता। नास्ति। अतः कारणात्। ते तुभ्यम्। इदं स्तुतिलक्षणं वचः। ब्रवीमि उच्चारयामि॥

(Dinakara)

अङ्ग शविष्ठ बलवत्तम हे इन्द्र देवः द्योतमानः त्वं मर्त्यं मरणधर्माणं त्वां सुत्वन्तं माम् अन्यं वा प्र शंसिषः सम्यगनेन स्तुतमुक्तं कृतमिति प्रशंस। हे मघवन् हे इन्द्र त्वदन्यः त्वत्तोऽन्यः कश्चित् मर्डिता सुखयिता नास्ति। अतः कारणात् ते तुभ्यम् इदं स्तुतिलक्षणं वचः ब्रवीमि उच्चारयामि। (शंसिषः शंसु स्तुतौ। मृड सुखने।)॥३९॥

Indra is eulogized here as the dear one (aṅga) and also as the mightiest one (śavishṭha, 'atiśayena śavasvī'); he is the luminous spirit (devah). He is implored to accept with pleasure (pra śamsishah) the mortal man (martyam), who is devoted to him. Who else but Indra (tvadanyah) who is filled with wealth (maghavan, viz., knowledge), can bestow on the mortal man happiness (marḍitā, from 'mṛḍa sukhane')? It is therefore that the seer articulates (bravīmī) the praises to Indra (te vachah).



(40)

ऋषिः गोतमो राहूणः।
छन्दः विराटस्थानो।
देवता विश्वेदेवाः॥

(संहितापाठः)

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्ताक्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥४०॥
(१.८९.६)

(पदपाठः)

स्वस्ति। नः। इन्द्रः। वृद्धऽश्रवाः। स्वस्ति। नः। पूषा। विश्वऽवेदाः॥
स्वस्ति। नः। ताक्ष्यः। अरिष्टऽनेमिः। स्वस्ति। नः। बृहस्पतिः। दधातु॥४०॥

(अन्वयः)

वृद्धश्रवाः इन्द्रः नः स्वस्ति दधातु। विश्ववेदाः पूषा नः स्वस्ति (दधातु)। अरिष्टनेमिः ताक्ष्यः नः स्वस्ति (दधातु)। बृहस्पतिः नः स्वस्ति (दधातु)॥

The seer of the mantra is Gotama-Rahūgaṇa; the metrical form is Virāṭasthānā; and the deity addressed is Viśvedeva.

(Sāyaṇa)

वृद्धश्रवाः वृद्धं प्रभूतं श्रवः श्रवणं स्तोत्रं हविर्लक्षणमन्नं वा यस्य तादृश इन्द्रः। नोऽस्माकम्। स्वस्ति अविनाशं (निरुक्ते ३,२१)। दधातु विदधातु। करोतु। विश्ववेदाः विश्वानि वेत्तीति विश्ववेदाः। यद्वा। विश्वानि सर्वाणि वेदांसि ज्ञानानि धनानि वा यस्य। तादृशः। पूषा पोषको देवः। नोऽस्माकम्। स्वस्ति विदधातु॥

अरिष्टनेमिः। नेमिरित्यायुधनाम। अरिष्टोऽहिंसितो नेमिर्यस्य। यद्वा। रथचक्रस्य धारा नेमिः। यत्सम्बन्धिनो रथस्य नेमिर्न हिंस्यते सोऽरिष्टनेमिः। एवंभूतः तार्क्ष्यः तृक्षस्य पुत्रो गरुत्मान्। नोऽस्माकं स्वस्त्यविनाशं विदधातु। तथा बृहस्पतिः बृहतां देवानां पालयिता। नोऽस्माकं स्वस्त्यविनाशं विदधातु॥

(Dinakara)

वृद्धश्रवाः वृद्धं प्रभूतं श्रवः श्रवणं यस्य सः तादृशः इन्द्रो नः अस्माकं स्वस्ति, स्वस्तीत्यविनाशनाम (नि० ३.२१), अविनाशं कल्याणं वा करोतु। विश्ववेदाः विश्वानि वेत्तीति विश्ववेदाः यद्वा विश्वानि सर्वाणि वेदांसि ज्ञानानि धनानि वा यस्य सः तादृशः पूषा नः स्वस्ति दधातु। अरिष्टनेमिः अरिष्टः अहिंसितः नेमिः आयुधं यस्य सः एवं भूतश्च तार्क्ष्यः तृक्षपुत्रो गरुत्मान् नः स्वस्ति दधातु॥४०॥

May Indra of extended celebrity (vṛddha-śravāh) preserve our well-being (svasti, indestructibility, 'avināśi', *Nirukta* 3,21). May Pūshan (the preserver and illuminator of the path, viz., Sūrya), who is all-knowing (viśva-vedāh, from 'vida jñāne') make for our welfare. May Tārkshya (Sūrya, son of Tṛksha, another name for Kāśyapa, eagle or horse), whose fellies are uninjured (arishṭa-nemih) cause our well-being. May Bṛhaspati (the protector of the growing hymns, 'bṛhatām patih') do us good.

(41)

ऋषिः गोतमो राहूगणः।
छन्दः त्रिष्टुप्।
देवता विश्वेदेवाः॥

(संहितापाठः)

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः॥४१॥ (१.८९.८)

(पदपाठः)

भद्रम्। कर्णेभिः। शृणुयाम। देवाः। भद्रम्। पश्येम। अक्षऽभिः। यजत्राः॥
स्थिरैः। अङ्गैः। तुस्तुऽवांसः। तनूभिः। वि। अशेम। देवऽहितम्। यत्।
आयुः॥४१॥

(अन्वयः)

(हे) देवाः, कर्णेभिः भद्रं शृणुयाम। (हे) यजत्राः, अक्षभिः भद्रं पश्येम। स्थिरैः अङ्गैः तनूभिः तुष्टुवांसः यत् आयुः देवहितं व्यशेम॥

The seer of the mantra is Gotama, son of Rahūgaṇa; the metrical form is Trishṭup; and the deity invoked is Viśvedevāh.

(Sāyaṇa)

हे देवाः दानादिगुणयुक्ताः। सर्वे देवाः। कर्णेभिः अस्मदीयैः श्रोत्रैः। भद्रं भजनीयं कल्याणं वचनम्। शृणुयाम युष्मत्प्रसादाच्छ्रोतुं समर्थाः स्याम। अस्माकं बाधिर्यं कदाचिदपि मा भूत्। हे यजत्राः यागेषु

चरुपुरोडाशादिभिर्यष्टव्याः। देवाः। अक्षिभिः आत्मीयैः चक्षुभिः। भद्रं शोभनं। पश्येम द्रष्टुं समर्थाः स्याम। अस्माकं दृषिप्रतिघातोऽपि मा भूत्॥

स्थिरैः दृढैः। अङ्गैः हस्तपादादिभिः अवयवैः। तनूभिः शरीरैश्च। युक्ताः वयम्। तुष्टुवांसः युष्मान् स्तुवन्तः। यदायुः षोडशादिकशतप्रमाणं विंशत्यधिकशतप्रमाणं वा। देवहितं देवेन प्रजापतिना स्थापितम्। तत्। व्यशेम प्राप्नुयाम॥

This mantra is prescribed to be recited after offering saumya-charu in the tṛtīya-savana, when the sacrificer cannot behold his reflection in the ghee added to homa-śesha (Āśvalāyana-śrauta-sūtra, 5,19); also in Mahānāmnī-vrata, while touching the earth (ibid. 8,14)

(Dinakara)

हे देवाः कर्णेभिः श्रोत्रैः भद्रं कल्याणवचनं शृणुयाम श्रोतुं समर्थाः स्याम। भो यजत्राः चरुपुरोडाशादिभिर्यष्टव्या देवाः अक्षभिः नेत्रैः भद्रं कल्याणं शोभनं च पश्येम द्रष्टुं समर्थाः स्याम। स्थिरैः दृढैर्हस्तादिभिरङ्गैः अवयवैः तनूभिश्च युक्ताः वयं तुष्टुवांसः युष्मान् स्तुवन्तः देवहितं देवेन प्रजापतिना स्थापितं यत् आयुः षोडशाधिकशतप्रमाणं विंशत्यधिकशतप्रमाणं वा तत् व्यशेम प्राप्नुयाम॥४१॥

O ye gods (the luminous ones) who are objects of our worship (yajatrāh), grant us the favour of always listening (śṛuṇuyāma) to what is auspicious (bhadram, viz., kalyāṇam, maṅgalam) with our ears (karṇebhih), and seeing (paśyema) what is good (bhadram) with our eyes (akshabhih). Praising you (tushṭuvāmsah, shṭuing stutau), let us live (vyaśema) the length of life (āyuh) that is allotted by the gods (devahitam), with all our organs intact and firm (sthiraih aṅgaih) along with the body that is fine (tanūbhih).

(42)

ऋषिः गोतमो राहूगणः।
छन्दः त्रिष्टुप्।
देवता विश्वेदेवाः॥

(संहितापाठः)

शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम्।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः॥४२॥
(१.८९.९)

(पदपाठः)

शतम्। इत्। नु। शरदः। अन्ति। देवाः। यत्र। नः। चक्र। जरसम्।
तनूनाम्॥ पुत्रासः। यत्र। पितरः। भवन्ति। मा। नः। मध्या। रिरिषत।
आयुः। गन्तोः॥४२॥

(अन्वयः)

(हे) देवाः, अन्ति शरदः शतं इत् नु। नः तनूनां यत्र जरसं चक्र, यत्र पुत्रासः पितरः भवन्ति, नः आयुर्गन्तोः मध्या मा रीरिषत॥

The seer of the mantra is Gotama, son of Rahūgaṇa; the metrical form is Trishṭup; and the deity invoked is Viśvedevāḥ.

(Sāyaṇa)

हे देवाः । अत्यन्तिके मनुष्याणां समीपे । आयुष्ट्वेन भवद्भिः कल्पिताः । शरदः संवत्सराः । शतमित् नु शतं खलु । यस्मात्सृष्टिकाले मनुष्याणां शतं संवत्सरा आयुरिति युष्माभिः परिकल्पितं तस्मत् । नः अस्माकम् । आयुः । गन्तोः क्लृप्तस्य आयुषोः गमनात्पूर्वम् । मध्या मध्ये । मा रीरिषत मा हिंसिष्ट ।

कीदृशान्? नः अस्माकम् । तनूनां शरीराणाम् । जरसं जरा । यत्र यस्यां अवस्थायाम् । चक्र कृतवन्तः । यूयम् यत्र च । पुत्रासः पुत्राः । पितरः अस्माकं रक्षितारः भवन्ति । ईदृग्दशापन्नान् इत्यर्थः ॥

Dinakara

हे देवाः अन्ति अन्तिके मनुष्याणां समीपे युष्माभिः शरदः [शतम् इत्] शतमेव आयुः कल्पितं नु खलु । तस्मात् गन्तोः आयुषो गमनात् पूर्वं मध्या मध्ये [नः] अस्मदीयमायुः मा रीरिषत मा हिंसिष्ट । तत्किमायुः ? यस्मिन्नायुषि यूयं नोऽस्माकं तनूनां शरीराणां जरसं जरा चक्रा कृतवन्तः । यत्र च पुत्राः पितरः पालका भवन्ति पितॄणामित्यर्थः । यद्वा पूर्वजन्मस्थाः पुत्राः पितरो भवन्ति पितरश्च पुत्रा भवन्ति । जरादिदोषयुक्तमप्यायुर्मध्ये न हिंसनीयमिति भावः ॥४२॥

O ye gods (the luminous and generous ones), is it not determined that the life-span of man is but a hundred years (śatam śaradah it nu)? Towards the close of this period (anti, 'antike'), when (yatra) old age (jarasam) for the body and organs (tanūnām) is occasioned (chakra), then (yatra) our offsprings (putrāsah) become (bhavanti) our guardians (pitarah, viz. pātārah). During this period (madhyā), before our lives terminate (āyur gantoh), do not hurt us (mā rīrishata, from 'risha himsāyām')

(43)

ऋषिः गोतमो राहूगणः।
छन्दः त्रिष्टुप्।
देवता विश्वेदेवाः॥

(संहितापाठः)

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः।
विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम्॥४३॥
(१.८९.१०)

(पदपाठः)

अदितिः। द्यौः। अदितिः। अन्तरिक्षम्। अदितिः। माता। सः। पिता।
सः। पुत्रः॥ विश्वे। देवाः। अदितिः। पञ्च। जनाः। अदितिः। जातम्।
अदितिः। जनिऽत्वम्॥४३॥

(अन्वयः)

अदितिः द्यौः। अदिथिः अन्तरिक्षम्। अदितिः माता। स पुत्रः। विश्वे देवा अदितिः। पञ्च जनाः अदितिः। जातं अदितिः। जनित्वं अदितिः॥

The seer of the hymn is Gotama, son of Rahūgaṇa; the metrical form is Trishṭup; and the deity invoked is Viśvedevāḥ.

(Sāyaṇa)

अदितिः अदीना अखण्डनीया वा। पृथिवी देवमाता वा। सैव द्यौः द्योतनशीलो नाकः। सैव अन्तरिक्षं अन्तरा द्यावा पृथिव्योः मध्य ईक्ष्यमाणं व्योम। सैव माता निर्मात्री जगतो जननी। सैव पिता उत्पादकः। ततश्च। स पुत्रः मातापित्रोर्जातः पुत्रोऽपि सैव।

विश्वे देवाः सर्वोऽपि देवा अदितिः एव। पञ्च जनाः निषादपञ्चमाश्चत्वारो वर्णाः। यद्वा गन्धर्वाः पितरो देवा असुरा रक्षांसि। तदुक्तं यास्केन (३,७) (औपमन्यवः)। अदितिरेव। जातं जननं प्रजानामुत्पत्तिः। साऽप्यदितिरेव। जनित्वं जन्माधिकरणम्। तदप्यदितिरेव। एवं सकलजगदात्मना अदितिः स्तूयते। उक्तं च यास्केन। इत्यदितेर्विभूतिमाचष्टे (४,२३)।

This mantra is recited as yājyāmantra in Paśu-yāga for Aditi. (Āśvalāyana-śrauta-sūtra, 3,8)

(Dinakara)

(अदितिदेवताके पशौ याज्येयम्।) अदितिः देवमाता पृथिवी वा द्यौः स्वर्गः। सैवान्तरिक्षम्। सैव माता जननी। सैव पिता। सैव पुत्रः। विश्वे देवाः सर्वेऽपि देवाः पृथिव्येव। पञ्च जनाः निषादपञ्चमा वर्णाः यद्वा गन्धर्वाद्याः (तदुक्तं यास्केन – "गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके, चत्वारो वर्णाः निषादः पञ्चम इत्यौपमन्यवः" (३.८ः) इति। बह्वृचब्राह्मणे तु "सर्वेषां वा एतत् पञ्चजनानामुक्थं देवमनुष्याणां गन्धर्वाप्सरसां सर्पाणां च पितॄणां च" (ऐ.ब्रा.३.३१) इति) पञ्चजना अपि सैव। जातं जननं प्रजानामुत्पत्तिरप्यदितिरेव। जनित्वं जन्माधिकरणमपि सैव। (जनेरौणादिकस्त्वन्प्रत्ययः) ॥४३॥

Aditi means the spirit that is indestructible (from 'do avakhaṇḍane', na ditih aditih; or according to Yāska 'dīṅg kshaye'). The high heavens or the luminous sky (dyauh), the mid-region (antariksham, between the earth and the sky), the matrix of all existence (mātā), the protector (pitā), the offspring from the matrix and the protector (as father) (putrah), the five-fold productions

(pañcha-janāh) are all expressions of Aditi. What has appeared (jātam) and what is about to appear or the source of appearance (janitvam, from 'janī prādurbhāve') are in fact the forms of Aditi.

(Note: The expression 'pañcha-janāh' occurs occasionally in the Ṛgvedic corpus. It means 'the five tribal folk', viz. the Anu, Druhyu, Yadu, Turvaśa, and Puru, the tribes that lived on the banks of the river Sarasvatī (cf. 1,108,8 and 8,10,5), or according to Skanda-svāmi, five kinds of beings: gandharva, pitṛ, deva, asura and rakshas. The explanation of Sāyaṇa that the word refers to the four varṇas along with the nishāda or hunter as the fifth, appears far-fetched.

Aditi symbolizes unfragmented awareness that is present in all existence.



(44)

ऋषिः गोतमो राहूगणः।
छन्दः त्रिष्टुप्।
देवता अग्नीषोमौ॥

(संहितापाठः)

अग्नीषोमा हविषः प्रस्थितस्य वीतं हर्यतं वृषणा जुषेथाम्।
सुशर्माणा स्ववसा हि भूतमथा धत्तं यजमानाय शं योः ॥४४॥
(१.९३.७)

(पदपाठः)

अग्नीषोमा। हविषः। प्रऽस्थितस्य। वीतम्। हर्यतम्। वृषणा। जुषेथाम्॥
सुऽशर्माणा। सुऽअवसा। हि। भूतम्। अथ। धत्तम्। यजमानाय। शम्।
योः ॥४४॥

(अन्वयः)

(हे) अग्नीषोमा, प्रस्थितस्य हविषः वीतम्। हर्यतम्। वृषणा जुषेथाम्। सुशर्मणा स्वदसा हि भूतम्। अथ यजमानाय शं योः धत्तम्॥

The seer of this mantra is Gotama, son of Rahūgaṇa; the metrical form is Trishṭup; and the deity is Agnīshomau (twin deities Agni and Soma).

(Sāyaṇa)

हे अग्नीषोमौ। प्रस्थितस्य होमार्थं आहवनीयसमीपं प्राप्तम्। हविषः इदं हविः। वीतं भक्षयतम्। तदन्तरं च हर्यतं अस्मान् कामयेथाम्। हे वृषणा कामानां वर्षितारौ। जुषेथां अस्मदीयं परिचरणं सेवेथाम्॥

तदनन्तरं हविर्दत्तवते यजमानाय। शं शमनीयानां रोगाणां शमनम्। योः पृथक्शमनं च रोगाणां यावनं च भयानाम् (४,२१) इति॥

(Dinakara)

(गोतमस्यार्षम्।) हे अग्नीषोमौ प्रस्थितस्य होमार्थमाहवनीयसमीपं नीतस्य हविषः (कर्मणि षष्ठी) वीतं भक्षयतम्। तदनन्तरं हर्यत च अस्मान् कामयेथाम्। हे वृषणा कामानां वर्षितारौ जुषेथाम् अस्मदीयं परिचरणं सेवेथाम्। ततः सुशर्माणा शोभनमुखौ स्ववसा हि शोभनरक्षणौ च अस्माकं भूतं भवम्। (लोटि, बहुलं छन्दसि (पा० २.४.७३) इति शपो लुक्।) अथ अनन्तरं हविर्दत्तवते यजमानाय शं कल्याणं [योः च] धत्तं कुरुतम्॥४४॥

The two deities Agni and Soma are together addressed here. They are invited to partake of (vītam, 'aśhītam', *Nirukta,* 4,1, "accept", "eat") the oblations that are formally offered (havishah prasthitasya), and they are begged to accept graciously the offerings (jushethām), and to become (bhūtam) the ones who bestow happiness (suśarmaṇā) and protection (svadasā). They cause (dhattam) for the devotee (yajamānāya) freedom from ailments (śam) and freedom from fear and anxiety (yoh).

(45)

ऋषिः गोतमो राहूगणः।
छन्दः जगती। त्रिष्टुब् वा।
देवता अग्नीषोमौ॥

(संहितापाठः)

यो अग्नीषोमा हविषा सपर्याद् देवद्रीचा मनसा यो घृतेन।
तस्य व्रतं रक्षतं पातमंहसो विशे जनाय महि शर्म यच्छतम्॥४५॥
(१.९३.८)

(पदपाठः)

यः। अग्नीषोमा। हविषाः। सपर्यात्। देवद्रीचा मनसा। यः। घृतेन॥ तस्य। व्रतम्। रक्षतम्। पातम्। अंहसः। विशे। जनाय। महि। शर्म। यच्छतम्॥४५॥

(अन्वयः)

(हे) अग्नीषोमा, यः देवद्रीचा मनसा हविषा सपर्यात्, यः घृतेन॥ तस्य व्रतं रक्षतम्। अंहसः पातम्। विशे जनाय महि शर्म यच्छतम्॥

The seer of the hymn is Gotama, son of Rahūgaṇa; the metrical form is Jagatī or alternately Trishṭup; the deity is Agnīshomau (Agni and Soma).

(Sāyaṇa)

यो यजमानः। अग्नीषोमा अग्नीषोमौ। देवद्रीचा देवान् चता देवता परयणेन श्रद्धायुक्तेन। मनसा अन्तःकरणेन। युक्तः सन्। हविषा चरुपुरोडाशादिना। सपर्यात् सपर्यति परिचरति। यश्च यजमानो। घृतेन आज्येन। अग्नीषोमौ परिचरति।

तस्य यजमानस्य। व्रतं कर्म। रक्षतम्। अंहसः पापत। तम् यजमानम्। पातं रक्षतम्। विशे यागेषु। प्रविशते। तस्मै। जनाय यजमानाय। महि महत् प्रभूतम्। शर्म सुखम्। यच्छतं दत्तम्॥

(Dinakara)

यः यजमानः देवद्रीचा देवपरायणेन मनसा युक्तः सन् हविषा पुरोडाशादिना अग्नीषोमौ सपर्यात् परिचरति। यश्च घृतेनापि परिचरति। तस्य यजमानस्य व्रतं कर्म रक्षतम्। तं च यजमानम् अहसः पापात् पातं रक्षतम्। विशे यागेषु प्रविशते जनाय यजमानाय महि महत् शर्म सुखं यच्छतं प्रयच्छतम्। (देवान् अञ्चतीति देवद्र्यङ्। ऋत्विगादिना (पा० ६.२.५९) क्विनं। विष्वग्देवयोः (पा० ६.३.९२) इति टेरद्र्यादेशः) ॥४५॥

O ye Agni and Soma, whoever (yah) is devoted frequently to the luminous ones (deva-drīchā, devān āñchatā) and worships you (saparyāt, from 'saparam pūjāyām') with offerings (havishā) and with the mind that is filled with light (manasā ghṛtena), protect his activities (tasya vratam rakshatam); and guard him (pātam) from sins (amhasah). Bestow upon (yachchhatam) the worshipper with his kith and kin (viśe janāya; 'viśe manushya-nāma etat' Skandasvāmi, also *Nirukta,* 3,7) abundant (mahi, mahat, prabhūtam) happiness (śarma (cf. ghṛta in the sense of light; RV 1,72,3; 2,3,4; 2,10,4; 5,1,7; 5,11,3; 5,14,6; 8,5,5 etc.)



(46)

ऋषिः गोतमो राहूगणः।
छन्दः गायत्री।
देवता अग्नीषोमौ ॥

(संहितापाठः)

अग्नीषोमा सवेदसा सहूती वनतं गिरः।
सं देवत्रा बभूवथुः ॥४६॥ (१.९३.९)

(पदपाठः)

अग्निषोमा। सऽवेदसा। सहूती इति सऽहूती। वनतम्। गिरः ॥
सम्। देवऽत्रा। बभूवथुः ॥४६॥

(अन्वयः)

(हे) अग्नीषोमा, सवेदसा सहूती गिरः वनतम्। देवत्रा सं बभूवथुः ॥

The seer of this mantra is Gotama, son of Rahūgaṇa; the metrical form is Gāyatrī; and the deity Agnīshoma (Agni and Soma).

(Sāyaṇa)

हे अग्नीषोमौ। युवाम्। सवेदसा समनेनैकेन वेदसा हविर्लक्षणेन धनेन युक्तौ। सहूती समानाह्वानौ च सन्तौ। गिरः अस्मदीयाः स्तुतीः। वनतं संभजेयाम्।

देवत्रा देवेषु। यो युवाम्। संबभूवथुः संभूतौ संभावितौ प्रशस्तौ स्थः। (राजानौ वा एतौ देवतानां यदग्नीषोमौ। इति श्रुतिः ॥

This mantra is recited as 'anuvākyā' in the sacrifice associated with the two deities, Agni and Soma, as part of Paurṇamāseshṭi (Āśvalāyanaśranta-sūtra, 1,6)

(Dinakara)

(पौर्णमासयागेऽग्नीषोमीयस्यानुवाक्या।) हे अग्नीषोमौ यौ युवां देवत्रा देवेषु सं बभूवथुः सम्भावितौ प्रशस्तौ स्थः। 'राजानौ वा एतौ देवानां यदग्नीषोमौ' (तै० मं० २.६.२.१-२) इति श्रुतेः। तौ युवां सवेदसा समानेनैकेन वेदसा हविर्लक्षणेन धनेन युक्तौ सहूती समानाह्वानौ अस्मदीयाः गिरः वाचः स्तुतीः वनतं संभजेथाम्। (वन षण संभक्तौ। देवत्रा, देवमनुष्यपुरुष (पा० ५.४.५६) इत्यादिना सप्तम्यर्थे त्राप्रत्ययः) ॥४६॥

O ye Agni and Soma, the two of you are alike endowed with supernormal power (savedasau, 'samānam vedah yayoh', veda is wealth or power); you are invoked together (sahūtī; samānā hūtih yayoh). My praises (girah; stutayo gṛṇāteh, *Nirukta,* 1,11) must be joyously accepted by both of you and shared by you (vanatam, *Nirukta* 3,9). Both of you indeed are most adorable among all the gods (devatrā sambabhūvathuh; devatrā is locative case for deva, ef. Pāṇini, 5,4,56).



(47)

ऋषिः गोतमो राहूगणः।
छन्दः गायत्री।
देवता अग्नीषोमौ॥

(संहितापाठः)

अग्नीषोमाववनेन वां यो वां घृतेन दाशति।
तस्मै दीदयतं बृहत्॥४७॥ (१.९३.१०)

(पदपाठः)

अग्नीषोमौ। अनेन। वाम्। यः वाम्। घृतेन। दाशति॥
तस्मै। दीदयतम्। बृहत्॥४२॥

(अन्वयः)

(हे) अग्नीषोमौ। वां यः अनेन घृतेन वां दाशति, तस्मै बृहत् दीदयतम्॥

The seer of the mantra is Gotama, son of Rahūgaṇa; the metrical form is Gāyatri; and the deity invoked is Agnīshomau (Agni and Soma).

(Sāyaṇa)

हे अग्नीषोमौ। वाम् युवयोः। सम्बन्धी। यः यजमानः। अनेन घृतेन उत्पवनादिभिः संस्कृतेन आज्येन युक्तम्। हविः। वां युवाभ्याम्। दाशति प्रयच्छति।

तस्मै यजमानाय। बृहत् प्रभूतम्। धनम्। दीदयतम् प्रकाशयतं प्रयच्छतमित्यर्थः ॥

(Dinakara)

हे अग्नीषोमौ वां युवयोः अयं यजमानः अनेन घृतेन युक्तं हविः वां युवाभ्यां दाशति प्रयच्छति (दाशृ दाने)। तस्मै यजमानाय बृहत् प्रभूतं धनं दीदयतं प्रकाशयतं प्रयच्छतमित्यर्थः (दीदयतिः दीप्तिकर्मा) ॥४७॥

O ye Agni and Soma, whoever (yah) offers to both of you (vām) devoutly (dāśati from 'dāśṛ dāne') his enlightened mind (ghṛtena), upon him (tasmai) bestow both of you (dīdayatam, also 'vardhayatam' "make grow") abundance (bṛhat) of welath (viz. knowledge).

(48)

ऋषिः गोतमो राहूगणः।
छन्दः गायत्री।
देवता अग्नीषोमौ॥

(संहितापाठः)

अग्नीषोमाविमानि नो युवं हव्या जुजोषतम्।
आ यातमुप नः सचा॥४८ ॥ (१.९३.११)

(पदपाठः)

अग्निषोमौ। इमानि। नः। युवम्। हव्या। जुजोषतम्।
आ। यातम्। उप। नः। सचा॥४८॥

(अन्वयः)

(हे) अग्नीषोमौ, युवं नः इमानि हव्या जुजाषतं नः। सचा उप आ यातम्॥

The seer of the mantra is Gotama, son of Rahūgaṇa; the metrical form is Gāyatrī; and the deity Agnīshomau (Agni and Soma).

(Sāyaṇa)

हे अग्नीषोमौ। युवं युवाम्। नः अस्मदीयानि। इमानि। हव्या हवींषि। जुजोषतं सेवेथाम्। तदर्थं नः अस्मान्। सचा सह। युवाम्। उपा यातं उपागच्छतम्॥

(Dinakara)

हे अग्नीषोमौ [युवं] युवां नः अस्मदीयानि इमानि हव्या हवींषि जुजोषत सेवेथाम्। युवां सचा ब्रह्मणस्पतिना सह [नः] उप आ यातं उपगच्छतम्॥४८॥

O ye Agni and Soma, for receiving with joy (jujoshatam, from 'jushī prītisevanayoh') our offerings of worship (havyā), both of you together (yuvam) behold us (nah), and come to us together (sachā upa ā yātam; sachā 'saha'; yātam from 'yā prāpaṇe').

(49)

ऋषिः गोतमो राहूगणः।
छन्दः त्रिष्टुप्।
देनता अग्नीषोमौ॥

(संहितापाठः)

अग्नीषोमा पिपृतमर्वतो न आ प्यायन्तामुस्रिया हव्यसूदः।
अस्मे बलानि मघवत्सु धत्तं कृणुतं नो
अध्वरं श्रुष्टिमन्तम्॥४९॥ (१.९३.१२)

(पदपाठः)

अग्नीषोमा। पिपृतम्। अर्वतः। नः। आ। प्यायन्ताम्। उस्रियाः।
हव्यऽसूदः॥ अस्मे इति। बलानि। मघवत्ऽसु। धत्तम्। कृणुतम्। नः।
अध्वरम्। श्रुष्टिऽमन्तम्॥४९॥

(अन्वयः)

(हे) अग्नीषोमा, नः अर्वतः पिपृतम्। हव्यसूदः उस्रियाः आप्यायन्ताम्। मघवत्सु अस्मे बलानि धत्तम्। नः अध्वरं श्रुष्टिमन्तं कृणुतम्॥

The seer of the mantra is Gotama, son of Rahūgaṇa; the metrical form is Trishṭup; and the deity Agnīshomau (Agni and Soma).

(Sāyaṇa)

हे अग्नीषोमौ। नः अस्माकम्। अर्वतः अश्वान्। पिपृतं पालयतम्। हव्यसूदः क्षीरादि हविष उत्पादयित्र्यः। उस्रियाः अस्मदीया गावश्च। आप्यायन्तां आप्यायिताः प्रवृद्धाः सन्तु।

मघवत्सु हविर्लक्षणधन युक्तेषु। अस्मे अस्मासु। बलानि। धत्तं स्थापयतम्। तथा। नः अस्माकम्। अध्वरं यागम्। श्रुष्टिमन्तं धनयुक्तम्। कृणुतम् कुरुतम्॥

(Dinakara)

हे अग्नीषोमौ नः अस्माकम् अर्वतः अश्वान् पिपृतं पालयतम्। हव्यसूदः हव्यं क्षीरादि सूदयन्ति दुहन्ति (षूद क्षरणे) उत्पादयन्ति वा तादृश्यः उस्रियाः गावश्चास्मदीयाः आ प्यायन्तां प्रवृद्धाः सन्तु। मघवत्सु इन्द्रतुल्येषु अस्मे अस्मासु बलानि धत्तं स्थापयतम्। तथा नः अस्माकं अध्वरं यागं श्रुष्टिमन्तं धनयुक्तं कृणुतं कुरुतम् ॥४९॥

O Ye Agni and Soma, protect (piprtam) our steeds (arvatah, from 'arvān', 'arti gachchhatīty arvā', 'arveraṇavān' *Nirukta*, 11,31, viz. sense-organs which move fast) and may our cows (usriyāh, gonāma, *Nirukta*, 3,8, viz. rays of light, luminous powers of the mind) be well nourished (āpyāyantām) for they produce the milk (devotion, faith) for offering (havyasūdah, from 'shūda ksharaṇe', havyam sūdante ksharanti). Fill (dhattam) us with strength (asme balāni); make (kṛṇutam) our devout life (adhvaram) happy and well provided for (śrushṭimantam, from 'śu āśu áśyate vyāpyate, pervading quickly; wealth; Skandasvāmi takes it as happiness 'sukha-nāma')

(Note the word 'adhvara' usually means sacrifice where violence is avoided, 'na dhvarati'; but the word signifies disciplined life which has concern for all beings and all gods).

(50)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता अग्निः॥

(संहितापाठः)

इमं स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया।
भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा
रिषामा वयं तव ॥५०॥ (१.९४.१)

(पदपाठः)

इमम्। स्तोमम्। अर्हते। जातऽवेदसे। रथम्ऽइव। सम्। महेम। मनीषया॥
भद्रा। हि। नः। प्रऽमतिः। अस्य। संऽसदि। अग्ने। सख्ये। मा। रिषाम।
वयम्। तव॥५०॥

(अन्वयः)

अर्हते जातवेदसे मनीषया इमं स्तोमं रथमिव सं महेम। अस्य संसदि नः प्रमतिः भद्रा हि। अग्ने, तव सख्ये वयं मा रिषाम॥

The seer of the mantra is Kutsa, son of Aṅgiras; the metrical form is Jagatī; and the deity addressed is Agni.

(Sāyaṇa)

अर्हते पूज्याय। जातवेदसे जातानां उत्पन्नानां वेदित्रे। जातप्रज्ञाय जातधनाय वा अग्नये। मनीषया निशितया बुद्ध्या। इमं एतत्सूक्तरूपं स्तोमम्। स्तोत्रम्। रथमिव यथा। तक्षा रथं संस्करोति तथा। सं महेम सम्यक् पूजितं कुर्मः।

अस्य अग्नेः। संसदि संभजने। नः अस्माकम्। प्रमतिः प्रकृष्टा बुद्धिः। भद्रा हि कल्याणी समर्था खलु। अतस्तया बुद्ध्या स्तुम इत्यर्थः। हे अग्ने। तव सख्ये। अस्माकं त्वया सह सखित्वे सति। वयम्। मा रिषाम हिंसिता न भवाम। अस्मान् रक्ष। इत्यर्थः॥

(Dinakara)

(आङ्गिरसस्य कुत्सस्यार्षम्। प्रातरनुवाकस्याग्नेये क्रतौ जागते छन्दस्येतत्सूक्तम् आश्विनशस्त्रे च।) अर्हते पूज्याय जातवेदसे जातानां प्राणिनां वेदित्रे जातप्रज्ञाय जातधनाय वाग्नये मनीषया निशितबुद्ध्या इमम् एतत्सूक्तरूपं स्तोमं स्तोत्रं सं महेम सम्यक् पूजितं कुर्मः। (मह पूजायाम्।) रथमिव यथा तक्षा रथं करोति। अस्य अग्नेः संसदि नः अस्माकं भद्रा प्रमतिः प्रकृष्टा बुद्धिर्भवतीति शेषः। हे अग्ने तव सख्ये वयं मा रिषाम हिंसाकर्तारो न भवाम॥४०॥

Agni is worthy of adoration (arhate, 'arh praśamsāyām'); and he is all-knowing (jātavedase, 'jatāni veda'). For him, we construct with devotion (sam mahema, from 'maha pūjāyām') this hymn of adoration (imam stomam) with our intuitive minds (manīshayā), even as a chariot is constructed (rathamiva). When he is being worshipped (asya samsadi), we are indeed happy (bhadrā hi) in our understanding (pramatih). And when his friendship is assured (sakhye) we will not in any way be hurt (mā rishama, from 'risha himsāyām').

(51)

ऋषिः कुत्स अङ्गिरसः।
छन्दः जगती।
देवता अग्निः।

(संहितापाठः)

यस्मै त्वमायजसे स साधत्यनर्वा क्षेति दधते सुवीर्यम्।
स तूताव नैनमश्नोत्यंहतिरग्ने सख्ये मा रिषामा वयं तव॥५१॥
(१.९४.२)

(पदपाठः)

यस्मै। त्वम्। आऽयजसे। सः। साधति। अनर्वा। क्षेति। दधते।
सुवीऽर्यम्॥ सः। तूताव। न। एनम्। अश्नोति। अंहतिः। अग्ने। सख्ये।
मा। रिषाम। वयम्। तव॥५१॥

(अन्वयः)

(हे अगने), त्वं यस्मै आ यजसे सः साधति। अनर्वा क्षेति। सुवीर्यं दधते। सः तूताव। एनं अंहतिः न अश्नोति। अग्ने, तव सख्ये वयं मा रिषाम॥

The seer of the mantra is Kutsa, son of Aṅgiras; the metrical form is Jagatī; and the deity addressed is Agni.

(Sāyaṇa)

यस्मै यजमानाय। हे अग्ने। त्वं आ यजसे देवान् आभिमुख्येन यजसि। स यजमानः। साधति स्वाभिलषितं साधयति प्राप्नोतीत्यर्थः। किञ्च। यजमानः। अनर्वा शत्रुभिरप्रत्यृतः सन्। क्षेति निवसति। तथा। सुवीर्यं शोभनवीर्योपेतम्। धनं दधते धारयति। प्राप्नोतीत्यर्थः।

धृत्वा च। स यजमानः। तूताव वर्धते। एनं यजमानम्। अंहतिः आर्तिदारिद्र्यम्। न अश्नोति न प्राप्नोति। अन्यत् पूर्ववत्।

(Dinakara)

हे अग्ने त्वं यस्मै यजमानाय आयजसे देवान् प्रीणासि सः यजमानः साधति स्वाभिलषितं साधयति प्राप्नोतीत्यर्थः। स यजमानः अनर्वा शत्रुभिः अप्रत्यृतः सन् क्षेति ऐश्वर्यं प्राप्नोति। सुवीर्यं शोभनं वीर्यं बलं च दधते धत्ते। स च यजमानः तूताव वर्धते। एनम् यजमानम् अंहतिः दारिद्र्यं न अश्नोति न व्याप्नोति ॥५१॥

O Agni, whichever worshipper (yasmai) you (tvam) associate with (yajase from 'yaj sangati-karaṇe'), will succeed in all his enterprises (sādhati). He will abide (ksheti, from 'kshi nivāse') without fear of dependence on others (anarvā; cf. 2,40,6; 4,17,20; 5,49,4; 7,20,3 and 10,61,5). He will enjoy (dadhate) good vigour (suvīryam). He will progress and prosper (tūtāva, from 'tu vṛddhau'). No hurt, harm or worry (amhatih, from 'han himsāyām') will reach him (aśnoti, from 'aśū vyāptau'). O Agni, when befriended by you (sakhye), we will be free from injury (mā rishāma).

(52)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता अग्निः॥

(संहितापाठः)

**शकेम त्वा समिधं साधया धियस्त्वे देवा हविरदन्त्याहुतम्।
त्वमादित्याँ आ वह तान् ह्यु१श्मस्यग्ने सख्ये मा रिषामा
वयं तव ॥५२॥ (१.९४.३)**

(पदपाठः)

**शकेम। त्वा। सम्ऽइधम्। साधय। धियः। त्वे इति। देवाः। हविः।
अदन्ति। आऽहुतम्॥ त्वम्। आदित्यान्। आ। वह। तान्। हि। उश्मसि।
अग्ने। सख्ये। मा। रिषाम। वयम्। तव ॥४२॥**

(अन्वयः)

(हे) अग्ने, त्वा समिधं शकेम। धियः साधय। त्वे आहतं हविः देवाः अदन्ति। त्वं आदित्यान् आवह हि तान् उश्मसि। अग्ने, तव सख्ये वयं मा रिषाम॥

The seer of the mantra is Kutsa, son of Aṅgiras; the metrical form is Jagatī; and the deity addressed is Agni.

(Sāyaṇa)

हे अग्ने। त्वा त्वाम्। समिधं सम्यगिद्धम्। कर्तुम्। शकेम शक्ता भूयास्म। त्वं च। धियो अस्मदीयानि दर्शपूर्णमासादीनि कर्माणि। साधय निष्पादय। त्वया हि सर्वे यागा निष्पाद्यन्ते। यस्मात्।

त्वे त्वयि। अग्नौ। आहुतं ऋत्विग्भिः प्रक्षिप्तं चरुपुरोडाशादिकं हविः। देवाः। अदन्ति भक्षयन्ति। तस्मात्त्वं साधय इत्यर्थः।

अपि च। त्वम्। आदित्यान् अदितेः पुत्रान्सर्वान्देवान्। आवह अस्मद्यज्ञार्थं आनय। तान् हि इमान् इदानीमेव। वयम्। उश्मसि कामयामहे। अन्यत्पूर्ववत्॥

(Dinakara)

हे अग्ने वयं त्वां समिधं सम्यक् इद्धं कर्तुं शकेन भूयास्म। त्वं धियः कर्माणि साधय। त्वे त्वयि आहुतं प्रक्षिप्तं हविः देवाः अदन्ति भक्षयन्ति। त्वम् आदित्यान् अदितेः पुत्रान् देवान् आ वह यज्ञार्थमानय। वयं तान् देवान् हि इदानीम् उश्मसि कामयामहे॥५२॥

O Agni, may we be able (śakema from saklṛ śaktau) to kindle you (tvā) well (samidham, from 'indhī dīptau', "make you bright"). Accomplish (sādhaya) our spiritual intentions (dhiyah, signifying mental actions, *Nirukta* 3,1). Whatever is offered to you (tve āhutam) the luminous spirits (devāh) accept (adanti, from 'ada bhakshaṇe'). Bring (tvam āvaha) all the offsprings of Aditi (ādityān viz., the earth, heavens, midregion, etc.) close to us, for we long for them (tān hi uśmasi, from 'vaśa kāntau', *Nirukta* 3,9). When Agni is friendly to us (tava sakhye), we will not come to any harm (vayam mā rishāma).



(53)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता अग्निः॥

(संहितापाठः)

भरामेध्मं कृणवामा हवींषि ते चितयन्तः पर्वणापर्वणा वयम्।
जीवातवे प्रतरं साधया धियोऽग्ने सख्ये मा
रिषामा वयं तव॥५३॥ (१.९४.४)

(पदपाठः)

भराम। इध्मम्। कृणवाम। हवींषि। ते। चितयन्तः। पर्वणाऽपर्वणा।
वयम्॥ जीवातवे। प्रऽतरम्। साधय। धियः। अग्ने। सख्ये। मा। रिषाम।
वयम्। तव॥५३॥

(अन्वयः)

(हे अग्ने) इध्मं भराम। ते पर्वणा पर्वणा चितयन्तः हवींषि वयं कृणवाम। जीवातवे धियः प्रतरं साधय (अग्ने)। तव सख्ये वयं मा रिषाम॥

The seer of the mantra is Kutsa, son of Aṅgiras; the metrical form is Jagatī; and the deity addressed is Agni.

(Sāyaṇa)

हे अग्ने। त्वद्यागार्थम्। इध्मं इन्धनसाधनम् एकविंशति दार्वात्मकं समित्समूहम्। भराम सम्पादयाम। तदनन्तरम्। ते तुभ्यम्। हवींषि चरुपुरोडाशादीन् अन्यानि। वयम्। कृणवाम करवाम। किं कुर्वन्तः? पर्वणा पर्वणा प्रतिपक्षमावृत्ताभ्यां दर्शपूर्णमासाभ्याम्। चिन्तयन्तः त्वां प्रज्ञापयन्तः।

स त्वम्। जीवातवे अस्माकं जीवनौषधाय चिरकालावस्थानाय। धियः कर्माणि अग्निहोत्रादीनि। प्रतरं प्रकृष्टतरम्। साधय निष्पादय। अन्यत् समानम्॥

(Dinakara)

त्वदर्थमेकविंशतिदार्वात्मकमिध्मं भराम सम्पादयाम। हविंषि पुरोडाशादीनि ते तुभ्यं कृणवाम। किं कुर्वन्तः, पर्वणापर्वणा प्रतिपक्षं दर्शपूर्णमासाभ्यां वयं चितयन्तः स्वसेवां ज्ञापयन्तः। स त्वं जीवातवे अस्माकं जीवनौषधाय धियः कर्माणि प्रतरं प्रकृष्टतरं साधय॥५३॥

O Agni, we mobilize (bharema) for your sake (te) our instruments of illumination (idhmam, from 'indh, samindhanāt', "to kindle", "to light up"), thinking of you (chitayantah, from 'chitī samjñāne') lovingly again and again (parvaṇā, 'vīpsāyām dviruktih', from 'prīṅg prīṇāteh'), and make (kṛṇavāma) our worshipful offerings (havīmshi). Accomplish competently (prataram sādhaya) our spiritual intentions (dhiyam), so that we may have the means of living long and well (jīvātave). By enjoying your friendship (tava sakhye), we (vayam) will not come to any grief (mā rishāma).

(54)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता अग्निः॥

(संहितापाठः)

विशां गोपा अस्य चरन्ति जन्तवो द्विपच्च यदुत चतुष्पदक्तुभिः।
चित्रः प्रकेत उषसो महाँ अस्यग्ने सख्ये मा
रिषामा वयं तव॥ ५४॥ (१.९४.५)

(पदपाठः)

विशाम्। गोपाः। अस्य। चरन्ति। जन्तवः। द्विऽपत्। च। यत्। उत।
चतुःपत्। अक्तुऽभिः॥ चित्रः। प्रऽकेतः। उषसः। महान्। असि। अग्ने।
सख्ये। मा। रिषाम। वयं। तव॥५४॥

(अन्वयः)

अस्य जन्तवः विशाः गोपाः चरन्ति। यत् द्विपत् उत चतुष्पत् च अक्तुभिः (अक्तम्)। अग्ने, चित्रः प्रकेतः उषसः महान् असि। तव सख्ये वयं मा रिषाम॥

The seer of the mantra is Kutsa, son of Aṅgiras; the metrical form is Jagatī; and the deity addressed is Agni.

(Sāyaṇa)

अस्य अग्नेः। जन्तवो जाताः रश्मयः। विशां सर्वेषां प्राणिनाम्। गोपा गोपयितारः रक्षकाः सन्तः। चरन्ति उद्गच्छन्ति। तदनन्तरं यच्च। द्विपत् द्विपात् मनुष्यादिकमस्ति। उत अपि च। चतुष्पत् चतुष्पात् गवादिकं यदस्ति। तदुभयम्। अक्तुभिः अञ्जकैः अस्य रश्मिभिः अक्तं आश्लिष्ट अभूत्।

हे अग्ने। चित्रो विचित्रदीप्तियुक्तः। प्रकेते। रात्रौ अन्धकारावृतानां सर्वेषां प्रज्ञापयिता प्रदर्शयिता। उषसो उषोदेवताया अपि। महान् गुणैरधिकोऽसि। भवसि। उषास्तु रात्रेश्चरमभागे प्रकाशयति। अग्निस्तु सर्वस्यां रात्रौ प्रकाशयीति तस्य गुणाधिक्यम्॥

(Dinakara)

अस्य अग्नेः जन्तवो [जाताः] रश्मयः विशां प्राणिनां गोपाः रक्षकाः सन्तः चरन्ति उद्गच्छन्ति। तदनन्तरं यत् च द्विपत् द्विपाद् मनुष्यादिकम् उत अपि चतुष्पत् चतुष्पाद् गवादिकम् अस्ति तदुभयम् अक्तुभिः अञ्जकैरस्य रश्मिभिराश्लिष्टमभूदिति शेषः। चित्रः विचित्रदीप्तियुक्तः प्रकेतः अन्धकारावृतानां घटादीनां ज्ञापयिता उषसः उषोदेवतायाः अपि महान् त्वम् असि। उषा रात्रिचरमभागे प्रकाशयति अग्निस्तु सर्वस्यां रात्राविति भावः। (गोपाः गुपू रक्षणे इत्यस्माद् गुपूधूप (पा०.३.१.२८) इत्याप्। पादः पत् (पा० ६.४.१३०) इति पद्भावः)॥५४॥

The offshoots of Agni (jantavah, viz. the rays of light emanating from Agni (cf. 1, 45, 6; 5, 7, 2; 6, 67, 13 and 10, 140, 4) spread all over (charanti) as protectors (gopāh from 'gupū rakshaṇe') of all human beings (viśāh, included in manushya-nāma, *Nirukta*, 3,7); the bipeds (dvipat, mankind) as well as quadrupeds (chatushpat, other animals) are enlivened by the rays of light (aktubhih, also means darkness of light, Skandasvāmi, 'ratri-nāmaitat', in which case, the beings are released from the fear of darkness). O Agni,

manifold brilliance (chitrah) is yours; you illumine the worlds (praketah). Your greatness is far superior to that of dawn (ushasah mahān asi).

(Note: Dawn comes at the close of night, and heralds the day. It comes and goes. But Agni is present during night and day; it is not evanescent).

By your friendship (tava sakhye), we (vayam) will not come to harm (mā rishāma).



(55)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता अग्निः॥

(संहितापाठः)

त्वमध्वर्युरुत होतासि पूर्व्यः प्रशास्ता पोता जनुषा पुरोहितः। विश्वा विद्वाँ आर्त्विज्या धीर पुष्यस्यग्ने सख्ये मा रिषामा वयं तव॥५५॥ (१.९४.६)

(पदपाठः)

त्वम्। अध्वर्युः। उत। होता। असि। पूर्व्यः। प्रऽशास्ता। पोता। जनुषा। पुरःऽहितः॥ विश्वा। विद्वान्। आर्त्विज्या। धीर। पुष्यसि। अग्ने। सख्ये। मा। रिषाम। वयम्। तव॥५५॥

(अन्वयः)

(हे अग्ने) त्वं अध्वर्युः उत पूर्व्यः होता असि। शास्ता पोता जनुषा पुरोहितः। विश्वा आर्त्विज्या विद्वान्। धीर अग्ने, तव सख्ये वयं मा रिषाम।

The seer of the mantra is Kutsa, son of Aṅgiras; the metrical form is Jagatī; and the deity addressed is Agni.

हे अग्ने। त्वम्। अध्वर्युः अध्वरस्य यागस्य नेता। देवान् प्रति प्रेरयिता। यद्वा आध्वर्यवस्य कर्ता। भवसि। अध्वर्यौ मनुष्ये जाठररूपेण वागिन्द्रियाधिष्ठातृत्वेन वावस्थाय यागनिष्पादकः। असि। उत अपि।

पूर्व्यो मुख्यः। होता देवानामाह्वता। पूर्ववद्धोतर्यवस्थाय हौत्रस्य कर्मणः कर्ता वा। असि भवसि। मानुषो होता मुख्यः। तदपेक्षयाऽस्य मुख्यत्वम्। तथा। प्रशास्ता प्रकर्षेण शास्ता। सर्वेषां शिक्षकः असि। पोता यज्ञस्य पावयिता शोधयिता असि। तथा। जनुषा जन्मना स्वाभाव्येन। पुरोहितः पुरस्ताद् आगामिनि स्वर्गादौ हितः अनुकूलाचरणः असि।

विश्वा सर्वाणि। आर्तिज्या ऋत्विजः कर्माणि आध्वर्यवादीनि। विद्वान् जानंस्त्वम्। हे धीर प्राज्ञ। अग्ने। पुष्यासि न्यूनाधिकभावराहित्येन संपूर्णानि करोषि। अन्यत् समानम्॥

त्वम् अध्वर्युः अध्वरस्य नेता आध्वर्यवस्य वा कर्तासि उतापि पूर्व्यः मुख्यः होता देवानामाह्वाता हौत्रस्य कर्तासि। प्रशास्ता प्रकर्षेण शिक्षको मैत्रावरुणो वा पोता यज्ञस्य पावयिता ऋत्विग्विशेषो वा असि। तथा जनुषा जन्मना स्वभाव्येन पुरोहितः [पुरः] आगामिनि स्वर्गादौ [हितः] अनुकूलः। यद्वा आहवनीयरूपेण पूर्वस्यां दिशि स्थापितोऽसि। भो धीर विश्वा सर्वाणि अर्त्विज्या ऋत्विक्कर्माणि विद्वान् जानन् पुष्यसि न्यूनाधिकभावराहित्येन सम्पूर्णानि करोषि॥५५॥

O Agni, you are the guide in our life journey (adhvaryu from adhvara, travelling, moving) you are the one who summons us to worship (hotā); you are the ancient and supreme (pūrvyah) instructor (praśāstā, from 'śāsu anuśishṭau', cf. 2,5,4); you are the purifier of life as a sacrifice (potā, from potram, purification, cf. 2,1,2 and 10,2,2). And you are by your very nature (janushā, from 'janī prādurbhāve') placed in front of us for our good (purohitah, from 'ḍudhāṅg dhāraṇa-poshaṇayoh'). You are all knowing (viśvā vidvān) concerning life as a sacrifice (ārtijyā). You are wise (dhīra, cf. 5,2,11; 8,44,29 and 10,46,2), and you nurture us and make us prosperous (pushyasi). With your friendship (sakhye), we can come to no harm whatever (mā rishāma vayam tava).

(56)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता अग्निः॥

(संहितापाठः)

**यो विश्वतः सुप्रतीकः सदृङ्ङसि दूरे चित् सन् तळिदिवाति रोचसे।
रात्र्याश्चिदन्धो अति देव पश्यस्यग्ने सख्ये मा रिषामा वयं तव॥५६॥**
(१.९४.७)

(पदपाठः)

**यः। विश्वतः। सुऽप्रतीकः। सऽदृङ्। असि। दूरे। चित्। सन्।
तळित्ऽइव। अति। रोचसे॥ रात्र्याः। चित्। अन्धः। अति। देव।
पश्यसि। अग्ने। सख्ये। मा। रिषाम। वयम्। तव॥५६॥**

(अन्वयः)

(हे) अग्ने, यः सुप्रतीकः विश्वतः (अन्वयः) सदृङ् असि। दूरे चित् सन् तळिदिव अति रोचसे। देव, रात्र्याः चित् अन्धः अति पश्यसि। तव सख्ये वयं मा रिषाम॥

The seer of the mantra is Kutsa, son of Aṅgirasa; the metrical form is Jagatī; and the deity addressed is Agni.

(Sāyaṇa)

हे अग्ने। यस्त्वम्। सुप्रतीकः शोभनाङ्गः। सन्। विश्वतः सर्वस्मादपि। सदृङ्ङ्सि अन्यूनः सदृशो भवसि। स त्वम्। दूरे चित् सन् दूरेऽपि वर्तमानः सन्। तळिदिव अन्तिकनामैतत् अन्तिके वर्तमान इवाति रोचसे। अतिशयेन दीप्यसे। तदुक्तं यास्केन। दूरेऽपि सन्नन्तिक इव सन्दृश्यसे (३, ११) इति।

रात्र्याश्चित् रात्रेः अपि। रात्रेः सम्बन्धिनमन्धो बहुलमन्धकारमपि। हे देव द्योतमान। अग्ने। अति पश्यसि अतीत्य प्रकाशसे॥ अन्यत् पूर्ववत्॥

(Dinakara)

हे अग्ने यः त्वं सुप्रतीकः शोभनाङ्गः विश्वतः सर्वस्मादपि सदृङ् सदृशः अन्यूनो भवसि। सः त्वं दूरे चित् सन् दूरेऽपि वर्तमानः सन् तळिदिव निकटे वर्तमान इव अति रोचसे अतिशयेन दीप्यसे। तदुक्तं यास्केन, "दूरेऽपि सन्नन्तिक इव सदृश्यसे" इति (३.११)। हे देव द्योतमान रात्र्याः चित् रात्रेरपि अन्धः अन्धकारम् अति अतिक्रम्य पश्यसि प्रकाशसे (सदृङ्, दृग्दृशवतुषु (पा० ६.३.८९) इति समानस्य सभावः) ॥५६॥

O Agni, you are of excellent form (supratīka), and you are absolutely alike (sadṛṅg asi) everywhere (viśvatah, viz., you are the same wherever you are, without the least change). Being very far (dūre chit san viz., at a great distance), you shine (rochase) exceedingly (ati), as if close at hand (taḷidiva, included in names of nearness or proximity 'antika', *Nirukta*, 3,9). You appear before us (ati paśyasi), piercing and driving away blinding darkness (rātryāś chid andhah, cf. Yāska 'tamopyandha uchyate nāsmin dhyānam bhavati', *Nirukṭa,* 5,1. Night is referred to as darkness, for one cannot attend to any object; darkness in this sense is blinding (andham tamah).

(57)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता अग्निः देवाश्च॥

(संहितापाठः)

**पूर्वो देवा भवतु सुन्वतो रथोऽस्माकं शंसो अभ्यस्तु दूढ्यः।
तदा जानीतोत पुष्यता वचोऽग्ने सख्ये
मा रिषामा वयं तव॥५७॥ (१.९५.८)**

(पदपाठः)

**पूर्वः। देवाः। भवतु। सुन्वतः। रथः। अस्माकम्। शंसः। अभि। अस्तु।
दुःऽध्यः॥ तत्। आ। जानीत। उत। पुष्यत। वचः। अग्ने। सख्ये। मा।
रिषाम। वयं। तव॥५७॥**

(अन्वयः)

(हे) देवाः, सुन्वतः रथः पूर्वः भवतु। अस्माकं शंसः दूढ्यः अभ्यस्तु। तत् आ जनीत। उत वचः पुष्यत। (हे) अग्ने, तव सख्ये वयं मा रिषाम॥

The seer of the mantra is Kutsa, son of Aṅgiras; the metrical form is Jagatī; and the deity addressed is Agni.

(Sāyaṇa)

हे देवाः। अग्न्यवयवभूताः सर्वे देवाः। सुन्वतः सोमभिषवं कुर्वतः यजमानस्य। रथम्। पूर्वः अन्येषां अयजमानानां रथेभ्यो मुख्यो भवतु। अपि च। अस्माकम्। शंसः शंसनीयं अभिशापरूपं पापम्। दूढ्यः दुर्धियः पापबुद्धीन् अस्मदनिष्टाचरणपरान् शत्रून्। अभ्यस्तु अभिभवतु। तान् बाधताम्।

तदिदं मद्वाक्यम्। हे देवाः। आजानीत अभिमुख्येन अवगच्छत। उतापि च। तद्वचोऽस्मदीयं वचनम्। तदर्थाचरणेन। पुष्यत प्रवर्धयत। हे सर्वदेवात्मकाग्ने। सख्य इत्यादि पूर्ववत्॥

(Dinakara)

हे अग्न्यवयवभूता देवाः सुन्वतः सोमभिषवं कुर्वतः रथः पूर्वः अयजमानानां रथेभ्यो मुख्यो भवतु। अपि च अस्माकं शंसः शंसनीयम् अभिशापरूपं पापं दूढ्यः दुष्टं ध्यायन्तीति दूर्धियः (ध्यै चिन्तायाम्) पापबुद्धीन् शत्रून् अभ्यस्तु अभिभवतु। तत् वचः तदिदंमद्वाक्यम् आ जानीत अवगच्छत। उत अपि च मद्वाक्यम् पुष्यत तदर्थाचरणेन प्रवर्धयत॥५७॥

All the gods are in effect Agni alone. So while addressing Agni, the expression 'devāh' (O ye gods) is used. The seer, who is the devout worshipper offering his own mind to Agni (sunvatah, from 'shuṅg abhishavaṇe'), prays that the beautiful vehicle that he has constructed (rathah, viz. the hymn) be the foremost (pūrvo bhavatu). Further, he suggests that our honest praises (śaṁsah, from śaṁsu stutau) may overcome (abhyastu) the wicked folk (dūḍhyah, viz., durdhiyah, the planners of evil, dushṭam dhyāyati iti durdhiyah, *Nirukta* 5,2). Understand aright (ā jānīta), therefore, my praises (tat), O ye gods (in the shape of Agni) and (uta) fulfil (pushyata, from 'pusha pushṭau', nourish) my words of prayer (vachah). When Agni is friend to us (tava sakhye), we are never harmed (vayam mā rishāma).

(58)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता अग्निः॥

(संहितापाठः)

वधैर्दुःशंसाँ अप दूढ्यो जहि दूरे वा ये अन्ति वा के चिदत्रिणः।
अथा यज्ञाय गृणते सुगं कृध्यग्ने सख्ये मा रिषामा वयं तव॥५८॥
(१.९४.९)

(पदपाठः)

वधैः। दुःऽशंसान्। अप। दुःऽध्यः। जहि। दूरे। वा। ये। अन्ति। वा।
के। चित्। अत्रिणः॥ अथ। यज्ञाय गृणते। सुऽगं। कृधि। अग्ने। सख्ये।
मा। रिषाम। वयम्। तव॥५८॥

(अन्वयः)

(हे) अग्ने, वधैः दुःशंसान् दूढ्यः अप जहि। ये केचित् दूरे वा अन्ति वा अत्रिणः (अप जहि)। अथ यज्ञाय गृणते सुगं कृधि। अग्ने तव सख्ये वयं मा रिषाम॥

The seer of the mantra is Kutsa, son of Aṅgiras; the metrical form is Jagatī; and the deity addressed is Agni.

(Sāyaṇa)

हे अग्ने। त्वम्। वधैः हननसाधनैः आयुधैः। दुःशंसान् दुःखेन कीर्तनीयान्। दूढ्यो। दुर्धियः पापबुद्धीन्। अप जहि वधं प्रापय। ये केचित् ये केचन। दूरे विप्रकृष्टदेशे। वा अन्तिके समीपदेशे वा। वर्तमाना। अत्रिणो अत्तारः। राक्षसादयः विद्यन्ते तान्दुर्धियः अपजहीत्यर्थः।

अथ अनन्तरम्। यज्ञाय यज्ञपतये। गृणते त्वा स्तुवते। यजमानाय। सुगं शोभनं मार्गम्। कृधि कुरु। अन्यत् पूर्ववत्॥

(Dinakara)

हे अग्ने त्वं वधैः हननसाधनखड्गाद्यायुधैः दुःशंसान् दुःखेन कीर्तनीयान् दूढ्यः दुःशत्रून् अप जहि वधं प्रापय। ये के चित् अत्रिणः अत्तारो राक्षसादयः दूरे समीपे वा वर्तन्ते तानप्यप जहि। अथ यज्ञाय यज्ञार्थं गृणते त्वां स्तुवते यजमानाय सुगं शोभनं मार्गं कृधि कुरु। (वधैः हनश्च वध (पा० ३.३.७६) इति हन्तेः करणे अप् वधादेशश्च। जहि हन्तेर्जः (पा० ६.४.३६) इति जादेशः)॥५८॥

O Agni, strike and kill (apajahi) with your deadly weapons (vadhaih, cf. 1,121,9; 1,133,6; 2,28,7; 6,20,4 etc.) the evil-minded (duhśaṁsān, viz. those who are difficult to praise) and the sinful (dūḍhyah). Destroy the devourers (attriṇah, from 'ada bhakshaṇe'), whoever they are (ye kechit) and whether they are far (dūre) or near (anti). Then (atha), prepare (kṛdhi) the easily accessible path (sugam from 'gamblṛ gatau' viz., devayāna, cf. *Bṛhaddevatā,* 7,6,5, (देवयानान् सुगान् पथः कुरुष्व ॥) for your worshipper who adores you (gṛṇate, from 'gṝ stutyarthe') for the sake of living the life of sacrifice (yajñāya). When we are assured of your friendship (tava sakhye), we do not come to any harm (vayam mā rishāma).

(59)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता अग्निः॥

(संहितापाठः)

यदयुक्था अरुषा रोहिता रथे वातजूता वृषभस्येव ते रवः।
आदिन्वसि वनिनो धूमकेतुनाग्ने सख्ये मा रिषामा वयं तव ॥५९॥
(१.९४.१०)

(पदपाठः)

यत्। अयुक्थाः। अरुषा। रोहिता। रथे। वातऽजूता। वृषभस्यऽइव। ते रवः॥
आत्। इन्वसि। वनिनः। धूमऽकेतुना। अग्ने। सख्ये। मा। रिषाम। वयम्।
तव॥५९॥

(अन्वयः)

हे अग्ने, अरुषा रोहिता वातजूता रथे यत् आयुक्थाः ते रवः वृषभस्येव। आत् वनिनः धूमकेतुना इन्वसि। तव सख्ये वयं मा रिषाम॥

The seer of the mantra is Kutsa, son of Aṅgirasa; the metrical form is Jagatī; and the deity addressed is Agni.

(Sāyaṇa)

हे अग्ने। अरुषा रोचमानो। रोहिता लोहितवर्णौ। रोहित इत्यग्नेरश्वस्याख्या। वातजूता वातस्य वायोः जूतं जवो वेग इव वेगो ययोः तौ। ईदृशौ अश्वौ। रथे यद्यद्। आयुक्थाः अयोजयः। तदानीम्। वनानि दहतस्ते। रवः शब्दः। वृषभस्येव दृप्तस्य महोक्षस्य शब्द इव गम्भीरो भवति॥

तदनन्तरम्। वनिनः वनसम्बद्धान् वृक्षान्। धूमकेतुना धूमः केतुः प्रज्ञापको यस्य। तादृशेन रश्मिना। इन्वसि व्याप्नोषि। अन्यत् पूर्ववत्॥

(Dinakara)

हे अग्ने त्वम् अरुषा रोचनानौ रोहिता रोहितसंज्ञकौ स्वस्याश्वौ (रोहितोऽग्नेः (नि० १.१५.२) इति दर्शनात्। रोहितेन त्वाग्निर्देवतां गमयतु (तै. सं. १.८.४.३) इति मन्त्रवर्णाच्च।) वातजूता वातस्येव जूतो वेगो ययोस्तौ ईदृशावश्वौ रथे यत् यदा अयुक्थाः (युजिर् योगे) अयोजयः तदा वनानि दहतः ते वृषभस्येव दृप्तमहोक्षस्येव रवः शब्दो भवति। आत् किंच धूमकेतुना धूमः केतुः प्रज्ञारूपो यस्य तादृशेन रश्मिना धूमलक्षणेन वा चिह्नेन वनिनः वनसम्बन्धान् वृक्षान् इन्वसि व्याप्नोषि। (इवि व्याप्तौ भौवादिकः) ॥५९॥

O Agni, when to your chariot (rathe) the horse like flames which are burning bright (arushā) golden-coloured (rohitā), and fanned fast by breeze (vātajūtā, viz., vātena preritah, cf. 1,58,4; 1,65,4) are yoked (āyukthāh from 'yujir yoge'), then your roar (rava, from 'ru śabde') resounds like a bull's roar (vṛshabhasyeva). Then (āt), you spread (invasi, from 'ivi vyāptau, cf. *Nirukta,* 3,10) all over, burning the forest-trees (vaninah), with your flames rising in smoke (dhūmaketunā, fire whose banner is smoke). With you as our friend (tava sakhye), we (vayam) will come to no harm (mā rishāma).

(60)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता अग्निः॥

(संहितापाठः)

अध स्वनादुत बिभ्युः पतत्रिणो द्रप्सा यत् ते यवसादो व्यस्थिरन्।
सुगं तत् ते तावकेभ्यो रथेभ्योऽग्ने सख्यो मा रिषामा वयं
तव॥६०॥ (१.९४.११)

(पदपाठः)

अध। स्वनात्। उत। बिभ्युः। पतत्रिणः। द्रप्साः। यत्। ते। यवसऽअदः।
वि। आस्थिरन्॥ सुऽगम्। तत्। ते। तावकेभ्यः। रथेभ्यः। अग्ने। सख्ये।
मा। रिषाम। वयम्। तव॥६०॥

(अन्वयः)

(हे) अग्ने, अथ। स्वनात् पतत्रिणः उत बिभ्युः। ते द्रप्साः यवसादः यत् व्यस्थिरन् तत् ते सुगम्। तावकेभ्यः रथेभ्यः। तव सख्ये वयं मा रिषाम॥

The seer of the mantra is Kutsa, son of Aṅgiras; the metrical form is Jagatī; and the deity addressed is Agni.

(Sāyaṇa)

हे अग्ने। अथ दग्धुं वनप्रवेशानन्तरम्। स्वनात् त्वदीयात् पूर्वोक्तगम्भीरशब्दात्। उतशब्दोऽप्यर्थः। पतत्रिणः पक्षिणोऽपि। बिभ्युः बिभ्यति भयं प्राप्नुवन्ति। उत्पतनेन देशान्तरं गन्तुं समर्थाः पक्षिणोऽपि।

बिभ्युः बिभ्यति भयं प्राप्नुवन्ति। उत्पतनेन देशान्तरं गन्तुं समर्थाः पक्षिणोऽपि यदा भयं प्राप्नुवन्ति, किमु वक्तव्यं अन्येषां तत्रत्यानां वृकादीनां भीतिर्जायत इति। अतस्त्वयि वनं प्रविशति सर्वे प्राणिनो भयं प्राप्नुवन्तीत्यर्थः। तादृशस्य ते तव। द्रप्सा ज्वालैकदेशा। यवसादो यवसानां अरण्ये वर्तमानानां तृणानां अत्तारः। सन्तो। यद् यदा। व्यस्थिरन् विविधमवतिष्ठन्ते। तत् तदा। ते तव। सर्वमरण्यम्। सुगं सुखेन गन्तुं शक्यम्।

(Dinakara)

हे अग्ने अथ ते वनप्रवेशानन्तरं स्वनात् त्वदीयपूर्वोक्तगम्भीरशब्दात् (उतशब्दोऽप्यर्थः) पतत्रिणः पक्षिणः [अपि] बिभ्युः भयं प्राप्नुवन्ति। ते [तव] द्रप्साः ज्वालैकदेशाः यवसादः तृणानामत्तारः सन्तो यत् यदा व्यस्थिरन् विविधमवतिष्ठन्ते तत् तदा वनं ते तव तावकेभ्यः रथेभ्यः त्वदीयरथेभ्यश्च सुगं सुखेन गन्तुं शक्यं भवति। तृणादिदाहादिति भावः ॥६०॥

O Agni, after you enter the forest (adha, chhāndasa form for atha) by the sound produced by you (svanāt) even (uta) the birds that can fly away (patatriṇah) are frightened (bibhyuh)! when you spread in all directions (vyasthiran, 'tishṭhateh', sense of pervasion, vyāpnuvanti) with your hard and widespread flames (drapsāh, Skanda-svāmi takes it in the sense of kaṭhina and bahula-rūpa), burning the grass (yavasādah) on the ground, easy of access (sugam) becomes the entire forest, for you and your chariot-like flames (rathebhyah). When, however, you are friendly towards us (tava sakhye), we have no cause to be harmed by anyone or anything (mā rishāma vayam).

(61)

ऋषिः कुत्सु आङ्गिरसः।
छन्दः जगती।
देवता अग्निः॥

(संहितापाठः)

अयं मित्रस्य वरुणस्य धायसेऽवयातां मरुतां हेळो अद्भुतः।
मृळा सु नो भूत्वेषां मनः पुनरग्ने सख्ये मा रिषामा वयं तव ॥६१॥
(१.९४.१२)

(पदपाठः)

अयम्। मित्रस्य। वरुणस्य। धायसे। अवऽयाताम्। मरुताम्। हेळः।
अद्भुतः॥ मृळ। सु। नः। भूतु। एषाम्। मनः। अग्ने। सख्ये। मा।
रिषाम। वयम्। तव॥६१॥

(अन्वयः)

अयं मित्रस्य वरुणस्य धायसे अवयाताम्। मरुतां हेळः अद्भुतः। अग्ने, नः सुमृळ। एषां मनः पुनः भूतु। तव सख्ये वयं मा रिषाम॥

The seer of the mantra is Kutsa, son of Aṅgirasa; the metrical form is Jagatī; and the deity addressed is Agni.

(Sāyaṇa)

अयम् अग्नेः स्तोता। मित्रस्य अहरभिमानिनो देवस्य। वरुणस्य रात्र्याभिमानिनश्च। सम्बन्धिने। धायसे धारणाय अवस्थापनाय। भवतु। मित्रावरुणौ इममग्नेः स्तोतारं धारयितामित्यर्थः। अवयातां अवस्ताद् गच्छताम्। स्वर्गलोकस्य अधस्तादन्तरिक्षे वर्तमानानाम्। मरुतां एतत्संज्ञानां देवानाम्। हेळः क्रोधः। अद्भुतः महान् भवति। अद्भुत इत्येतन्महन्नाम। तस्मात् क्रोधाद् इममग्नेः स्तोतारं मित्रावरुणौ रक्षतामिति शेषः।

अपि च। नः अस्मान्। हे अग्ने। सु मृळ सुष्ठु मृडय सुखय। एषां मरुताम्। मनश्च। पुनः भूतु पुनरपि प्रसन्नं भवतु। अन्यत् समानम्॥

(Dinakara)

अयम् अग्नेः स्तोता अहरभिमानिनो मित्रस्य रात्र्यभिमानिनो वरुणस्य च धायसे धारणाय अवस्थापनाय भूतु भवतु। अवयातां स्वर्गलोकाद्गच्छतां मरुतां देवानां हेळः क्रोधः अद्भुतः महान् भवति। मित्रावरुणयोः स्थितावन्तरिक्षस्थेभ्यो देवेभ्यो न भयमित्यर्थः। हे अग्ने नः अस्मान् सु मृळ सुष्ठु मृडय सुखयेत्यर्थः। एषां च मरुतां मनः पुनः [भूतु] प्रसन्नं भवतु। (धायसे वहिहाधाञ्भ्यश्छन्दसि (उणा० ४.६७०) इति भावेऽसुन्। निदित्यनुवृत्तौ आतो युक् चिण्कृतोः (पा० ७.३.३३) इति युक्॥६१॥

The devotee of Agni (ayam) seeks also the help (dhāyase, support) of Mitra (the spirit of daylight) and Varuṇa (the spirit of darkness in the night) to escape the wrath (heḷah, *Nirukta,* 3,9; cf 1,24,14; 1,114,4; 1,121,1 etc.) of the Maruts (wind-gods, the life-forces, vital currents) that operate below the surface (avayātām). This wrath is wondrous (adbhutah).

This devotee of Agni (ayam), the seer, seeks to escape (avayātām, from 'yā prāpaṇe' with the suffix 'ava', the sense of 'apagachchhatām') from the

wrath (heḷam, 'krodha' *Nirukta,* 3,9; cf. 1,24,14; 1,114,4 and 1,121,1 etc.) of the Maruts (the wind-gods, life-forces, vital currents), which wrath is wondrous (adbhutam), with the support (dhāyase, from 'dhā', to support and nourish) of Mitra (the spirit of light) and Varuṇa (the spirit of darkness). Agni should help transform (punah, in the sense of turning, and bhūtū for bhavatu) the minds (manah, viz., the intentious) of these Maruts (eshām), and make us (nah) supremely happy (sumṛḷa, from 'mṛḍa sukhane'). With Agni being our friend (sakhye tava), we (vayam) will come to no harm (mā rishāmā).

(62)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता अग्निः॥

(संहितापाठः)

देवो देवानामसि मित्रो अद्भुतो वसुर्वसूनामसि चारुरध्वरे।
शर्मन्त्स्याम तव सप्रथस्तमेऽग्ने सख्ये मा रिषामा वयं तव॥६२॥
(१.९४.१३)

(पदपाठः)

देवः। देवानाम्। असि। मित्रः। अद्भुतः। वसुः। वसूनाम्। असि। चारुः। अध्वरे॥ शर्मन्। स्याम। तव। सप्रथःऽतमे। अग्ने। सख्ये। मा। रिषाम। वयम्। तव॥६२॥

(अन्वयः)

(हे) अग्ने, देवः देवानां अद्भुतः मित्रः असि। चारुः (त्वं) अध्वरे वसूनां वसुः असि। सप्रथस्तमे तव शर्मन् स्याम। तव सख्ये वयं मा रिषाम॥

The seer of the mantra is Kutsa, son of Aṅgirasa; the metrical form is Jagatī; and the deities addressed here is Agni.

(Sāyaṇa)

हे अग्ने। देवो द्योतमानः। त्वं। देवानां सर्वेषाम्। अद्भुतः महान्। मित्रः असि प्रौढः सखा भवसि। तथा। चारुः शोभः। त्वम्। अध्वरे यज्ञे। वसूनां सर्वेषां धनानाम्। वसुरसि। निवासयिता भवसि। अतोऽस्माकं वसूनि देहीत्यर्थः॥

किञ्च। सप्रथस्तमे सर्वतः पृथुतमेऽतिशयेन विस्तीर्णे। त्वत्वत्सम्बन्धिनि। शर्मणि यज्ञगृहे। स्याम वर्तमाना भवेम। अन्यत् पूर्ववत्॥

(Dinakara)

हे अग्ने देवः द्योतमानस्त्वं सर्वेषां देवानामद्भुतः महान् मित्रः असि। तथा वसूनां द्रव्याणां अध्वरे वसुः निवासयिता असि। वसु देहीति भावः। वयं तव त्वत्सम्बन्धिनि सप्रथस्तमे अतिशयेन महति शर्मन् शर्मणि गृहे स्याम वर्तमाना भवेम। यद्वाऽस्मत् तव सुखं भवतु॥६२॥

Agni is hailed here as the most luminous (devah asi, viz., dyotamāna) among all the luminous spirits (devānām) and the most wondrous friend (adbhutah mitrah) of all the luminous spirits. In the journey of life as a sacrifice (adhvare), he is the most connected and fascinating wealth (chāruh vasuh) of all wealths (vasūnām) (cf. 10,91,3 'vasur vasūnām kshayasi'). The seer longs to dwell (syāma) in the most expansive (saprathastame, cf. 5,65,5) abode (śarman, *Nirukta*, 3,13 includes the expression under 'gṛha-nāma'; it also means protection (samrakshaṇe) and refuge (āśraya), as in 1,22,15 'yachchhā nah śarma saprathah') of Agni (tava). Being friendly with Agni (tava sakhye), the seer is assured that he will come to no harm (mā rishāma).

(63)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता अग्निः॥

(संहितापाठः)

तत् ते भद्रं यत्समिद्धः स्वे दमे सोमाहुतो जरसे मृळयत्तमः ।
दधासि रत्नं द्रविणं च दाशुषेऽग्ने सख्ये मा रिषामा वयं तव॥६३॥
(१.९४,१४)

(पदपाठः)

तत्। ते। भद्रम्। यत्। सम्ऽइद्धः। स्वे। दमे। सोमऽआहुतः। जरसे। मृळयत्ऽतमः॥ दधासि। रत्नम्। द्रविणम्। च। दाशुषे। अग्ने। सख्ये। मा। रिषाम। वयम्। तव॥६३॥

(अन्वयः)

अग्ने, स्वे दमे समिद्धः सोमाहुतः जरसे ते तत् भद्रम्। मृळयत्तमः रत्नं द्रविणं च दाशुषे दधासि। तव सख्ये वयं मा रिषाम॥

The seer of the mantra is Kutsa, son of Aṅgirasa; the metrical form is Jagatī; and the deity addressed is Agni.

(Sāyaṇa)

हे अग्ने। ते त्वत्सम्बान्धि। तत् खलु। भद्रं भजनीयम्। प्रशस्तमित्यर्थः। किं पुनस्तत्? स्वे दमे स्वकीय उत्तरवेदिलक्षणे निवासस्थाने। तस्यैव स्वो लोको यदुत्तरवेदी नाभिः। ऐ.ब्रा.१.२८। इति श्रुतेः।

तस्यां उत्तरवेद्यम्। समिद्धः सम्यगिद्धः प्रज्वलितः। सोमाहुतो हुतेन सोमरसेन सन्तर्पितः सन्। जरसे ऋत्विग्भिः स्तूयसे। इति यदस्ति तद् भद्रम् इत्यर्थः। एवं प्रशस्तः त्वम्। मृळयत्तमः अतिशयेन अस्माकं सुखयिता। भूत्वा।

रत्नं रमणीयं कर्मफलम्। द्रविणं धनम्। च। दाशुषे हविर्दत्तवते यजमानाय। दधासि प्रयच्छसि। अन्यत् समानम्॥

(Dinakara)

हे अग्ने यत् त्वं स्वे दमे स्वकीये उत्तरवेदिस्थाने ("तस्यैष स्वो लोको यदुत्तरदेवीनाभिः" (ऐ.ब्रा. १.२८) इति ब्राह्मणे) समिद्धः प्रज्वलितः सोमाहुतः सोमेन सन्तर्पितः अत एव मृळयत्तनः अतिशयेन सुखयिता जरसे ऋत्विग्भिः स्तूयसे तत् ते भद्रं युक्तमित्यर्थः। त्वं दाशुषे यजनानाय रत्नं रमणीयं कर्मफलं द्रविणं धनं च दधासि प्रयच्छसि। (जरतिः स्तुतिकर्मा, व्यत्ययेन कर्मणि कर्तृप्रत्ययः)॥६३॥

O Agni, you are abiding in your own home (sve dame), and you are brilliantly illuminated (samiddhah). We have offered our minds to you (somāhutah), and you are eulogized (jarase from 'jṛīsh stutau; jaratih stutikarma). Such praises are delightful to you (tat te bhadram). Make us supremely happy (mṛḷayattamah); and (cha) bestow (dadhāsi) on the devout one who offers praises to you (dāśushe, from 'dāśṛ dāne') the wealth (draviṇam) that is most satisfying and blissful (ratnam, cf. 4,5,12; 4,12,3; 7,16,6 in the sense of ecstasy, delight). With your friendship (tava sakhye), we have no fear of harm (mā rishāma).

(64)

ऋषिः कुत्स आङ्गिरसः।

छन्दः जगती।

देवता अग्निः॥

(संहितापाठः)

यस्मै त्वं सुद्रविणो ददाशोऽनागास्त्वमदिते सर्वताता।
यं भद्रेण शवसा चोदयासि प्रजावता राधसा ते स्याम॥६४॥
(१.९४.१५)

(पदपाठः)

यस्मै। त्वम्। सुऽद्रविणः। ददाशः। अनागाःऽत्वम्। अदिते। सर्वऽताता॥
यम्। भद्रेण। शवसा। चोदयासि। प्रजाऽवता। राधसा। ते। स्याम॥६४॥

(अन्वयः)

सुद्रविणः अदिते सर्वताता यस्मै अनागास्त्वं त्वं ददाशः, यं भद्रेण शवसा चोदयासि (सः समृद्धो भवति)। प्रजावता ते राधसा स्याम॥

The seer of the mantra is Kutsa, son of Aṅgiras; the metrical form is Jagatī; and the deity addressed is Agni.

(Sāyaṇa)

हे सुद्रविणः शोभनधन। अदिते अखण्डनीय अग्ने। सर्वताता सर्वासु कर्मततिषु। यद्वा सर्वेषु यज्ञेषु वर्तमानाय। यस्मै यजमानाय। अपापत्वम्। पापराहित्येन कर्मार्हताम्। त्वम्। ददाशः प्रयच्छसि। सः यजमानः। समृद्धो भवति।

यं च यजमानम्। भद्रेण भजनीयेन कल्याणेन। शवसा बलेन। चोदयासि संयोजयसि। सोऽपि समृद्धो भवति। वयं च स्तोतारः। प्रजावता प्रजाभिः पुत्रपौत्रैर्युक्तेन। ते राधसा त्वया दत्तेन धनेन युक्ताः। स्याम भवेम॥

(Dinakara)

हे अदिते अखण्डनीयाग्ने त्वं यस्मै यजमानाय सर्वताता सर्वासु कर्मततिषु अनागास्त्वम् अनपराधत्वम् अपापत्वं ददाश प्रयच्छसि सः सुद्रविणः समृद्धो भवति। यं च यजमानं भद्रेण कल्याणेन शवसा बलेन चोदयासि संयोजयसि सोऽपि समृद्धो भवति। [वयं] प्रजावता पुत्रपौत्रैर्युक्तेन ते राधसा त्वया दत्तेन धनेन युक्ताः स्याम। (सर्वाताता सर्वदेवात् (पा० ४.४.१४२) इति तातिल् स्वार्थे)॥६४॥

O Agni, who is altogether immutable (adite, from 'do avakhaṇḍane', na ditih aditih, unfragmented, uninjured) and swift-moving (sudraviṇa, from 'dru gatau'), you are also the all-forming one (sarvatātā, cf. 6,12,2 like yajña, 3,54,19; 4,26,3; 5,69,3 and 6,15,18). You inspire (chodayāsi, from 'chuda preraṇe') the worshipper (yasmai, yam) to acquire sinlessness (anāgāstvam dadāśah, from 'dāśṛ dāne') and equip him with power that is beneficient (bhadreṇa śavasā). May all of us be (syāma) endowed with offsprings (prajāvatah) and opulence bestowed on us by you (te rādhasā, 'rādhah' means obtainment or achievement, cf. 5,13,6; 7,5,8; 7,16,2; 8,103,4 and 10,7,2; 'rādhasā' is "with opulence").



(65)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता अग्निः।। मित्रो वरुणोऽदितिः सिन्धुः पृथिवी द्यौरग्निर्वा।।

(संहितापाठः)

स त्वमग्ने सौभगत्वस्य विद्वानस्माकमायुः प्र तिरेह देव।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ।।६५।।
(१.९४.१६)

(पदपाठः)

सः। त्वम्। अग्ने। सौभगऽत्वस्य। विद्वान्। अस्माकम्। आयुः। प्र। तिर। इह। देव।। तत्। नः। मित्रः। वरुणः। ममहन्ताम्। अदितिः। सिन्धुः। पृथिवी। उत। द्यौः ।।६५।।

(अन्वयः)

देव अग्ने, सः त्वं सौभगत्वस्य विद्वान् इह अस्माकं आयुः प्र तिर। नः तत् (आयुः) मित्रः वरुणः अदितिः सिन्धुः पृथिवी उत द्यौः समहन्ताम्।।

The seer of the mantra is Kutsa, son of Aṅgirasa; the metrical form is Jagatī; and the deity addressed is Agni. Along with Agni are invoked in the latter half of the mantra Mitra, Varuṇa, Aditi, Sindhu, Pṛthivī and Dyauh. This is known as Udarka (prayer for many gods), praised in *Bṛhaddevatā*

(3,126-128) as especial for the sūkta by Kutsa (कुत्सेनोदर्का बहुदैवतेषु). Although his sūkta has Agni as its devatā, the concluding mantra (16th) in the Sūkta has prayer for many devatās. Other seers (seven of them) have also employed the udarka-style (Bharadvāja, Gṛtsamada, Vasishṭha, Nodhāh, Agastya, Vimada and Nābhāka).

(Sāyaṇa)

हे देव दानादिगुणयुक्त अग्ने। सः पूर्वोक्तगुणविशिष्टः त्वम्। सौभगत्वस्य सुभगत्वं सौभाग्यम्। विद्वान् जानन्। इह अस्मिन् कर्मणि। अस्माकम्। आयुः। प्र तिर प्रवर्धय। प्रपूर्वस्तिरतिर्वर्धनार्थः।

त्वया प्रवर्धितम्। नः अस्माकम्। तत् आयुः। मित्रादयः षड्देवताः। ममहन्तां पूजयन्ताम्। रक्षन्तु इत्यर्थः। मित्रः प्रमीतेस्त्राता। वरुणोऽनिष्टानां निवारयिता। अदितिः अदीना अखण्डनीया वा। देवमाता। सिन्धुः स्यन्दनशीलोदकात्मा देवता। पृथिवी प्रथिता भूदेवता। उतेति समुच्चयः। द्यौः प्रकाशमाना द्युलोकात्मा देवता। एताश्च सर्वा अग्निना प्रवर्धितमायुः ममहन्तामिति पूर्वत्रान्वयः॥

(Dinakara)

हे अग्ने देव सः त्वम् अस्माकं सौभगत्वस्य सौभाग्यं विद्वान् इह अस्मिन् कर्मणि लोके च अस्माकम् आयुः प्र तिर वर्धय। (प्रपूर्वस्तिरतिर्वर्धनार्थः। मह पूजायाम्। उतेति समुच्चये। तदिति पठनीयानि पदानि?)॥६५॥ इत्याश्विनशस्त्रसूक्तम्॥

The luminous Agni (deva) is here implored to bestow on us (pratira, *Nirukta* 10,40 pravardhaya, from 'tira' with suffix 'pra', long life (nah āyuh) (cf. 10,59,5), here (iha, in this world 'iha loke'), for he knows for certain (vidvān) what is most auspicious (saubhagatvasya) for us. Along with Agni, may Mitra, Varuṇa, Aditi, Sindhu, Pṛthivī and Dyauh also help prolong our lives (mamahantām, from 'maha pūjāyām').

(66)

ऋषिः कुत्स आङ्गिरसः।
छन्दः त्रिष्टुप्।
देवता अग्निः। अग्निर्द्रविणोदा वा॥

(संहितापाठः)

नू च पुरा सदनं रयीणां जातस्य च जायमानस्य च क्षाम्।
सतश्च गोपां भवतश्च भूरेर्देवा अग्निं धारयन् द्रविणोदाम्॥६६॥
(१.९६.७)

(पदपाठः)

नू। च। पुरा। च। सदनम्। रयीणाम्। जातस्य। च। जायमानस्य। च। क्षाम्॥ सतः। च। गोपाम्। भवतः। च। भूरेः। देवाः। अग्निम्। धारयन्। द्रविणःऽदाम्॥६६॥

(अन्वयः)

नू च पुरा च रयीणां सदनं, जातस्य च जायमानस्य च क्षां, सतश्च भवतश्च भूरेः गोपां द्रविणोदां अग्निं देवाः धारयन्॥

The seer of the mantra is Kutsa, son of Aṅgirasa; the metrical form is Trishṭup; and the deity invoked is Agni (or Draviṇodā-Agni, Agni as the giver of wealth).

(Sāyaṇa)

नू चेति निपातसमुदायोऽद्येत्यस्यार्थे। नू चिदिति निपातः पुराणनवयोर्नू च (नि.४.१७) इति यास्कः। नू च अद्य अस्मिन् काले। पुरा च। रयीणां सर्वेषां धनानाम्। सदनं आवासस्थानम्। जातस्य उत्पन्नस्य कार्यजातस्य। जायमानस्य उत्पद्यमानस्य च। क्षां निवासयितारम्।

सतश्च सर्वत्र विद्यमानस्वभावस्य नित्यस्य च। आकाशादेर्भवतश्च सद्भावं प्राप्नुवतो। भूरेः असंख्यातस्य अन्यस्य च भूतजातस्य। गोपां गोपायितारम्। रक्षितारम्। द्रविणोदां धनप्रदम्। एवं गुणविशिष्टमग्निम्। देवाः। धारयन् हविर्वोढृत्वेन धारयन्ति॥

(Dinakara)

नू च इति निपातः अद्य इत्यर्थे। देवाः नू च अस्मिन् काले पुरा च रयीणां धनानां सदनम् आवासस्थानं, जातस्य उत्पन्नस्य जायमानस्य उत्पद्यमानस्य च क्षां निवासभूतं, सतः विद्यमानस्याकाशादेः भवतः च सद्भावं प्राप्नुवतश्च भूरेः असंख्यातस्य भूतजातस्य गोपां गोपायितारं द्रविणोदां धनप्रदमग्निं धारयन् हविर्वोढृत्वेन धारयन्ति॥६६॥

Agni praised here as the abode (sadanam) of all wealth (rayīṇām, treasures) (nū, a practicle used here, in the sense of 'adya', new 'nava') and also which is available at present was in the past (purā, in the sense of 'purāṇa' ancient) (cf. *Nirukta,* 4,17 नूचिदिति निपातः पुराणनवयोर्नू चेति); as the dwelling place (kshām, from 'kshi nivāsa gatyoh') of whatever is born or has appeared (jātasya, from 'janī prādurbhāve') and whatever is designed to appear in future (jāyamānasya); as the preserver of what exists for all time (satah) and what is transient (bhavatah); and as the protector (gopām, from 'gupū rakshaṇe') of all the innumerable beings (bhūreh) and as the generous gifter of wealth (draviṇodā).

The gods (devāh, the luminous spirits) bear such Agni in themselves (dhārayan), viz., they are but so many manifestations of Agni himself.

(67)

ऋषिः कश्यपो मारीचः।
छन्दः त्रिष्टुप्।
देवता अग्निः। अग्निर्जातवेदा वा॥

(संहितापाठः)

**जातवेदसे सुनवाम सोममरातीयतो नि दहाति वेदः।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं
दुरितात्यग्निः ॥६७॥ (१.९९.१)**

(पदपाठः)

**जातवेदसे। सुनवाम। सोमम्। अरातिऽयतः। नि। दहाति। वेदः॥
सः। नः। पर्षत्। अति। दुःऽगानि। विश्वा। नावाऽइव। सिन्धुम्।
दुःऽइता। अति। अग्निः ॥६७॥**

(अन्वयः)

जातवेदसे सोमं सुनवाम। (सः अग्निः) अरातीयतः वेदः नि दहाति। सः नः विश्वा दुर्गाणि सिन्धुः नावा इव अति पर्षत्। अग्निः दुरिता अति॥

The seer of the mantra is Kaśyapa, son of Marīchi; the metrical form is Trishṭup; and the deity is Agni called Jātaveda.

(Sāyaṇa)

जातवेदसे जातानां उत्पत्तिमतां सर्वेषां वेदित्रे। यद्वा। जातैः सर्वैः प्राणिभिः ज्ञायमानाय जातधनाय जातप्रज्ञाय वा अग्नये। लतारूपं सोमं सुनवाम अभिषुणुयाम। सः अग्निः। अरातीयतः अरातिं शत्रुमिव अस्मान् आचरतः शत्रोः। वेदः धनं। निदहाति नितरां दहतु। भस्मीकरोतु।

अपि च। सः अग्निः। नः अस्मान्। विश्वा विश्वानि सर्वाणि। दुर्गाणि दुर्गमनानि। भोक्तुमशक्यानि दुःखानि। अति पर्षतु अति पारयतु। अतिक्रमय्य दुःखरहितं सुखं प्रापयतु। तत्र दृष्टान्तः। नावेव सिन्धुम्। यथा कश्चित्कर्णधारो ग्राहादिभिर्दुष्टसत्त्वैराकुलितां नदीं नावा तारयति। तद्वत्। तथा। दुरिता दुरितानि। दुःखहेतुभूतानि पापानि अस्मान् अग्निः अति पारयतु। दुःखनिमित्तत्वात् पापात् अपि अस्मानुत्तारयतु इत्यर्थः॥

अत्र निरुक्तम्। जातवेदाः कस्मात्? जातानि वेद। जातानि वैनं विदुः। जातेजाते विद्यत इति वा। इत्यादि॥(७, १९)

(Dinakara)

वयं जातानां वेदित्रे जातवेदसेऽग्नये सोमं सुनवाम अग्निं [यष्टुम्] अभिषुणुयाम। सोऽग्निः अरातीयतः शत्रोः वेदः धनं नि दहाति निदहतु। सोऽग्निः नः अस्माकं विश्वा सर्वाणि दुर्गाणि दुर्गमनानि दुःखानि तथा दुरिता दुःखहेतुभूतानि पापानि च अति पर्षत् अतिपारयतु। नावा इव, कर्णधारः सिन्धुं सत्त्वैराकुलितां नदीं नावा तारयति। (अत्र निरुक्तम् "जातवेदाः कस्मात् जातानि वेद जातानि वैनं विदुर्जाते जाते विद्यत इति वा जातवित्तो वा जातधनो वा जातविद्यो वा जातप्रज्ञो वा। यत्तज्जातः पशूनविन्दतेति तज्जातवेदसो जातवेदस्त्वमिति हि ब्राह्मणम्" (निरु. ७.१९)। अरातीयतः उपमानादाचारे (पा० ३.१.१०) इति क्यच्)॥६७॥

Agni is called Jātavedas, because he is at once cognizant (veda) of everything that has come into existence (jātānī), or because he is the one that all beings (jātāni) would be aware of (enam viduh). Let us press our minds in his direction (somam sunavāma; soma is the wine of delight or mind as

interpreted by Ānanda-tīrtha; and the pressing of this wine of delight is meant by 'sunvatah' in 8,38,8; and 'sunvate' in 5,26,5 and 6,16,5). Agni should burn up (ni dahāti, from 'daha bhasmīkaraṇe') the wealth of wisdom (veda, from vidlṛ lābhe', vidyate, labhyate iti) of those who are ill-disposed towards us (arātīyatah, lit. 'treating us like enemies, aratim iva ācharati asmān; 'rāti' is charity or dānam, 'arātī' is one in whom charity does not exist). May this Agni ferry us across (ati parshat, from 'pṛī pālana-pūraṇayoh') all our unbearable sufferings (viśvā durgāṇi, from 'gamlṛ gatau', duhkhena gamyate eshu), even as the boat helps us go across the wide and difficult river (nāvā iva sindhum). Let Agni take us beyond (ati) all sins (duritāni).

(68)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता विश्वेदेवाः॥

(संहितापाठः)

इन्द्रं मित्रं वरुणमग्निमूतये मारुतं शर्धो अदितिं हवामहे।
रथं न दुर्गाद् वसवः सुदानवो विश्वस्मान्नो अंहसो
निष्पिपर्तन॥६८॥ (१.१०६.१)

(पदपाठः)

इन्द्रम्। मित्रम्। वरुणम्। अग्निम्। ऊतये। मारुतम्। शर्धः। अदितिम्।
हवामहे॥ रथम्। न। दुःऽगात्। वसवः। सुऽदानवः। विश्वस्मात्। नः।
अंहसः। निः। पिपर्तन॥६८॥

(अन्वयः)

वयं ऊतये इन्द्रं मित्रं वरुणं अग्निं मारुतं शर्धः अदितिं हवामहे। वसवः सुदानवः दुर्गात् रथं न नः विश्वस्मात् अंहसः निष्पिपर्तन॥

The seer of the mantra is Kutsa, son of Aṅgirasa; the metrical form is Jagatī; and the deity is Viśvedevāḥ.

(Sāyaṇa)

ऊतये रक्षणाय। वयम्। इन्द्रादीन्। मारुतम्। शर्धो मरुत्समूहरूपं बलम्। च। हवामहे आह्वयामहे।

वसवो निवासयितारः। सुदानवः शोभनदाना इन्द्रादयः। विश्वस्मात् सर्वस्मात्। अंहसः पापात्। नः अस्मान्। निष्पिपर्तन निर्गमय्य पालयत। तत्र दृष्टान्तः। रथं न दुर्गात्। गुन्तमशक्यान् निम्नोन्नतात् स्थानात् सारथयो यथा रथं पालयन्ति। तद्वत्।

(Dinakara)

(कूपे पतितः कुत्सः प्रार्थयते। सप्तर्चं वैश्वदेवम्।) वयम् इन्द्रादीन् ऊतये रक्षणाय हवामहे आह्वयामहे। मारुतं शर्धः बलं च हवामहे आह्वयामहे। [हे] वसवः निवासयितारः सुदानवः शोभनदाना इन्द्रादयः विश्वस्मात् सर्वस्मात् अहंसः पापात् नः अस्मान् निष्पिपर्तन निर्गमय्य पालयत। यथा दुर्गात् दुर्गमात् स्थलात् सारथयो रथं निर्गमय्य पालयन्ति। (न इवार्थे। पिपर्तन तप्तनप्तनथनाश्च (पा० ८.१.४५) इति तनबादेशः) ॥६८॥

For our protection (ūtaye), we invoke (havāmahe) Indra, Mitra, Varuṇa, Agni, the collective strength of the Maruts (mārutam sardhah, cf. *Nirukta,* 3,9; cf. 1,139,1 'śardho divyam', also 3,19,4 and 7,44,5 'daivyam śardho'), Aditi. These gods who afford abodes for us (vasavah from 'vasa nivāse') and who give us auspicious gifts (sudānavah) ferry us across (nishpipartana) all the sins (viśvasmāt amhasah), even as (na) the competent charioteer takes the chariot (ratham) safely across ditches and bumps.

(69)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता अग्निः॥

(संहितापाठः)

त आदित्या आ गता सर्वतातये भूत देवा वृत्रतूर्येषु शंभुवः।
रथं न दुर्गाद् वसवः सुदानवो विश्वस्मान्नो अंहसो
निष्पिपर्तन ॥६९॥ (१.१०६.२)

(पदपाठः)

ते। आदित्याः। आ। गत। सर्वऽतातये। भूत। देवाः। वृत्रऽतूर्येषु।
शम्ऽभुवः॥ रथम्। न। दुःऽगात्। वसवः। सुऽदानवः। विश्वस्मात्। नः।
अंहसः। निः। पिपर्तन॥६९॥

(अन्वयः)

(हे) आदित्याः देवाः, ते सर्वतातये आगत। वृत्रतूर्येषु शंभुवः भूत। दुर्गात् रथं न वसवः सुदानवः नः विश्वस्मात् अंहसः निष्पिपर्तन॥

The seer of the mantra is Kutsa, son of Aṅgirasa; the metrical form is Jagatī; and the deity Viśvedevāḥ.

(Sāyaṇa)

हे आदित्याः अदितेः पुत्राः। देवाः। ते यूयम्। सर्वतातये सर्वैः वीरपुरुषैः तताय विस्तारिताय युद्धाय। युद्धेऽस्माकं साहाय्यं कर्तुं इत्यर्थः। आ गत आगच्छत। अपि च। वृत्रतूर्येषु संग्रामनामैतत्। संग्रामेषु। शंभुवः सुखस्य भावयितारो। भूत भवत॥

(Dinakara)

हे आदित्याः देवाः ते यूयं सर्वतातये सर्वैर्वीरपुरुषैस्तताय विस्तारिताय युद्धाय युद्धे साहाय्यं कर्त्तुमित्यर्थः आ गत आगच्छत। अपि च वृत्रतूर्येषु (संग्रामनामैतत्) युद्धेषु शंभुवः सुखस्य भावयितारः भूत भवत। (गमेर्लोटि, बहुलं छन्दसि (पा० २.४.७३) इति शपो लुक्) ॥६९॥

O ye offsprings of Aditi (the gods), luminous spirits, do come all of you (ā gata) to help in all of my activities (sarvatātaye, viz., 'sarvāsu karmatatishu', *Nirukta,* 11,24), and be (bhūta) causes of our happiness (śambhuvah) in our struggle with our adversories (vṛtra-tūryeshu, 'in piercing the coverers', cf. 6,13,1; 8,19,20; 8,74,9 and 12). Take us across difficult terrain (durgāt), as a chariot does (ratham na). Afford us abodes (vasavah) and bestow on us valuable gifts (sudānavah). Make us (nah) tide over (nishpipartana) all sins (viśvasmāt amhasaḥ).

(70)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता विश्वेदेवाः॥

(संहितापाठः)

अवन्तु नः पितरः सुप्रवाचना उत देवी देवपुत्रे ऋतावृधा ।
रथं न दुर्गाद् वसवः सुदानवो विश्वस्मान्नो अंहसो
निष्पिपर्तन ॥७०॥ (१.१०६.३)

(पदपाठः)

अवन्तु। नः। पितरः। सुऽप्रवाचनाः। उत। देवी इति। देवपुत्रे इति
देवऽपुत्रे। ऋतऽवृधा॥ रथम्। न। दुःऽगात्। वसवः। सुऽदानवः।
विश्वस्मात्। नः। अंहसः। निः। पिपर्तन॥७०॥

(अन्वयः)

सुप्रवाचनाः पितरः नः अवन्तु। उत देवपुत्रे ऋतावृधा देवी दुर्गात् रथं न वसवः सुदानवः नः विश्वस्मात् अंहसः निष्पिपर्तन॥

The seer of the mantra is Kutsa, son of Aṅgirasa; the metrical form is Jagatī; and the deity Viśvedevāḥ.

(Sāyaṇa)

नः अस्मान्। पितरः अग्निष्वात्तादयः। अवन्तु रक्षन्तु। कीदृशा ? सुप्रवाचनाः सुखेन प्रवक्तुं स्तोतुं शक्याः। उत अपि । च। देवपुत्रे देवाः सर्वे पुत्रस्थानीया ययोः ते। ऋतावृधाः। ऋतस्य सत्यस्य यज्ञस्य वा। वर्धयित्र्यौ। देवी देवनादिगुणयुक्ते द्यावापृथिव्यौ। अस्मान्। रक्षताम्। अन्यत् समानम्॥

(Dinakara)

सुप्रवाचनाः सुखेन प्रवक्तुं स्तोतुं शक्याः पितरः अग्निष्वात्तादयः नः अस्मान् अवन्तु रक्षन्तु। उत अपि च देवपुत्रे सर्वे देवाः पुत्रस्थनीयाः ययोस्ते ऋतावृधा ऋतस्य यज्ञस्य वा वर्धयित्र्यौ देवी द्यावापृथिव्यौ च नः रक्षतम्। (ऋतावृधा वृधेरन्तर्भावितण्यर्थे क्विप्। सुपां सुलुक् (पा० ७.१.३९) इति विभक्तेराकारः ॥७०॥

May the ancestral spirits (pitarah), who are easily pleased by articulated praises (supravachanāh, viz., sustutayah) protect us (avantu nah). So too (uta) may the parental spirits, Sky and Earth (devī, viz., dyāvā-pṛthivī, called 'pitarau' and 'progenitors', janitrī, cf. 7,97,8 'devī devasya rodasī janitrī') who have all the gods as their offsprings (devaputre, bahuvrīhi compound 'devāh putrāh yayos te') and who are promoters of truth (ṛtāvṛdhā, from 'vṛdhu vṛddhau') protect us. These gods who are generous in their gifts (sudānavah) and find for us good abodes (vasavah), will steer us clear (nishpipartana) from all sin (viśvasmāt amhasah), like the charioteer who will safely take his chariot through difficult passages (ratham na).



(71)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता विश्वेदेवाः॥

(संहितापाठः)

**नराशंसं वाजिनं वाजयन्निह क्षयद्वीरं पूषणं सुम्नैरीमहे।
रथं न दुर्गाद् वसवः सुदानवो विश्वस्मान्नो अंहसो
निष्पिपर्तन॥७१॥ (१.१०६.४)**

(पदपाठः)

**नाराशंसम्। वाजिनम्। वाजयन्। इह। क्षयत्ऽवीरम्। पूषणम्। सुम्नैः।
ईमहे॥ रथम्। न। दुःऽगात्। वसवः। सुऽदानवः। विश्वस्मात्। नः।
अंहसः। निः। पिपर्तन॥७१॥**

(अन्वयः)

नराशंस वाजिनं वाजयन् इह क्षयद्वीरं पूषणं सुम्नैःईमहे। दुर्गात् रथं न वसवः सुदानवः नः विश्वस्मात् अंहसः निष्पिपर्तन॥

The seer of the mantra is Kutsa, son of Aṅgirasa; the metrical form is Jagatī; and the deity invoked is Viśvedevāh.

(Sāyaṇa)

नराशंसं नरैः शंसनीयम्। वाजिनं अन्नवन्तं अग्निम्। वाजयन् उपवाजयन् प्रज्वलयन्। इह अस्मिन्काले। स्तौमीति शेषः। तथा। क्षयद्वीरं अतिबलिनम्। यस्मिन् सर्वे वीराः क्षीयन्ते। एवंरूपम्। पूषणं पोषकं देवम्। सुम्नैः सुखकरैः स्तोत्रैः हेतुभूतैः। ईमहे याचामहे। अभीष्टं प्रार्थयामहे॥

(Dinakara)

नराशंसं नरैः शंसनीयं वाजिनम् अन्नवन्तम् अग्निं वाजयन् उपवाजयन् प्रज्वलयन् इह अस्मिन् काले स्तौमीति शेषः। तथा क्षयद्वीरम् अतिबलिनं यस्मिन् सर्वे वीराः क्षीयन्ते एवंरूपं पूषणं पोषकं देवं सुम्नैः सुखकरैः ईमहे याचामहे। अभीष्टमिति शेषः॥७१॥

We invoke (Īmahe, from 'iṅg gatau' *Nirukta* 3,19) now (iha), offering our prayers and praises to him (vājayan, 'stutyarthah', 'archatikarma' *Nirukta,*3,19) with our delightful hymns (sumnaih, *Nirukta* 3,13) Agni who is praised by all human beings (narāśaṁsam, according to Śākapūṇi, Agni; according to Kātthakya, Yajña, *Nirukta,* 8,7; cf. 7,2,2), who is full of nourishment for us (vājinam, from 'vāja', anna, food, *Nirukta,*3,9) in whom the valiant rest (kshayadvīram, from 'kshi nivāse'), and who is the protector of all (pūshaṇam). Finding abodes for us (vasavah) and being generous with their valuable gifts (sudānavah) they carry us across (nishpipartana) all sins (viśvasmāt amhasah), like the competent charioteer (ratham na) leads the chariot safely through difficult stretches (durgāt).



(72)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता विश्वेदेवाः॥

(संहितापाठः)

बृहस्पते सदमिन्नः सुगं कृधि शं योर्यत् ते मनुर्हितं तदीमहे।
रथं न दुर्गाद् वसवः सुदानवो विश्वस्मान्नो अंहसो
निष्पिपर्तन॥७२॥ (१.१०६.५)

(पदपाठः)

बृहस्पते। सदम्। इत्। नः। सुऽगम्। कृधि। शम्। योः। यत्। ते
मनुःऽहितम्। तत्। ईमहे॥ रथम्। न। दुःऽगात्। वसवः। सुऽदानवः।
विश्वस्मात्। नः। अंहसः। निः। पिपर्तन॥७२॥

(अन्वयः)

बृहस्पते, सदामित् नः सुगं कृधि। मनुर्हितं शं योः यत् तत् ईमहे। दुर्गात् रथं न वसवः सुदानवः नः विश्वस्मात् अंहसः निष्पिपर्तन॥

The seer of the mantra is Kutsa, son of Aṅgirasa; the metrical form is Jagatī; and the deity invoked is Viśvedevāḥ.

(Sāyaṇa)

बृहस्पते। सदमित् सदैव। नः अस्माकम्। सुगम्। सुखनामैतत्। सुखम्। कृधि कुरु। अपि च। ते तव। स्वभूतम्। शं शमनीयानाम् रोगाणां उपशमनम्। योः पृथक्कर्तव्यानाम् भयानाम्। यावनं पृथक्करणम्। मनुर्हितं मनुना ब्रह्मणा हितं त्वयि अवस्थापितम्। यद्वा। मनुष्याणामनुकूलम्। एवंविधं शमनं यावनं च यदस्ति। तदीमहे याचामहे॥

(Dinakara)

हे बृहस्पते त्वं सदमित् सदैव नः अस्माकं सुगं सुखं कृधि कुरु। अपि च ते तव यत् स्वभूतं शं रोगाणामुपशमनं योः भयानां पृथक्करणं मनुर्हितं मनुना ब्रह्मणा हितं त्वयि अवस्थापितं, यद्वा मनुष्याणामनुकूलं, यत् अस्ति तदीमहे याचामहे। (सुष्ठु गम्यतेऽस्मिन्निति सुगम्। सुदुरोरधिकरणे (वा० ३.२.४८) इति गमेर्डः। शंयोरित्येतत् पदद्वयं यास्केनैवं व्याख्यातं "शमनं च रोगाणां यावनं च भयानाम्" (नि० ४.२१ इति)॥७२॥

Bṛhaspati is here implored (īmahe) to make for us (kṛdhi) uninterrupted delight (sugam), which is also beneficial for human beings (manurhitam, from 'mana avabodhane', "to think and know") and what removes diseases and eliminates fears (śamyoh, 'sukham yuh', rogāṇām śamanam yāvanam bhayānām, *Nirukta,* 4,21). May the gods who afford proper abodes for us (vasavh) and who give us valuable gifts (sudānavah) take us beyond (nishpipartana) all evil (viśvasmāt amhasah), even as a chariot (ratham na) is taken safely across difficulties (durgāt) by the charioteer.

Note: 1. The word 'sugam' is interpred as 'sukha-nāma' by Skandasvāmi, citing 1,102,4. *Bṛhaddevatā* 7,65, however, takes it in the sense of good path', 'sobhanam mārgam'.

देवयानान् सुगान् पथः कुरुष्व सुमनाः स्वयम्।

"The path which is easy for gods to travel": the word is explained as 'sushṭhu gantavyam' or 'sushṭhu gamyate asmin'. cf. 2,23,7 (पथः सुगं नो)

2. 'sadamit': Yāska (*Nirukta*, 4,19) takes the word as 'always' (sarvadā) citing 1,89,1. Sāyaṇa gives it as synonymous with two words 'sadā' (sadam) 'eva' (it) सदैव।

3. 'Śamyu' means 'sukha'; it is also the name of Bṛhaspati's son. *Taittirīya-samhitā* (2,6,10,2) has तच्छं योरावृणीमहे।

(73)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता विश्वेदेवाः॥

(संहितापाठः)

इन्द्रं कुत्सो वृत्रहणं शचीपतिं काटे निबाळ्ह ऋषिरह्वदूतये।
रथं न दुर्गाद् वसवः सुदानवो विश्वस्मान्नो अंहसो
निष्पिपर्तन॥७३॥ (१.१०६.६)

(पदपाठः)

इन्द्रम्। कुत्सः। वृत्रऽहनम्। शचीऽपतिम्। काटे। निऽबाळ्हः। ऋषिः।
अह्वत्। ऊतये॥ रथम्। न। दुःऽगात्। वसवः। सुऽदानवः। विश्वस्मात्।
नः। अंहसः। निः। पिपर्तन॥७३॥

(अन्वयः)

काटे निबाळ्हः कुत्सः ऋषिः ऊतये वृत्रहणं शचीपतिं इन्द्रं अह्वत्। दुर्गात् रथं न वसवः सुदानवः नः विश्वस्मात् अंहसः निष्पिपर्तन॥

The seer of the mantra is Kutsa, son of Aṅgirasa; the metrical form is Jagatī; and the deity addressed is Viśvedevāḥ.

(Sāyaṇa)

काट इति कूपनाम तस्मिन्। निबाळ्हः निपातितः। कुत्स ऋषिः। ऊतये रक्षणाय। इन्द्रम्। अह्वत् आह्वयति स्म। कीदृशम्? वृत्रहणं वृत्राणां शत्रूणां हन्तारम्। शचीपीतम् कर्मनाम। सर्वेषां कर्माणां पालयितारम्। यद्वा। शच्या देव्या भर्तारम्॥

(Dinakara)

काटे कूपे निबाळ्हः निपातितः कुत्सः ऋषिः ऊतये रक्षणाय इन्द्रम् अह्वत् आह्वयति स्म। कीदृशं, वृत्रहणं वृत्राणां हन्तारन्। शच्याः पतिं शचीपतिम् यद्वा शचीति कर्म नाम कर्मणां पालयितारम्। (निबाळ्हः बाहृ प्रयत्ने नीत्युपसर्गवशात् पतने वर्तते। अह्वत् लिपिसिचिह्वश्च (पा० ३.१.५३) इति लुङि च्लेरङादेशः। आतो लोप (पा० ६.४.६४) इत्याकारलोपः) ॥७३॥

The sage (ṛshi) Kutsa invoked with hymns (ahvat, from 'hve śabde') Indra, who is the vanquisher of the adversaries (vṛtrahaṇam, from 'hana hiṁsāyām'; vṛtra is the coverer or ignorance, Indra is the one who eliminates darkness or ignorance), and the lord of knowledge (śachīpatim), when the sage was thrown (nibāḷhah) into a well (kāṭe, kūpe, *Nirukta* 3,19). May the gods who afford abodes for the devout (vasavah) and who give generous gifts (sudānavah) carry us (nah) across (nishpipartana) all evil (viśvasmāt aṁhasah), even as the chariot (ratham na) will, when steered by the charioteer safely across a difficult terrain (durgāt).

Notes : 1. Śachīpati: *Nirukta* includes the word 'śachi' under names of speech (vāṅg-nāma) (2,23,), under names of ceremonial action (karma-nāma) (3,1) and under names of wisdom or knowledge (prajñā-nāma) (3,13). Indra is thus the lord of prayers and praises (stuti-rūpa-vāk), the last sense agrees with vṛtrahaṇam, one who vanquishes ignorance.

2. nibāḷhah, from 'bāhya prayatne', with the prefix 'ni' in the sense of excessively (atiśaya, prakarsha), thus meaning that which hurts excessively (atiśayena bādhyate asau). When the prefix 'ni' is taken in the sense of falling (patana), the word means 'thrown into', especially with the association of the word 'kāṭe' (viz., in the well, kūpe).

(A variant ṛk numbered 73)

ऋषिः कुत्स आङ्गिरसः।
छन्दः त्रिष्टुप्।
देवता विश्वेदेवाः॥

(संहितापाठः)

देवैर्नो देव्यदितिर्नि पातु देवस्त्राता त्रायतामप्रयुच्छन्।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत
द्यौः ॥७३॥ (१.१०६.७)

(पदपाठः)

देव्यैः। नः। देवी। अदितिः। नि। पातु। देवः। त्राता। त्रायताम्।
अप्रऽयुच्छन्॥ तत्। नः। मित्रः। वरुणः। ममहन्ताम्। अदितिः। सिन्धुः।
पृथिवी। उत। द्यौः ॥७३॥

(अन्वयः)

देवी अदितिः देवैः नः नि पातु। देवः त्राता अप्रयुच्छन् त्रायताम्। नः तत् मित्रः वरुणः अदितिः सिन्धुः पृथिवी उत द्यौः ममहन्ताम्।

The seer of the mantra is Kutsa, son of Aṅgirasa; the metrical form is Trishṭup; and the deity addressed is Viśvedevāh.

(Sāyaṇa)

देवी। दानादिगुणयुक्ता। अदितिः अखण्डनीया अदीना वा। देवमाता। देवैः दानादिगुणयुक्तैः स्वकीयैः पुत्रैः सह। नः अस्मान्। नि पातु नितरां रक्षतु। देवो दीप्यमानः। त्राता सर्वेषां रक्षकः। सविताप्रयुच्छन् अप्रमाद्यन्। अस्मद्रक्षणे जागरूकः सन्। त्रायताम्। अस्मान् पालयतु।

यदनेन सूक्तेनास्माभिः प्रार्थितः नोऽस्मदीयं तन्मित्रादयः षड्देवताः। ममहन्तां पूजयन्तु॥

(Dinakara)

अदितिः देवी देवमाता देवैः पुत्रैः सह नः अस्मान् नि पातु रक्षतु। देवः दीप्यमानः त्राता सर्वेषां रक्षकः सविता अप्रयुच्छन् अप्रमाद्यन् नः त्रायतां पालयतु। (त्रैङ् पालने। अप्रयुच्छन् युच्छ प्रमादे। ऋग्विधानेऽस्य प्रयोगः – "जपन्निन्द्रमिति स्नातो वैश्वदेवं तु सप्तकम्। मुच्यते जुहुयादाज्यं विश्वस्मादेव सोंऽहसः" (ऋग्वि० १.२७-२८) इति) ॥७६॥

May the divine Aditi (the unfragmented spirit, *Nirukta* 4,22, 'aditir adīnā devamātā') along with all the luminous spirits who are her offsprings (devaih) protect us perfectly (nah ni pātu, from 'pā rakshaṇe'). May the god Savitṛ who is luminous (devah) and who is the protector of all (trātā), protect us trāyatām, from 'traing pālane') being ever wakeful and watchful (aprayuchchhan, from 'yuchcha pramāde'). May the gods Mitra, Varuṇa, Aditi, Sindhu, Pṛthivī and (uta) Dyauh preserve us (mamàhantām).



(74)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता रुद्रः॥

(संहितापाठः)

इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतीः।
यथा शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे
अस्मिन्ननातुरम्॥७४॥ (१.११४.१)

(पदपाठः)

इमाः। रुद्राय। तवसे। कपर्दिने। क्षयत्ऽवीराय। प्र। भरामहे। मतीः॥
यथा। शं। असत्। द्विऽपदे। चतुःऽपदे। विश्वम्। पुष्टम्। ग्रामे। अस्मिन्।
अनातुरम्॥७४॥

(अन्वयः)

तवसे कपर्दिने क्षयद्वीराय रूद्राय इमा मतीः प्र भरामहे। यथा द्विपदे चतुष्पदे शं असत् अस्मिन् ग्रामे विश्वं अनातुरं पुष्टम् (भवतु)॥

The seer of the mantra is Kutsa, son of Aṅgirasa; the metrical form is Jagatī; and the deity invoked is Rudra.

(Sāyaṇa)

रुद्राय। रोदयति सर्वं अन्तकाले इति रुद्रः। यद्वा। रुत्संसाराख्यं दुःखं, तद्द्रावयति अपगमयति विनाशयतीति रुद्रः। यद्वा रुतः शब्दरूपा उपनिषदः, ताभिर्द्रूयते गम्यते प्रतिपाद्यते इति रुद्रः।.... तस्मै। मतीः मननीया इमा स्तुतीः। प्र भरामहे प्रकर्षेण निष्पादयामः। कीदृशाय ? तवसे प्रवृद्धाय। कपर्दिने जटिलाय। क्षयन्तः प्राप्तैश्वर्या वीरा मरुद्गणाः पुत्राः यस्य तस्मै।

यथा येन प्रकारेण। शं शमनीयानां रोगाणां उपशमनम्। द्विपदे अस्मदीयाय मनुष्याय। चतुष्पदे गवाश्चप्रभृतये। च। असत् भवेत्। तेन प्रकारेण। स्तुतीः कुर्म इत्यर्थः। अतः अस्मिन्। अस्मदीये ग्रामे वर्तमानम्। विश्वं सर्वं प्राणिजातम्। अनातुरम्। आतुरा रुग्णाः तैरहितं सत्। पुष्टं प्रवृद्धम्। भवतु।

(Dinakara)

वयं तस्मै प्रसिद्धाय तवसे प्रवृद्धाय कपर्दिने जटिलाय क्षयद्वीराय क्षपितप्रतिपक्षाय रुद्राय मतीः मननीयाः इमाः स्तुतीः प्र भरामहे प्रकर्षेण निष्पादयामः। यथा द्विपदे अस्मै मनुष्याय चतुष्पदे गवाश्वप्रभृतये च शं कल्याणं असत् भवेत्। यथा च अस्मिन् अस्मदीये ग्रामे सर्वं प्राणिजातम् अनातुरं रोगरहितं पुष्टं च भवेत् [तथा] स्तैमीत्यर्थः। (तवसे तवतिर्वृद्ध्यर्थः। असत् अस भुवि लेटि अडागमः। इतश्च लोपः (पा० ३.४.९७) इति इकारलोपः) ॥७४॥

We fondly carry in our hearts (pra bharāmahe) these devout thoughts (imāh matīh, *Nirukta* 3,19 'archatikarma') to Rudra, who is mighty (tavase, from 'tava urddhyarthe', *Nirukta* 3,9 'bala-nāma) and who wears braided locks (kapardine). By so doing, we intend securing happiness (śam, *Nirukta* 3,13, sukha-nāma, elimination of diseases, 'rogāṇām śamanam' and as from 'as' bhuvi bhavet (sāyaṇa) or bhavati (Skanda-svāmi;) for all human beings (dvipade, bipeds) and animals (chatushpade, quadrupeds). In the village where we live (asmin grāme) let all beings (viśve) be free from ailments (anāturam) and be well-nourished (pushṭam, from 'pusha pushṭau').

The expression Rudra (from 'rudir aśru-vimochane', "to cry") has been variously explained. Yāska derives the word from 'rauti', roars like a thundering cloud (stanayitnu-śabdam karoti), 'rorūyamāṇo dravati', thundering he moves among the clouds, and 'rodayater vā', he makes the enemies cry. Sāyaṇa has these explanations:

1. रोदयति सर्वमन्तकाले ॥ He makes all beings cry when the end is near.

2. रुत्संसाराख्यं दुःखं द्रावयति अपगमयति ॥ He drives away the distress of phenomenal existence.

3. रुतः शब्दरूपा उपनिषदः । ताभिर्द्रयंते गम्यते प्रतिपद्यते ॥ The sound (ruta) refers to the Upanishads; He is reached by these texts.

4. रुत् शब्दात्मिका वाणी तत्प्रतिपाद्यात्मविद्या वा, तामुपासकेभ्यो राति ददाति ॥ The sound (rut) is the divine speech, which conveys the knowledge of the Self to the devotee.

5. रुणद् व्यावृव्यावृणोतीति, रुदन्धकारादि, तद्वृणाति विदारयीति ॥ Darkness is stressful (ruṇad); and He destroys it.



(75)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता रुद्रः॥

(संहितापाठः)

मृळा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते।
यच्छं च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु॥७५॥
(१.११४.२)

(पदपाठः)

मृळ। नः। रुद्र। उत। नः। मयः। कृधि। क्षयत्ऽवीराय। नमसा। विधेम।
ते॥ यत्। शम्। च। योः। च। मनुः। आऽयेजे। पिता। तत्। अश्याम।
तव। रुद्र। प्रऽनीतिषु॥७५॥

(अन्वयः)

(हे) रुद्र, नः मृळ। उत नः मयः कृधि। (वयं च) क्षयद्वीराय ते नमसा विधेम। हे रुद्र, पिता मनुः शं योश्च यत् आयेजे तत् तव प्रणीतिषु अश्याम॥

The seer of the mantra is Kutsa, son of Aṅgirasa; the metrical form is Jagatī; and the deity invoked is Rudra.

(Sāyaṇa)

हे रुद्र। नः अस्मभ्यम् अस्मदर्थम्। मृळ त्वं सुखयिता भव। उत अपि च। तदनन्तरम्। नः अस्माकं। मयः सुखम्। कृधि कुरु। वयं च। क्षयद्वीराय क्षपितसर्ववीरम्। प्राप्तैश्वर्यैर्मरुद्भिर्युक्तं वा। ते त्वाम्। नमसा हविर्लक्षणेन अन्नेन। नमस्कारेण वा। परिचरेम विधातिः परिचरणकर्मा।

अपि च। पिता उत्पादकः। मनुः। स्वकीयेभ्यः प्रजाभ्यः। शं रोगाणां शमनम्। योः च भयानां यावनं च। यदेतत् द्वयम्। आयेजे देवेभ्यः सकाशात् प्राप्य दत्तवान्। हे रुद्र। तव प्रणीतिषु प्रकृष्टनयनेषु। सत्सु। तत् वयम्। अश्याम व्याप्नुवाम॥

(Dinakara)

हे रुद्र त्वं नः अस्मान् मृळ मुखय। उत अपि च नः अस्माकं मयः सुखं कृधि कुरु। वयं क्षयद्वीराय क्षपितप्रतिपक्षाय ते तुभ्यं नमसा नमस्कारेण विधेम परिचरेम। अपि च हे रुद्र पिता उत्पादकः मनुः यत् शं रोगाणां शमनं योश्च भयानां यावनं च आयेजे स्वप्रजाभ्यो दत्तवान् तत् तव प्रणीतिषु प्रकृष्टनयनेषु सत्सु अश्याम व्याप्नुवाम॥७५॥

O Rudra, be gracious towards us (mṛḷa nah, from 'mṛḷa sukhane, sukhayitā bhava), and (uta) make us happy (mayah kṛdhi; *Nirukta* 3,13 'sukha-nāma'). For you (te) the vanquisher of valiant adversaries (kshayad virāya), we offer (vidhema from 'vidha vidhāne') our prostrations (namasā). O Rudra, our progenitor (pitā), Manu (the first man) brought for his offsprings (ā yeje, from 'yaja deva-pūja-saṅgatikaraṇa-dāneshu', by his worshipful penance) well-being (śam, elimination of ailments, rogāṇām śamanam) and freedom from anxiety (yoh, bhāya-rāhityam). May it be given to us to enjoy (aśyāma), from 'aśū vyāptau') both these benefits (yat, tat), so that we focuss our attention on your directions (tava praṇītishu, from 'ṇiṅg prāpaṇe')

(76)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता अग्निः॥

(संहितापाठः)

अश्याम ते सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः।
सुम्नायन्निद् विशो अस्माकमा चरारिष्टवीरा जुहवाम ते
हविः॥७६॥ (१.११४.३)

(पदपाठः)

अश्याम। ते। सुऽमतिम्। देवऽयज्यया। क्षयत्ऽवीरस्य। तव। रुद्र।
मीढ्वः॥ सुम्नऽयन्। इत्। विशः। अस्माकम्। आ। चर। अरिष्टऽवीराः।
जुहवाम। ते। हविः॥७६॥

(अन्वयः)

मीढ्वः रुद्र, क्षयद्वीरस्य तव सुमतिं ते देवयज्यया अश्याम। (त्वं च)। अस्माकं विशः सुम्नयन् इत् आ चर। अरिष्टवीराः ते हविः जुहवाम॥

The seer of the hymn is Kutsa, son of Aṅgirasa; the metrical form is Jagatī; and the deity addressed is Rudra.

(Sāyaṇa)

हे। मीढ्वः सेक्तः कामाभिवर्षक। नित्यतरुण वा। रुद्र। क्षयद्वीरस्य क्षपितप्रतिपक्षस्य। मुरुद्भिर्युक्तस्य वा। तव। सुमतिं शोभनां कल्याणीं अनुग्रहात्मिकां बुद्धिम्। ते त्वत्सम्बन्धिनो। वयम्। देवयज्यया देवयागेन, त्वद्देवत्येन यज्ञेन। अश्याम प्राप्नुवाम।

त्वं च। अस्माकम्। विशः प्रजाः। अभिलक्ष्य। आचर आगच्छ। किं कुर्वन्? सुम्नायन् इत्। सुम्नमिति सुखनाम। तासां प्रजानां सुखमिच्छन्नेव। सुखप्रद एव भव इत्यर्थः। ततो वयम्। अरिष्टवीराः। वीर्याज्जायन्त इति वीराः प्रजाः। अरिष्टा अहिंसिता वीरा येषां तथाभूताः सन्तः। ते तुभ्यम्। हविः चरुपुरोडाशादिकम्। जुहवाम चोदित आधारे प्रक्षिपाम॥

(Dinakara)

हे मीढ्वः सेक्तः कामाभिवर्षक रुद्र क्षयद्वीरस्य क्षपितप्रतिपक्षस्य ते तव सुमतिं कल्याणीमनुग्रहस्य वृद्धिं ते त्वत्सम्बन्धिनो वयं देवयज्यया भवत्सेवया अश्याम प्राप्नुयाम। त्वं च सुम्नायन् सुम्नं सुखमिच्छति सुम्नायति एतादृश एव सन् अस्माकं विशः प्रजा अभिलक्ष्य आ चर आगच्छ। वयम् अरिष्टवीराः अहिंसितप्रजाः सन्तः ते तुभ्यं हविः चरुपुरोडाशादिकं जुहवाम प्रक्षिपाम। (मीढ्वः मिह सेचने, दाश्वान् साह्वान् (पा० ६.१.१२) इति क्वसुप्रत्ययान्तो निपातः) ॥७६॥

Rudra is here hailed as the showerer of benefits (miḍhvah, from 'miha sechane', one who sprinkles like rain-water, *Nirukta* 3,9 gives it among the names of wealth, dhana-nāma), and as the destroyer of adversaries (kshayadvīra). Let us enjoy (aśyāma, from 'aśū vyāptau'), says the seer, your kindly thoughts (sumatim, from 'mana jñāne', matir mananam), by our worship rendered to the gods (deva-yajyayā); we are yours (te). Come to us (lāchara, from 'chara gatau'), the mankind (asmākamid viśah), with the intention of making us happy (sumnāyan, 'sukha-nāma', *Nirukta* 3,13; the

expression 'sumnam' has the force of desiring to do good to others so that they are happy, 'pareshām sukham ichchhati sumnāyati'). We also make over (juhavāma from 'hu dāne') unto you (te) worshipful offerings (havih), so that people remain valiant and unharmed (arishṭa-vīrāh; Skandasvāmi interprets as 'ahimsita-putrapautrāh, the progeny being free from injury).

(77)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता अग्निः ॥

(संहितापाठः)

त्वेषं वयं रुद्रं यज्ञसाधं वङ्कुं कविमवसे नि ह्वयामहे।
आरे अस्मद् दैव्यं हेळो अस्यतु सुमतिमिद् वयमस्या
वृणीमहे ॥७७॥ (१.११४.४)

(पदपाठः)

त्वेषम्। वयम्। रुद्रम्। यज्ञऽसाधम्। वङ्कुम्। कविम्। अवसे। नि।
ह्वयामहे॥ आरे। अस्मत्। दैव्यम्। हेळः। अस्यतु। सुऽमतिम्। इत्।
वयम्। अस्य। आ। वृणीमहे ॥७७॥

(अन्वय)

त्वेषं यज्ञसाधं वङ्कुं कविं रुद्रं अवसे नि ह्वयामहे। दैव्यं हेळः अस्मत् आरे अस्यतु। अस्य सुमतिमित् वयं आवृणीमहे॥

The seer of the mantra is Kutsa, son of Aṅgirasa; the metrical form is Jagatī; and the deity invoked is Rudra.

(Sāyaṇa)

अवसे रक्षणाय। रुद्रं महादेवम्। नि ह्वयामहे नितरां आह्वयामः। कीदृशं? त्वेषं दीप्तम्। यज्ञसाधं यज्ञस्य साधयितारम्। एष हि यज्ञं स्विष्टं करोति। वङ्कुं कुटिलगन्तारम्। कविं क्रान्तदर्शिनम्।

स च रुद्रो। दैव्यं देवस्य द्योतमानस्य सम्बन्धिनम्। हेळः क्रोधम्। अस्मदारे अस्मात्तः। दूरदेशे। अस्यतु प्रेरयतु। अस्य महादेवस्य। सुमतिमित् शोभनां अनुग्रहरूपां बुद्धिमेव। वयम्। आ वृणीमहे आभिमुख्येन संभजामहे॥

(Dinakara)

वयम् अवसे रक्षणाय रुद्रं नि ह्वयामहे आह्वयामः। कीदृशं, त्वेषं दीप्तं यज्ञसाधं यज्ञसाधितारं वङ्कुं कुटिलगन्तारं कविं क्रान्तदर्शिनम्। स च रुद्रः दैव्यं देवसंबन्धिनं हेळः क्रोधम् अस्मत् आरे अस्मत्तो दूरे अस्यतु प्रेरयतु। अस्य रुद्रस्य सुमतिम् अनुग्रहरूपां बुद्धिम् इत् एव वयम् आ वृणीमहे। (यज्ञसाधनं राध साध संसिद्धौ। बङ्कुं वकि कौटिल्ये। निसमुपविभ्यो ह्वः(पा० १.३.३०) इत्यात्मनेपदम्॥७७॥

We (vayam) invoke earnestly (ni hvayāmahe) for our protection and well-being (avase) the brilliant and luminous (tvesham, from 'tvishī dīptau') Rudra, who is the accomplisher of our worship (yajñasādham, yajñām sādhayati iti yajñāsāt, from 'yaja devapūjāyam' and 'shidhū samrāddhau'), who is supremely wise and knows what is beyond us (kavim, *Nirukta,* 3,19 'medhāvi-nāma', krāntadarśī) and whose ways are tortuous (vamkum, from 'vaki kauṭilye', Skandasvāmi, 'vakragāmī'). Let him throw ('asyatu' from 'asu kshepaṇe') from us (asmat) far away (are) the divine wrath (daivyam heḷah, from 'heḍṛ anādare', *Nirukta,* 3,19 krodha-nāma). Let us (vayam) partake (ā vṛṇīmahe, from 'vṛṅg sambhaktau') of his (asya) good thoughts only (sumatim it).

(78)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता रुद्रः॥

(संहितापाठः)

दिवो वराहमरुषं कपर्दिनं त्वेषं रूपं नमसा नि ह्वयामहे।
हस्ते बिभ्रद् भेषजा वार्याणि शर्म वर्म च्छर्दिरस्मभ्यं
यंसत्॥७८॥ (१.११४.५)

(पदपाठः)

दिवः। वराहम्। अरुषम्। कपर्दिनम्। त्वेषम्। रूपम्। नमसा। नि।
ह्वयामहे॥ हस्ते। बिभ्रत्। भेषजा। वार्याणि। शर्म। वर्म। छर्दिः।
अस्मभ्यम्। यंसत्॥७८॥

(अन्वयः)

वराहं अरुषं कपर्दिनं त्वेषं रूपं नमसा दिवः नि ह्वयामहे। हस्ते वार्याणि भेषजा बिभ्रत् अस्मभ्यं शर्म वर्म छर्दिः यंसत्॥

The seer of the mantra is Kutsa, son of Aṅgirasa; the metrical form is Jagatī; and the deity invoked is Rudra.

(Sāyaṇa)

वराहं वराहाकारं उत्कृष्टभोजनम्। यद्वा। वराहवद् दृढाङ्गम्। अरुषं आरोचमानम्। कपर्दिनं जटाभिर्युक्तम्। त्वेषं तेजसा दीप्यमानम्। रूपं निरूपणीयं वेदान्तैरधिगम्यम्। एवंभूतं रुद्रम्। नमसा हविर्लक्षणेन अन्नेन। नमस्कारेण वा। दिवः द्युलोकसकाशात्। नि ह्वयामहे नितरां आह्वयामः।

स आहूतो रुद्रः। हस्ते स्वकीये बाहौ। वार्याणि सर्वैः वरणीयानि। भेषजा भैषज्यानि रोगशमनहेतुभूतानि। बिभ्रत् धारयन्। अस्मभ्यं स्तोतृभ्यः। शर्म आरोग्यलक्षणं सुखम्। वर्म आयुधानां निवारकं कवचम्। छर्दिः। गृहनामैतत्। गृहं च। यंसतु प्रयच्छतु॥

(Dinakara)

वराहं कृष्णवराहं (?) यद्वा यज्ञराहवद् दृढाङ्गम् अरुषं रोचमानं कपर्दिनं जटायुक्तं त्वेषं दीप्यमानं रूपं वेदान्तैर्निरूपणीयं रुद्रं नमसा नमस्कारेण दिवः स्वर्गात् नि ह्वयामहे आह्वयामः। स रुद्रः स्वहस्ते वार्याणि सर्वैर्वरणीयानि भेषजा भैषज्यानि बिभ्रत् धारयन् अस्मभ्यं स्तोतृभ्यः शर्म सुखं वर्म कवचं छर्दिः गृहं च यंसतु प्रयच्छतु॥७८॥

We invite with earnestness (ni hvayāmahe) Rudra from the high heavens (divah, from the wide sky). He is like a dark and huge cloud (varāham, *Nirukta,* 5,4, 'megho bhavati', carries rain water, varam udakam vahati iti, cf. 1,61,7) fast (arusham, Skandasvāmi, 'arushatih gati-karmā') and wears braided locks (kapardinam), shines brilliantly (tvesham, from 'tvishī dīptau'), having an enticing form (rūpam, Skandasvāmi, 'antarṇīta matvartha', rūpavantam), with our prostrations (namasā). He comes carrying in his hands (haste) the medicaments (bheshajā, from 'bhisha chikitsāyām'), which are desired by all (vāryāṇi from 'vṛṅg sambhaktau'). May he bestow (yamsat, from 'yam uparame') on us (asmabhyam) health and happiness (śarma) protection from ills (varma, armour, kavacham) and ilustrious abodes to dwell (chhardi, *Nirukta* 2,11 'gṛha-nāma', from 'uchchṛdir dīpti-devanayoh', chchṛdyate prakāśyate iti).

(79)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता रुद्रः॥

(संहितापाठः)

इदं पित्रे मरुतामुच्यते वचः स्वादोः स्वादीयो रुद्राय वर्धनम्।
रास्वा च नो अमृत मर्तभोजनं त्मने तोकाय तनयाय मृळ॥७९॥
(१.११४.६)

(पदपाठः)

इदम्। पित्रे। मरुताम्। उच्यते। वचः। स्वादोः। स्वादीयः। रुद्राय।
वर्धनम्॥ रास्व। च। नः। अमृत। मर्तऽभोजनम्। त्मने। तोकाय।
तनयाय। मृळ॥७९॥

(अन्वयः)

स्वादोः स्वादीयः वर्धनं इदं वचः मरुतां पित्रे रुद्राय उच्यते। (हे) अमृत, मर्तभोजनं नः रास्व। तथा त्मने तोकाय तनयाय मृळ॥

The seer of the mantra is Kutsa, son of Aṅgirasa; the metrical form is Jagatī; and the deity invoked is Rudra.

(Sāyaṇa)

इदं स्तुतिलक्षणं वचः। मरुतां देवविशेषाणां एकोनपञ्चाशत्संख्याकानाम्। पित्रे जनकाय। रुद्राय। ईश्वराय। उच्यते उच्चार्यते। कीदृशम् ? स्वादोः स्वादीयः रसवतो मधुघृतादेः अपि स्वादुतरम्। अतिशयेन हर्षजनकमित्यर्थः। वर्धनं स्तुत्यस्य प्रवर्धकम्। स्तोत्रेण हि देवता हृष्टा सती प्रवर्धते। रुद्रस्य च मरुतां पितृत्वं आख्यायते। सर्वेषु मारुतेषु सूक्तेषु मरुतो रुद्रपुत्रा इति स्तूयन्ते।

अपि च। हे अमृत मरणरहित रुद्र। मर्तभोजनं मर्तानां मनुष्याणां भोगपर्याप्तं अन्नम्। नः अस्मभ्यम्। रास्व प्रयच्छ। तथा। त्मने आत्मने। द्वितीयार्थे चतुर्थी। माम्। तोकाय। तोकं पुत्रम्। तनयाय तत्पुत्रम्। च। मृळ सुखय॥

(Dinakara)

इदं स्तुतिवचः मरुतां देवानां पित्रे रुद्राय उच्यते उच्चार्यते। कीदृशं, स्वादोः मधुघृतादेरपि स्वादीयः स्वादुतरं वर्धनं स्तुत्यस्य प्रवर्धकम्। स्तुत्या सर्वोऽपि वर्धत इति भावः। अपि च हे अमृत मरणरहित मर्तभोजनं मर्तानां मनुष्याणां पर्याप्तमन्नं नः अस्मभ्यं रास्व प्रयच्छ (रा दाने)। तथा (त्मने इत्यादिपदेषु द्वितीयार्थे चतुर्थी, तेन) आत्मानं तोकं पुत्रं तनयं नप्तारं पुत्रपुत्रं च मृळ सुखय॥७९॥

This praise (idam vachah), which is sweetest among the sweet (svadoh svādīyah) and which is power-enhancing (vardhanam, cf. Skandasvami, 'stutir hi devānām vṛddhikarī') is articulated (uchyate) for the sake of Rudra, who is the progenitor of the Maruts (marutām pitre rudrāya). O immortal Rudra (amṛta), gift unto us (nah rāsva, from 'rā dāne', the wherewithal for mortals to enjoy (marta-bhojanam, Skandasvāmin takes it as wealth, dhana-nāma in *Nirukta* 3,9). Even so (tathā), make ourselves (tmane for ātmane), our offsprings (tokāya) and progeny (tanaya) happy (mṛḷa from mṛḷa sukhane).

Notes: 1. 'tmane' for 'ātmane', cf Pāṇini-sūtra, 6,4,141,1 मन्त्रेष्वाज्यादेरात्मनः। and gloss on it 'आङोऽन्यत्रापि छन्दसि दृश्यते। For references in Ṛgveda, illustrations are

1,142,10 पुरु वारं पुरु त्मना।

1,185,1 विश्वं त्मना बिभ्रतो।

2,32,4 सुभगा बोधतु त्मना।

2. The words 'tokāya' and 'tanayāya' are usually used together, although they are almost synonymous; e.g.

7,46,3 मानस्तोकेषु तनयेषु रीरिषः।

1,92,13 येन तोकं च तनयं च धामहे।

Skandasvāmin takes the two words in the sense of 'putra-pautra', children and grandchildren.

(80)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता रुद्रः॥

(संहितापाठः)

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्।
मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः॥८०॥
(१.११४.७)

(पदपाठः)

मा। नः। महान्तम्। उत। मा। नः। अर्भकम्। मा। नः। उक्षन्तम्। उत।
मा। नः। उक्षितम्॥ मा। नः। वधीः। पितरम्। मा। उत। मातरम्। मा।
नः। प्रिया। तन्वः। रुद्र। रिरिषः॥८०॥

(अन्वयः)

(हे) रुद्र। नः महान्तं मा वधीः। उत नः अर्भकम् मा (वधीः)। नः उक्षन्तं मा (वधीः)। उत नः उक्षितं मा (वधीः)। नः पितरं मा (वधीः)। उत मातरं मा (वधीः)। न प्रियाः तन्वः मा रिरिषः॥

The seer of the mantra is Kusta, son of Aṅgīrasa, the metrical form is Jagati; and the deity invoked is Rudra

(Sāyaṇa)

हे रुद्र। नः अस्माकं मध्ये। महान्तं वृद्धम्। मा वधीः मा हिंसीः। उत अपि च। नः अस्माकम्। अर्भकं बालम्। मा हिंसीः। तथा। नः अस्माकं मध्ये। उक्षन्तं सेक्तारं मध्यवयस्कम् युवानम्। मा वधीः।

तथा। नः अस्माकम्। पितरं जनकम्। मा वधीः। उत अपि च। मातरं जननीम्। मा वधीः। तथा। नः अस्माकम्। प्रियाः स्नेहविषयाः। तन्वः शरीराणि तनूषु भवाः प्रजा वा। हे रुद्र। मा रिरिषः मा हिंसीः॥

(Dinakara)

हे रुद्र नः अस्माकं मध्ये महान्तं वृद्धं पूज्यं मा वधीः मा हिंसीः। तथा नः अर्भकं बालं मा हिंसीः। तथा नः उक्षन्तं सेक्तारं युवानं मा हिंसीः। तथा नः उक्षितं गर्भरूपेण निषिक्तमपत्यं मा हिंसीः। तथा पितरं मातरं च मा वधीः। तथा नः प्रियाः स्नेहविषयाः तन्वः शरीराणि तनुषु भवाः प्रजा वा मा रीरिषः मा हिंसीः (रिष हिंसायाम्) ॥८०॥

Hurt not (mā vadhīh), O Rudra, our (nah) elders (mahāntam), our (nah) youngsters (arbhakam), our (nah) youth (ukshantam from 'uksha sechane'), our (nah) progeny in the womb (ukshitam), our fathers (pitaram), our (nah) mothers (mātaram). Do not injure (mā ririshah, from 'rish himsāyām') our (nah) dear ones (priyāh) and all people (tanvah).

(81)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता अग्निः॥

(संहितापाठः)

मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु
रीरिषः। वीरान् मा नो रुद्र भामितो वधीर्हविष्मन्तः सदमित् त्वा
हवामहे॥८१॥ (१.११४.८)

(पदपाठः)

मा। नः। तोके। तनये। मा। नः। आयौ। मा। नः। गोषु। मा। नः।
अश्वेषु। रिरिषः॥ वीरान्। मा। नः। रुद्र। भामितः। वधीः। हविष्मन्तः।
सदम्। इत्। त्वा। हवामहे॥८१॥

(अन्वयः)

(हे) रुद्र। नः तोके मा रिरिषः। तनये। मा (रिरिषः)। न आयौ मा (रिरिषः)। नः गोषु नः अश्वेषु मा (रिरिषः)। नः वीरान् भामितः मा वधीः। (वयं च) हविष्मन्तः सदमित् त्वा हवामहे॥

The seer of the mantra is Kutsa, son of Angirasa; the metrical form is Jagatī; and the deity invoked is Rudra

(Sāyaṇa)

हे रुद्र। नः अस्माकम्। तोकादि विषये। मा रिरिषः मा हिंसीः। तोकशब्दः पुत्रवाची। तनयस्तत्पुत्रः। आयुः इति अन्तोदात्तो मनुष्यनाम। पुत्रपौत्रव्यतिरिक्तो योऽस्मदीयो मनुष्यः। तस्मिन्। गोषु पश्वादिषु। अश्वेषु च। मा रिरिषः। हिंसां मा कृथाः।

तथा। हे रुद्र। वीरान् विक्रान्तान् शौर्योपेतान्। अस्मदीयान्। भामितः क्रुद्धः सन्। मा वधीः मा हिंसीः। वयं च। हविष्मन्तः हविर्भिर्युक्ताः सन्तः। सदमित् सर्वदैव। त्वाम्। हवामहे। आह्वयामहे॥

(Dinakara)

हे रुद्र नः अस्माकं तोके पुत्रे तनये पौत्रे आयौ मनुष्ये गोषु अश्वेषु च मा रीरिषः मा हिंसीः। तथा नः वीरान् भामितः क्रुद्धः सन् मा वधीः। वयं च हविष्मन्तः हविर्भिर्युक्ताः सन्तः सदम् इत् सर्वदैव त्वां हवामहे आह्वयामहे। (भामितः भाम क्रोधे, क्तोऽधिकरणे च (पा. ३.४.७६) इति कर्तरि क्तः) ॥८१॥

O Rudra, hurt not (mā rīrishah) our (nah) offsprings (toke) and progeny (tanaye), and other human beings around us (āyau, from 'iṇa gatau', Skandasvāmin takes it as 'manushya-vāchaka' after *Nirukta* 3,8), nor our (nah) cows (goshu) and horses (aśveshu). Do not with indignation (bhāmitah, from 'bhāma krodhe', krudhyatikarma, *Nirukta,* 3,9) strike down (mā vadhīh) our valiant ones (nah vīrān). We will uninterruptedly (sadamit, viz. sadaiva; always) invoke you (tvā havāmahe), offering oblations to you (havishmantah).



(82)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता अग्निः॥

(संहितापाठः)

उप ते स्तोमान् पशुपाइवाकरं रास्वा पितर्मरुतां सुम्नमस्मे।
भद्रा हि ते सुमतिर्मृळयत्तमाथा वयमव इत् ते वृणीमहे॥८२॥
(१.११४.९)

(पदपाठः)

उप। ते। स्तोमान्। पशुपाःऽइव। आ। अकरम्। रास्व। पितः। मरुताम्।
सुम्नम्। अस्मे इति॥ भद्रा। हि। ते। सुऽमतिः। मृळयत्ऽतमा। अथ।
वयम्। अवः। इत्। ते। वृणीमहे॥८२॥

(अन्वयः)

हे रुद्र, स्तोमान् पशुपा इव ते उप आ अकरम्। हे मरुतां पितः, अस्मे सुम्नं रास्व। ते सुमतिः मृळयत्तमा भद्रा हि। अथ वयं ते अवः वृणीमहे॥

The seer of the mantra is Kutsa, son of Angirasa; the metrical form is Jagatī; and the deity addressed is Rudra.

(Sāyaṇa)

हे रुद्र। स्तोमान् स्तुतिरूपान् मन्त्रान्। ते तुभ्यम्। उपाकरं उपकारोमि समर्पयामि। तत्र दृष्टान्तः। पशुपा इव। यथा पशूनां पालयिता गोपः प्रातः काले स्वस्मै समर्पितान् पशून् सायंकाले स्वामिभ्यः प्रत्यर्पयति, एवं त्वत्सकाशाल्लब्धान् स्तुतिरूपान् मन्त्रान् स्तुतिसाधनतया तुभ्यं प्रत्यर्पयामि इत्यर्थः। हे मरुतां पितः मरुत्संज्ञानां देवानां देवानां उत्पादक रुद्र। नः अस्मभ्यम्। सुम्नं सुखम्। रास्व देहि।

अपि च। ते त्वदीया। सुमतिः कल्याणी बुद्धिः। मृळयत्तमा अतिशयेन सुखयितृतमा। अत एव भद्रा भजनीया हि। यस्मादेवं तस्मादथ अनन्तरम्। वयम्। ते त्वदीयम्। अवः रक्षणम्। वृणीमहे संभजामहे॥

(Dinakara)

हे रुद्र ते तुभ्यं स्तोमान् स्तुतिरूपान् मन्त्रान् उपाकरम् उपाकरोमि समर्पयामि। तत्र दृष्टान्तः। पशुपा इव। यथा पशुपाः पशूनां पालयिता प्रातःकाले स्वस्मै समर्पितान् पशून् सायंकाले स्वामिभ्यः प्रत्यर्पयति, एवं त्वत्सकाशाल्लब्धान्मन्त्रान् तुभ्यमेव समर्पयामः। हे मरुतां पितः अस्मे अस्मभ्यं सुम्नं सुखं रास्व देहि। अपि च ते त्वदीया सुमतिः कल्याणी बुद्धिः मृळयत्तमा अतिशयेन सुखयितृतमा अत एव भद्रा भजनीया। हि एतस्मात् अथ अनन्तरं वयं ते इत् त्वदीयमेव [अवः] रक्षणं वृणीमहे वरयामहे॥८२॥

O Rudra, the praises I sing (stomān) are really yours; I get them from you and I give them back to you (upāakaram), even as a shephered (paśupā iva) returns the cows to their masters after taking them out for grazing. O the parent of the Maruts (marutām pitah, cf. 1,114,6), grant unto us (rāsva, from 'rā dāne'; asme, asmad) happiness (sumnam). Does your benevolent thought (te sumatih) not cause exceeding delight to us (mṛḷayattamā) and perfect security (bhadrā)? It is therefore (atha) that we pray (vṛṇīmahe) for protection from you (te avah, from 'ava rakshaṇe).

(83)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता रुद्र॥

(संहितापाठः)

आरे ते गोघ्नमुत पुरुषघ्नं क्षयद्वीर सुम्नमस्मे ते अस्तु।
मृळा च नो अधि च ब्रूहि देवाधा च नः शर्म यच्छ
द्विबर्हाः ॥८३॥ (१.११४.१०)

(पदपाठः)

आरे। ते। गोऽघ्नम्। उत। पुरुषऽघ्नम्। क्षयत्ऽवीर। सुम्नम्। अस्मे इति।
ते। अस्तु॥ मृळ। च। नः। अधि। च। ब्रूहि। देव। अध। च। नः।
शर्म। यच्छ। द्विऽबर्हाः ॥८३॥

(अन्वयः)

(हे) क्षयद्वीर, ते गोघ्नं उत पुरुषघ्नं आरे। अस्मे ते सुम्नं अस्तु। नः मृळ। देव, नः अधि ब्रूहि च। अध च द्विबर्हाः (त्वं) नः शर्म यच्छ॥

The seer of the mantra is Kutsa, son of Angirasa; the metrical form is Trishṭup; and the deity invoked is Rudra.

(Sāyaṇa)

हे क्षयद्वीर, क्षपितसर्वशत्रुजन। रुद्र। ते त्वदीयम्। गोघ्नं यद्गोहननं यद्वा गोहननसाधनमायुधम्। उत अपि च। पुरुषघ्नं पुरुषहननं तत्साधनमायुधम् वा। तदुभयम्। आरे दूरे। अस्मत्तः विप्रकृष्टदेशे। भवतु। अस्मे अस्मासु। ते त्वदीयम्। सुम्नं सुखम्। अस्तु भवतु।

अपि च। नः अस्माकम्। मृळ सुखसिद्ध्यर्थं प्रसन्नो भव। हे देव द्योतमान। रुद्र। नः अस्मान्। अधि ब्रूहि च। अधिवचनं पक्षपानेन वचनम्। इति यथा। अध च अथ अनन्तरम्। च। द्विबर्हा द्वयोः स्थानयोः पृथिव्यामन्तरिक्षे च परिवृढः। स त्वम्। नः अस्मभ्यम्। शर्म सुखम्। यच्छ देहि॥

(Dinakara)

हे क्षयद्वीर क्षपितप्रतिपक्ष ते त्वदीयं गोघ्नं गोहननसाधनमायुधं तथा पुरुषघ्नं वा खड्गायुधम् आरे अस्मत्तो दूरे अस्तु। अपि च ते त्वदीयं सुम्नं सुखम् अस्मे अस्मासु अस्तु भवतु। अपि च नः अस्माकं मृळ प्रसन्नो भव। अध च अनन्तरं च नः अस्मान् अधि ब्रूहि अधिवचनं पक्षपातवचनं ब्रूहि। अपि च द्विबर्हाः द्वयोः स्थानयोः पृथिव्यामन्तरिक्षे च यद्वा दक्षिणोत्तरमार्गयोः यद्वा ज्ञानकर्मणोः बर्हते प्रवर्धते एवंभूतस्त्वं हे देव नः अस्मभ्यं शर्म सुखं यच्छ॥८३॥

O the abode of the valiant (kshayadvīra), may the weapons with which cows and humans are destroyed (goghnam, uta purushaghnam) be far removed from us (āre, dūre). Let us enjoy the happiness granted by you (asme te sumnam astu from 'as bhuvi'). Be the source of delight for us (nah mṛḷa). O the luminous one (deva), be partial to us (na adhi brūhi cha); O lord of the two realms (dvi-barhāh, viz. earth and the midregion) grant us (yachchha from 'dāṇ dāne', nah) happiness (śarma).

Notes: 1. 'Kshayadvīra'. क्षयन्तो वीराः यस्मिन् from 'kshi nivāsagatyoh'. Sāyaṇa, however, takes the word in the sense of vanquisher of all adversaries (क्षपितसर्वशत्रुजन)

2. ‘dvibarhāh’, from ‘braha bṛhi vṛddhau’, one who grows in two dimensions, द्वयोः स्थानयोः बर्हते प्रवर्धते इति। Skandasvāmin suggests that the two dimensions are sacrifice and praise: बृंहिः वृद्ध्यर्थं यष्टुः स्तोतुः च द्वयोः वर्धयिता। He makes the sacrificer and the praiser both prosper. Alternately, Sāyaṇa takes the word as referring to the two realms, earth (prthivī) and the midregion (antariksha); or to the paths of knowledge (jñāna) and ritualistic action (karma); or to the paths which are southern (dakshiṇamārga or pitṛyāna) and northern (uttara-mārga or devayāna). There is also a suggestion that the two dimensions are sacrifice (yajña) and warfare (sangrāma).

(84)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता अग्निः॥

(संहितापाठः)

अवोचाम नमो अस्मा अवस्यवः शृणोतु नो हवं रुद्रो मरुत्वान्।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥८४॥
(१.११४.११)

(पदपाठः)

अवोचाम। नमः। अस्मै। अवस्यवः। शृणोतु। नः। हवम्। रुद्रः।
मरुत्वान्॥ तत्। नः। मित्रः। वरुणः। ममहन्ताम्। अदितिः। सिन्धुः।
पृथिवी। उत। द्यौः ॥८४॥

(अन्वयः)

अवस्यवः अवोचाम। अस्मै नमः। मरुत्वान् रुद्रः नः हवं शृणोतु। नः तत् मित्रः वरुणः अदितिः सिन्धुः पृथिवि उत द्यौः ममहन्ताम्॥

The seer of the mantra is Kutsa, son of Angirasa; the metrical form is Trishṭup; and the deity invoked is Rudra.

(Sāyaṇa)

अवस्यवः अवः अन्नं रक्षणं वा इच्छन्तः। वयं अवोचाम। एतत्सूक्तरूपं स्तोत्रं अवादिष्म। अस्मै रुद्राय। नमः नमस्कारः। अस्तु। मरुत्वान् मरुद्भिः स्वकीयैः पुत्रैः युक्तः। रुद्रः। च। नः अस्माकम्। हवं आह्वानम्। शृणोतु स्वीकरोतु।

यदस्माभिरुक्तम्। नः अस्मदीयम्। तत्सर्वम्। मित्रादयः षड्देवताः। ममहन्तां पूजयन्तु। उत शब्दोऽप्यर्थे ॥

(Dinakara)

अवस्यवः अवः अन्नं रक्षणं वा इच्छन्तः वयम् अवोचाम स्तोत्रमवादिष्म। अस्मै रुद्राय नमः अस्तु। मरुत्वान् स्वपुत्रयुक्तः रुद्रः नः अस्माकं हवम् आह्वानं शृणोतु। सर्वं च तं मित्रादयः मामहन्तां पूजयन्तु ॥८४॥

We desire your protection (avasvatah from 'ava rakshaṇe', avanāya); and so we convey to you (avochāma, from brūṅg vyaktāyām vachi', articulate, utter) our prostrations (namah). May Rudra, accompanied by the Maruts (marutvān), listen (śruṇotu, from 'śru śravaṇe') to our invocation (nah havam). And this prayer of ours (nah tat) may also be honoured (mamahantām) by the six gods: Mitra, Varuṇa, Aditi, Sindhu, Pṛthivī and Dyauh.

(85)

ऋषिः कक्षीवान् दैर्घतमसः औशिजः।
छन्दः त्रिष्टुप्।
देवता अश्विनौ॥

(संहितापाठः)

एतानि वामश्विना वीर्याणि प्र पूर्व्याण्यायवोऽवोचन्।
ब्रह्म कृण्वन्तो वृषणा युवभ्यां सुवीरासो विदथमा वदेम॥८५॥
(१.११७.२५)

इति श्रीमन्नारायणभट्टसूरिसूनुरामकृष्णात्मजदिनकरभट्टकृते ऋगर्थव्याख्यासारे प्रथमाष्टकान्तर्गतऋग्व्याख्या समाप्ता॥

(पदपाठः)

एतानि। वाम्। अश्विना। वीर्याणि। प्र। पूर्व्याणि। आयवः। अवोचन्॥
ब्रह्म। कृण्वन्तः। वृषणा। युवऽभ्याम्। सुऽवीरासः। विदथम्। आ।
वदेम॥८५॥

(अन्वयः)

हे अश्विना, वां पूर्व्याणि एतानि वीर्याणि आयवः प्र अवोचन्। (वयं च)। हे वृषणा युवाभ्यां ब्रह्म कृण्वन्तः सुवीरासः विदथं आ वदेम॥

The seer of the mantra is Kakshīvan, son of Dīrghatamas; the metrical form is Trishṭup; and the deity addressed is Aśvinau (the pair).

(Sāyaṇa)

अश्विना हे अश्विनौ वां युवयोः सम्बन्धीनि। पूर्व्याणि प्रत्नानि। एतानि इदानीं मयोक्तानि। वीर्याणि वीरकर्माणि। आयवः मनुष्याः मदीयाः पित्रादयः। प्रावोचन् उक्तवन्तः।

वयं च। हे वृषणा कामाभिवर्षकौ अश्विनौ। युवाभ्याम्। ब्रह्म मन्त्रात्मकं स्तोत्रम्। कृण्वन्तः कुर्वन्तः। सुवीरासः सुवीराः शोभनैर्वीरैः पुत्रादिभिरुपेताः सन्तः। विदथं यज्ञम्। आवदेम आभिमुख्येन स्तुतीः उच्चारयाम। यद्वा। विदथं वेदयन्तमतिथिं तदपेक्षितप्रदानेन आवदेम अभिमुख्येन प्रियपूर्विकां वाचं उच्चारयाम।

(Dinakara)

हे अश्विनौ वां युवयोः सम्बन्धीनि पूर्व्याणि प्रत्नानि एतानि इदानीं मयोक्तानि वीर्याणि आयवः मनुष्याः मदीयाः पित्रादयः प्र अवोचन् उक्तवन्तः। हे वृषणौ कामाभिवर्षकौ वयं युवभ्यां ब्रह्म मन्त्रात्मकं स्तोत्रं कृण्वन्तः कुर्वन्तः सुवीरासः पुत्रादिभिरुपेताः सन्तः विदथं वेदयन्तमतिथिं तदपेक्षितप्रदानेन आ वदेम अभिमुख्येन प्रियां वाचमुच्चारयाम॥८५॥

O Aśvins, the ancient people (pūruyāṇi āyavah, *Nirukta* 3,20, 'purāṇa-nāma'), viz. our forefathers, have narrated well (pra avochan, from 'vacha paribhāshaṇe') your exploits (vīryāṇi). We too, O showerers of well-being (vrshāṇā, from 'vṛsha sechane'), sing your (yuvābhyām) praises (brahma kṛṇvantah, from 'kṛvi himsāgatyoh'; brahma is mantra, let us, accompanied by valiant men around us (suvīrāsah), articulate (āvadena, from 'vada vyaktāyām vāchi') our appreciative understanding of you (vidhatham, from 'vida jñāne').

(86)

ऋषिः कक्षीवान् दैर्धतमस औशिजः।
छन्दः त्रिष्टुप्।
देवता स्वनयस्य दानस्तुतिः॥

(ततो द्वितीया[ष्टका]न्तर्गता ऋचः)

(संहितापाठः)

नाकस्य पृष्ठे अधि तिष्ठति श्रितो यः पृणाति स ह देवेषु गच्छति।
तस्मा आपो घृतमर्षन्ति सिन्धवस्तस्मा इयं दक्षिणा पिन्वते
सदा॥८६॥ (१.१२५.५)

(पदपाठः)

नाकस्य। पृष्ठे। अधि। तिष्ठति। श्रितः। यः। पृणाति। सः। ह। देवेषु।
गच्छति॥ तस्मै। आपः। घृतम्। अर्षन्ति। सिन्धवः। तस्मै। इयम्।
दक्षिणा। पिन्वते। सदा॥८६॥

(अन्वयः)

यः पृणाति सः नाकस्य पृष्ठे श्रितः अधि तिष्ठति। देवेषु गच्छति ह। तस्मै सिन्धवः आपः घृतं अर्षन्ति। तस्मै इयं दक्षिणा सदा पिन्वते॥

The seer of the mantra is Kakshīvān, son of Dīrghatamas; the metrical form is Jagatī; and the deity is Dānastuti (in praise of charity) of the King Svanaya.

(Sāyaṇa)

(सोमयागप्रशंसाप्रसङ्गेन सामान्यतो दानं प्रशंसति। यद्वा। सोमस्यैव स्तुतत्वाद्दक्षिणाशब्दस्य याग एव प्रसिद्धत्वात् सोमयाग एव स्तूयते।)

यः यो मर्त्यः। पृणाति हविरादानेन देवादीन् प्रीणाति। सः। नाकस्य। कमिति सुखनाम। तद्विरुद्धं अकम्। न विद्यते अकं दुःखं तत्साधनं पापं वेति नाकः। द्युलोकः। तस्या। पृष्ठे उन्नत उपरिदेशे। श्रितः सन्। अधि अधिकतमा कल्पान्तं तिष्ठति। यद्वा। अधिष्ठाय प्रमुखो भूत्वा तिष्ठति। न केवलं स्वर्गाश्रयणं, किन्तु देवेषु मध्ये गच्छति। वर्तते। स्वयमेव देवो भवतीत्यर्थः। ह इति प्रसिद्धौ।

तस्मै प्रीणयित्रे पुरुषाय। सिन्धवः स्यन्दनशीला आपः। घृतं तेजोवत्सारम्। अर्षन्ति गच्छन्ति। रसवत्यो भवन्तीत्यर्थः। किंच। इयं भूमिरपि। दक्षिणा सस्यादि फलसम्पादनदक्षा सती। सदा सर्वकालम्। पिन्वते सेचयति। तोषयतीत्यर्थः। दातुः जीवनसाधकान्नोदकानि रुचिराणि समृद्धानि भवन्तीत्यर्थः॥

(Dinakara)

(सामान्यतो दानं त्रिभिः प्रशंसति।) यः पृणाति यो दानेन देवब्राह्मणादीन् प्रीणाति सः नाकस्य पृष्ठे स्वर्गस्योन्नतदेशे अधि अधिकम् आकाल्पान्तं तिष्ठति। ह प्रसिद्धौ। सः देवेषु गच्छति। स्वयं देवो भवतीत्यर्थः। तस्मै सिन्धवः स्यन्दनशीलाः आपः घृतं सारम् अर्षन्ति गच्छन्ति रसवत्यो भवन्तीत्यर्थः। इयं भूमिरपि दक्षिणा सस्यादिसम्पादनदक्षा तस्मै पिन्वते सेचयति तोषयतीत्यर्थः॥८६॥

Whoever (yah) propitiates and makes happy (prīṇāti from 'prii-pālanapūraṇayoh') (humans or gods) will ascend (śṛtah) to the top of the heavenly region or sky (nākasya pṛshṭhe) and abide there (adhi-tishṭhati from 'shṭhā gati-nivṛttau'); he moves with the gods (deveshu gacchati), as is well known (ha). For him (tasmai) the waters that flow (sindhavah āpah) become (arshanti, from 'ṛi gatau') full of light and strength (ghṛtam). And for him (tasmaī), this earth (iyam) becomes always (sadā) delightful (pinvate, from 'pivi sechane') and prosperous (dakshiṇā, from 'daksha vṛddhau') (sukha-nāma)

Notes: 1. The word 'nāka' is interesting. 'Ka' means happiness (sukha-nāma), and 'aka' is its negation; it is again negated in 'naaka (nāka)' (pratishiddham pratishiddhyeta). It is employed frequently in *Ṛgveda* in the sense of 'dyauh' (sky or the heavenly realm) and sun (āditya) e.g:-

1,19,6, नाकस्याधिरोचने दिवि।

1,34,8 तिस्रः पृथिवीरुपरि प्रवा दिवो नाकं रक्षेथे।

1,85,7 महित्वना नाकं तस्थुः।

1,164,50 ते ह नाकं महिमानः सचन्ते।

Thus, nāka is taken as synonymous with the huminous sky and the brilliant sun (cf. *Nirukta,* 2,13)

2. The word 'ghṛta' in ordinary usage means clarified butter, but in the Vedic passages it always refers to light, as in 1,72,3; 2,3,4; 2,3,11; 2,3,41; 10,12,3; 10,51,8; 10,69,2; 10,80,6 etc.

(87)

ऋषिः कुत्स आङ्गिरसः।
छन्दः जगती।
देवता अग्निः॥

(संहितापाठः)

दक्षिणावतामिदिमानि चित्रा दक्षिणावतां दिवि सूर्यासः।
दक्षिणावन्तो अमृतं भजन्ते दक्षिणावन्तः प्र तिरन्त आयुः॥८७॥
(१.१२५.६)

(पदपाठः)

दक्षिणाऽवताम्। इत्। इमानि। चित्रा। दक्षिणाऽवताम्। दिवि। सूर्यासः॥
दक्षिणाऽवन्तम्। अमृतम्। भजन्ते। दक्षिणाऽवन्तः। प्र। तिरन्ते। आयुः॥८७॥

(अन्वयः)

दक्षिणावतां इत् चित्रा इमानि। दक्षिणावतां दिवि सूर्यासः। दक्षिणावन्तः आयुः प्र तिरन्ते॥

The seer of the mantra is Kakshīvān, son of Dīrghatamas; the metrical form is Trishṭup; and the deity is Dānastuti of the king Svanaya son of Bhāvayavya.

दक्षिणावताम्। बहुविधगो। हिरण्यादिरूपदक्षिणाप्रदातॄणाम्। इच्छब्दः एवकारार्थः। तेषामेव अर्थ। इमानि भूमौ दृश्यमानानि। चित्राणि चायनीयानि स्रक्चन्दन मणिमुक्तादिरूपाणि। समृद्धानि भवन्तीति शेषः। किञ्च। दक्षिणावतामेव। दिवि द्युलोके। सूर्यासः सूर्यसम्बन्धिनो लोकाः तदनुगृहीता भोगा वा समृद्धा भवन्ति।

किञ्च। दक्षिणावन्त एव। अमृतं जरामरणरहितं स्थानम्। भजन्ते सेवन्ते। यद्वा। दानेन अपहतपात्पानः आत्मानं विदित्वाऽमृतमविनाशं मोक्षं भजन्ते प्राप्नुवन्ति। किञ्च। दक्षिणावन्त एव। आयुः। प्रतिरन्ते अतिदीर्घमेव आयुष्यं लभन्ते। इदिति सर्वत्र सम्बध्यते॥

(Dinakara)

दक्षिणावताम् इत् गोहिरण्यादिदातॄणामेव इमानि दृश्यमानानि चित्रा चित्राणि स्रक्चन्दनादीनि भवन्तीत्यर्थः। किं च सूर्यासः सूर्यसम्बन्धिनो लोकाः भोगा वा भवन्ति ते च अमृतं जरामरणरहितस्थानं भजन्ते। "विविदिषन्ति यज्ञेन दानेन" (बृ.उ.४.४.२२) इति श्रुतेः। दक्षिणावन्तः इत् एव आयुः प्र तिरन्ते वर्धयन्ते लभन्ते। इदिति सर्वत्र सम्बध्यते॥८७॥

For those with the light of discernment (dakshiṇāvatah, see Note), alone (it, in the sense of eva), all these (imāni) wondrous experiences on earth (chitrā), and the experiences in the sky (divi) associated with the sun (sūryāsah); it is they who accomplish (bhajante) deathlessness (amṛtam), by intensifying (pratirante, from 'tira vṛddhau' with the suffix 'pra', "to increase", "to prolong", "to enlarge"; pratiratih vṛddhikarmā) their life-span (āyuh, from 'iṇa gatau').

Note: 'Dakshiṇāvatah' ('dakshiṇā yeshām asti') has been explained by Sāyaṇa as referring to those who offer generous gifts, the pious donors, especially during sacrificial sessions. Dakshiṇā, in the common use, also

means fees or gifts for the priests who conduct rituals for the yajamāna. However, the word is not used in this sense in the Ṛgvedic corpus. It signifies here the understanding mind viz., making full use of the mind, competent employment of mind (daksha as in 2,1,11; 3,14,7; 3,21,9; 6,16,17; 7,16,6 and 10,3,1 etc.). The word 'dakshiṇā' means the light of discernment (as in 8,39,5); and it is personified as the goddess of understanding (e.g. 5,1,3).

Yāska offers four explanations for the word (*Nirukta*, 1,7):

1. दक्षिणा दक्षतेः समर्धयति कर्मणो व्युर्धं समर्धयति। increasing, prolonging, enlarging (dakshateh in the sense of vṛddhau) what one is engaged in.

2. दिशमभिप्रेत्य दिग्घस्तप्रकृतिः दक्षिणो हस्तः दक्षतेरुत्साहकर्मणः। the right hand, which has more strength than the other one; signifying energy and enthusiasm (utsāha).

3. दाशतेर्वा स्याद्दान कर्मणः। gifting, donation (from 'dāśṛ dāne'), with ones right hand.

4. प्रदक्षिणागमनात्। coming round an object, circumambulation, keeping the object of reverence on ones right side, in rituals.

(88)

ऋषिः कक्षीवान् दैर्घतमस औशिजः।
छन्दः जगती।
देवता स्वनयस्य दानस्तुतिः॥

(संहितापाठः)

मा पृणन्तो दुरितमेन आरन् मा जारिषुः सूरयः सुव्रतासः।
अन्यस्तेषां परिधिरस्तु कश्चिदपृणन्तमभि सं यन्तु शोकाः॥८८॥
(१.१२५.७)

(पदपाठः)

मा। पृणन्तः। दुःऽइतम्। एनः। आ। अरन्। मा। जारिषुः। सूरयः। सुऽव्रतासः॥ अन्यः। तेषाम्। परिऽधिः। अस्तु। कः। चित्। अपृणन्तम्। अभि। सम्। यन्तु। शोकाः॥८८॥

(अन्वयः)

पृणन्तः दुरितं एनः मा आ अरन्। सूरयः सुव्रतासः मा जारिषुः तेषां अन्यः कःचित् परिधिः अस्तु। अपृणन्तं शोकः अभि सं यन्तु॥

The seer of the mantra is Kakshīvan, son of Dīrghatamas; the metrical form is Jagatī; and the deity enlogized is Dānastuti of the king Svanaya, son of Bhāvayavya.

(Sāyaṇa)

अन्वयव्यतिरेकाभ्यां दानं प्रशंसितुमाह। पृणन्तः देवादीन् हविरादिना प्रीणयन्तः। सन्तः। दुरितं दुष्टं यथा भवति तथा प्राप्तं दुःखम्। एनः तत्साधनं पापं च। मारन् मा प्राप्नुवन्। न केवलं दातार एव। अपि तु। सूरयः देवानां स्तोतारः विद्वांसः। मा जारिषुः जरया न जीर्णा भवेयुः। तथा सुव्रतासः शोभनकृत् चान्द्रायणादि नियमवन्तः। अपि। मा जारिषुः।

तर्हि एषामन्यो जनः कः इति स उच्यते। तेषां दातॄणां स्तोतॄणां वा। अन्यस्तेभ्यः अन्यो यः कोऽपि पुरुषः। परिधिः पापस्य परितो धारकः। अस्तु। यद्वा। अन्यो कश्चन पापदेवस्तेषां परिधिस्थानीयो व्यवधायकोऽस्तु। यथाग्नेः परिभिः स्वयं रक्षः प्रभृतिभिः बाध्यमानः स्वान्तर्हितमग्निं रक्षति। तद्वत्। अथवा। अन्यो धर्मविशेषः तेषां परिधिः परिधानमस्तु। कवचस्थानीयोऽस्तु। तर्हि किं प्रप्नुयुरिति उच्यते। अपृणन्तं देवादीन् अप्रीणयन्तं अदातारं। शोकाः चित्तपीडाः तत्साधनाः पाप्मानः। अभि अभिमुखं। सं यन्तु सम्यक्प्राप्नुवन्तु। वयं सुखिनः भवेम इत्यर्थः॥

(Dinakara)

पृणन्तः देवब्राह्मणादीन् प्रीणयन्तः दुरितं दुः दुष्टम् इतं प्राप्तं दुःखं तत्साधनम् एनः पापं च मा आ अरन् मा प्राप्नुवन्। न केवलं दातारः किं तु सूरयः देवादीनां स्तोतारोऽपि मा जारिषुः जरया जीर्णा न भवेयुः। तथा सुव्रतासः शोभनकृच्छ्रचान्द्रायणादिकर्तारो मा जारिषुः। तेषां दातॄणां स्तोतॄणां च अन्यः तेभ्योऽन्यः पुरुषः परिधिः पापस्य धारकः अस्तु। यद्वा अन्यो धर्मः तेषां परिधिः कवचमस्तु। अपृणन्तम् अदातारं शोकाः अभि सं यन्तु प्राप्नुवन्तु॥८८॥

They who are given to propitiating (pṛṇantah, from 'pṛii pālana-pūraṇayoh') (humans or gods), do not come to (mā ā aran, from 'ṛi gatau') grief (duritam, from 'iṇ gatau' with the prefix 'dur') or resort to sin (enah, also from 'iṇ gatau', viz., the cause of grief); the sages who praise the gods (sūrayah) and observe good conduct (suvratāsah) do not get aged and infirm (mā jārishuh, from 'jṛīsh, vayohānau'). Some one (anyah kah chit) will be (astu) his guardian (paridhih, from 'ḍudhāṅg dhāraṇa-poshaṇayoh'). But one

who is otherwise, viz., who does not propitiate (apṛṇaṇtam) will encounter (abhi samyantu) sorrows (śokah).

Note: The expression 'sūrayah' is included under the names of persons who eulogize the qualities and exploits of gods (stotṛ-nāma, *Nirukta* 3,19). They are also the enlightened ones, who work with intuitive powers. Sometimes, they are described as gods themselves. There are numerous passages in Ṛgveda, where the expression occurs, as illustrated by

1,22,8 रथिनो मह्यं सूरिः ।

1,22,20 सदा पश्यन्ति सूरयः ।

1,141,8 सूरयः शूरस्येव ।

6,23,10 सूरिरिन्द्रो ।

10,81,6 मघवा सूरिरस्तु ।



(89)

ऋषिः कक्षीवान् दैर्घतमसः।
छन्दः त्रिष्टुप्।
देवता स्वनयः भावयव्यः (भाव्यः)॥

अमन्दानिति सप्तर्चवर्गस्यार्थः

अमन्दानारभ्य आवर्गसमाप्तिराद्यपञ्चानां कक्षीवान् ऋषिः। षष्ठ्या भावयव्यः। सप्तम्या रोमशा नाम ब्रह्मवादिनी। आद्यपञ्चानां या तेनोच्यत इति न्यायात् स एव देवता।

(संहितापाठः)

अमन्दान्त्स्तोमान् प्र भरे मनीषा सिन्धावधि क्षियतो भाव्यस्य।
यो मे सहस्रममिमीत सवानतूर्तो राजा श्रव इच्छमानः॥८९॥
(१.१२६.१)

(पदपाठः)

अमन्दान्। स्तोमान्। प्र। भरे। मनीषा। सिन्धौ। अधि। क्षियतः। भाव्यस्य॥
यः। मे। सहस्रम्। अमिमीत। सवान्। अतूर्तः। राजा। श्रवः। इच्छमानः॥८९॥

(अन्वयः)

अतूर्तः यः राजा मे सहस्रं सवान् श्रवः इच्छमानः अमिमीत, तस्य सिन्धौ अधि क्षियतः भाव्यस्य अमन्दान् स्तोमान् मनीषा प्र भरे॥

The seer of the mantra is Kakshīvan, son of Dīrghatamas; the metrical form is Trishṭup; and the deity is the prince Bhāvya or Svanaya, son of Bhāvayavya.

(Sāyaṇa)

सिन्धौ सिन्धुदेशे। यद्वा। लक्षणय सिन्धुतीरे। समुद्रतीरे। अधि क्षियतः अधिनिवसतः। भाव्यस्य भावयव्यस्य तत्पुत्रस्य स्वनयस्य इत्यर्थः। तस्य। अमन्दान् अनल्पान्। स्तोमान् स्तोत्राणि। तन्निष्ठवहुविधदानादीनां कीर्तनानि। मनीषा मनीषया प्रियातिशयबुद्ध्या। प्र भरे प्रकर्षेण सम्पादयामि।

कस्तस्य विशेषः? इति तत्राह। अतूर्तः केनाप्यहिंसितः। यो राजा। मे मदर्थम्। सहस्रं तत्सख्यकान्। सवान्। सूयन्ते सोमा एषु इति सवाः सोमयागाः। तान्। अमिमीत सम्पूर्णधनप्रदानेन निर्मितवान्। किमिच्छन्? श्रवः सर्वैः श्रूयमाणां कीर्तिम्। आत्मनः इच्छमानः कामयमानः। यतोऽयमर्त्विज्याद्युपाधिना विना कीर्त्यर्थमेव बहुधनं प्रादात्। अतस्तं स्मौमि इत्यर्थः॥

(Dinakara)

सिन्धौ सिन्धुदेशे लक्षणया समुद्रतीरे वा अधि क्षियतः वसतो भाव्यस्य भावयव्यस्य स्वनयस्य दानादीनाम् अमन्दान् अनल्पान् स्तोमान् स्तोत्राणि मनीषा मनीषया प्र भरे सम्पादयामि। [अतूर्तः केनापि अहिंसितः यः राजा मे मदर्थं सहस्रं तत्संख्याकान् सवान् सोनयागान् अमिमीत संपूर्णधनप्रदानेन निर्मितवान्। किमिच्छन्, श्रवः कीर्तिम् इच्छमानः। यागप्रसङ्गेन दक्षिणा प्राप्ता इति मदर्थमित्युक्तिः ॥८९॥

I create and convey (pra bhare) with a zealous mind (manīshā) a large number of hymnal praises (amandān stomān) of Bhavya (viz., Bhavayavya, Chhāndasa varṇalopa), who is a dweller on the banks of the sea (sindhau adhi kshiyatah). He is a prince (rājā), unconquered and unhurrying (atūrtah,

from 'turvī himsāyām'), who helped me (me) perform a thousand (viz. a large number) devotional acts (savān, from 'shuing - adhishave', "to pour forth", "to offer oblations"), intent only on good name (sravah ichchhamānah).

Note: The word 'atūrta' has been explained by Yāska (10,32) as signifying two ideas: (1) unconquered by anyone, invincible (atūrṇa), and (2) unhurrying, relaxed, easy and composed (atvaramāṇah). These are taken as characteristic traits of the king who is praised in the mantra.

(90)

ऋषिः काक्षीवान् दैर्घतमसः।
छन्दः त्रिष्टुप्।
देवता स्वनयः भावयव्यः॥

(संहितापाठः)

शतं राज्ञो नाधमानस्य निष्काञ् छतमश्वान् प्रयतान्त्सद्य आदम्।
शतं कक्षीवाँ असुरस्य गोनां दिवि श्रवोऽजरमा ततान ॥९०॥
(१.१२६.२)

(पदपाठः)

शतम्। राज्ञः। नाधमानस्य। निष्कान्। शतम्। अश्वान्। प्रऽयतान्। सद्यः।
आदम्॥ शतम्। कक्षीवान्। असुरस्य। गोनाम्। दिवि। श्रवः। अजरम्।
आ। ततान॥९०॥

(अन्वयः)

कक्षीवान् नादमानस्य असुरस्य राज्ञः शतं निष्कान् प्रयतान् शतं अश्वान् गोनां शतं सद्यः आदम्। दिवि अजरं श्रवः आ ततान॥

The seer of the mantra is Kakshīvan, son of Dīrghatamas; the metrical form is Trishṭup; and the deity is the prince Svanaya.

(Sāyaṇa)

नाधामानस्य स्वीकर्तव्यमिति उच्चैर्याचमानस्य। असुरस्य धनानां निरसितुः दानशीलस्य। राज्ञः स्वतेजसा दीप्यमानस्य स्वनयस्य। निष्कान् आभरणविशेषान्। इयत्ताविशेषविशिष्टानि वा सुवर्णानि। शत संख्याकानि। शतं सहस्रमित्यपरिमितवचनम्। अपरिमितान् सद्यः प्रार्थनानन्तरमेव। कक्षीवान् अहम्। आत्तवानस्मि। स्वीकृतवान् इत्यर्थः। तथा। प्रयतान् शुद्धान् लक्षणोपेतान्। अश्वान् अध्वगमनसमर्थान् हयान्। आदं आदत्तवान्।

तथा गोनां पुंगवानाम्। बलीवर्दान् इत्यर्थः। तेषां शतम्। आदम्। एवं प्रदाता राजा। दिवि द्युलोके। श्रवः कीर्तिम्। अजरं शाश्वतीं। आ ततान विस्तारितवान्। गवादिप्रतिग्रहीता अहं स्वर्गे कीर्तिमकरवं इत्यर्थः ॥

(Dinakara)

स्वकीर्तये धनं ग्राह्यमित्युच्चैः नाधमानस्य याचमानस्य असुरस्य असुरवदपरिमितदातुः राज्ञः स्वनयस्य निष्कान् आभरणविशेषान् पदकान् परिमाणविशेषविशिष्टानि वा सुवर्णानि शतम् अपरिमितान् सद्यः प्रार्थनानन्तरमेव कक्षीवान् आदम् आदत्तवान्। तथा प्रयतान् शुद्धान् सपल्याणान् [वा] अश्वान् आदम् आदत्तवान्। [तथा] गोनां बलीवर्दानां शतम् आदम्। उत्तरमन्त्रे स्त्रीगवीनां ग्रहणात्। एवं राजा दिवि स्वर्गे अजरं श्रवः शाश्वतकीर्तिम् आ ततान विस्तारितवान्। प्रतिग्रहीता अहं स्वर्गे कीर्तिमकरवमित्यर्थः ॥९० ॥

I, Kakshīvān, received (ādam) at once (sadyah) from the prince who is luminous (rājñah), who is mighty and generous in giving away what he has (asurasya from 'asu kshepaṇe'), pressed earnestly by him (nādhamānasya, from 'nādhryāñchāyām', *Nirukta* 4,3), countless (śatam) ornaments of gold (nishkān), countless steeds well-trained (aśvān prayatān from 'yama upaśame'), and countless bulls (gonām). He thereby spread (ā tatāna, from 'tanu vistāre') his undying celebrity (ajaram śravah) all over the luninous sky (divi)

Notes: 1. The historical (aitihāsika) interpretation refers to the king Svanaya, son of Bhāvayasya of the Sindhu country; he was renowned as a generous prince, who supported rituals and priests. But the esoteric (ādhyātma) explanation takes 'rājā' as the shining one (rājate), Sūrya, Indra or Varuṇa; 'aśva' (from 'aśū vyāptau') as all-pervading consciousness e.g. 6,28,5, will energy and vitality (prāṇa), 'go' as rays of light, understanding (e.g. 5,1,3; 5,3,2 etc.). Indra is the self from which awareness and understanding issue forth. The seer gratefully acknowledges this gift which is ever flowing and the source of which is the luminous region above.

2. The word 'nishka' refers to gold coins or ornaments. A Ṛgvedic passage speaks of a golden necklace in the neck (nishka-grīva) (5.19,3).

(91)

ऋषिः कक्षीवान् दैर्घतमसः।
छन्दः त्रिष्टुप्।
देवता स्वनयः भावयव्यः॥

(संहितापाठः)

**उप मा श्यावाः स्वनयेन दत्ता वधूमन्तो दश रथासो अस्थुः।
षष्टिः सहस्रमनु गव्यमागात् सनत् कक्षीवाँ अभिपित्वे
अह्नाम्॥९१॥ (१.१२६.३)**

(पदपाठः)

**उप। मा। श्यावाः। स्वनयेन। दत्ताः। वधूऽमन्तः। दश। रथासः। अस्थुः।
षष्टिः। सहस्रम्। अनु। गव्यम्। आ। अगात्। सनत्। कक्षीवान्।
अभिऽपित्वे। अन्हाम्॥९१॥**

(अन्वयः)

स्वनयेन दत्ताः श्यावाः वधूमन्तः रथासः मा उप अस्थुः। षष्टिः सहस्रं गव्यं अनु आ आगात्। कक्षीवान् अह्नां अभिपित्वे सनत्॥

The seer of the mantra is Kakshīvān, son of Dīrghatamas; the metrical form is Trishṭup; and the deity eulogized is the prince Svanaya, son of Bhāvayavya.

(Sāyaṇa)

स्वनयेन दत्ताः। श्यावाः तद्वर्णाश्वैः युक्तत्वात् श्यावा। वधूमन्तः आरूढाभिः वधूभिः तद्वन्तः। दश एतत्संख्याकाः। रथासो रथाः। उपस्थुः उपस्थिताः। गव्यशब्दो गोसमूहवाची।

षष्टिः सहस्रं अनु गव्यं षष्ट्यधिकसहस्रं गवां समूहः। अन्वागात् आगतः। तत आत्मानं परोक्षेण ब्रवीति। तत् सर्वं प्रतिगृह्य अयं कक्षीवान् अहम्। अह्नां दिवसानां मध्ये। अभिपित्वे सन्निहिते। अहनि। सनत् स्वीकृतम् रथवध्वादिकं स्वपित्रे समर्पयति स्वयं वा स्वीकरोति॥

(Dinakara)

स्वनयेन दत्ताः श्यावाः श्यामवर्णाश्वैर्युक्ताः वधूमन्तः आरूढवधूभिर्युक्ताः दशसंख्याकाः रथाः मा मां प्रति उप अस्थुः उपस्थिताः। गव्यं गोसमूहरूपं षष्टिः सहस्रं षष्ट्यधिकसहस्रम् अनु रथानां मम वा पश्चात् आ अगात्। एतत्सर्वं प्रतिगृह्य अयं कक्षीवान् अह्नाम् अभिपित्वे सन्निहिते अहनि स्वीकृतं रथवध्वादिकं स्वपित्रे सनत् समर्पयति। (षण दाने। लेटि, लेटोऽडाटौ (पा. ३.४.९४) इत्यटि जाते इतश्च लोपः (पा. ३.४.९७) इतीकारलोपे सनदिति सिद्धम्। "प्रपित्वे अभीके इत्यासन्नस्य" (नि० ३.२०) इति यास्कोक्तेः अभिपित्वे शब्दस्यापि सन्निहितवाचित्वम्। उपसर्गमात्रभेदात्) ॥९१॥

Close by me (upa asthuh) were the ten chariots (daśa rathāsah, standing for the ten directions), dark-hued (śyāvāh), and equipped with brides of the ten directions (vadhūmantah viz. ten rays of the sun, signifying all the directions), given to me by the prince Svanaya (svanayena dattāh) and a herd of a thousand and sixty cows (shashṭih sahasram gavyam) arrived after them (anu ā agāt). Among all the days (ahnām) this was the day eagerly awaited (abhipitve cf. *Niruktā,* 3,30 'āsanna-kāla-vāchī), I, *Kakshīvān,* received the gift and shared it with others (sanat, from 'shaṇa sambhaktau')

(92)

ऋषिः कक्षीवान् दैर्घतमसः।
छन्दः त्रिष्टुप्।
देवता स्वनयः भावयव्यः॥

(संहितापाठः)

चत्वारिंशद् दशरथस्य शोणाः सहस्रस्याग्रे श्रेणिं नयन्ति।
मदच्युतः कृशनावतो अत्यान् कक्षीवन्त उदमृक्षन्त पज्राः॥९२॥
(१.१२६.४)

(पदपाठः)

चत्वारिंशत्। दशऽरथस्य। शोणाः। सहस्रस्य। अग्रे। श्रोणिम्। नयन्ति॥
मदऽच्युतः। कृशनाऽवतः। अत्यान्। कक्षीवन्तः। उत्। अमृक्षन्त।
पज्राः॥९२॥

(अन्वयः)

दशरथस्य सहस्रस्य अग्रे शोणाः चत्वरिंशत् श्रेणीं नयन्ति। अथ कक्षीवन्तः प्रजाः मदच्युतः कृशनावतः अत्यान् उत् अमृक्षन्त॥

The seer of the mantra is Kakshīvān, son of Dīrghatamas; the metrical form is Trishṭup; and the deity Svanaya, son of Bhāvayavya.

(Sāyaṇa)

दशरथस्य दशसंख्याकरथवतः। सहस्रस्य सहस्रसंख्याकानुचरोपेतस्य। कक्षीवतो। गोयूथसहस्रस्य वा। अग्रे पुरस्तात्। शोणाः शोणाः शोणवर्णोपेताः। अश्वाः। चत्वारिंशत्। एकैकस्य रथस्य चतुष्टये सति दशरथानां मिलित्वा चत्वारिंशदश्वा भवन्ति। तेऽपि पंक्तिं श्रेणिमाश्रित्य। नयन्ति रथानभिमतदेशं प्रापयन्ति। यद्वा। अश्वनियुक्तान् रथान् श्रेणिं श्रेणीभावं नयन्ति प्रापयन्ति। एकैकं रथं चत्वारश्चत्वारः पंक्त्याकारेण वहन्तीत्यर्थः।

अथ। तान् काक्षीवन्तः। कक्ष्याश्व सम्बन्धिनी रज्जुः। कक्ष्या रज्जुरश्वस्येति यास्केनोक्तत्वात् (निरुक्त २.२)। ताभिः तद्वन्तः। यद्वा। अङ्गिरसपुत्राः सर्वेऽपि कक्षीवन्तः अथवा। कक्षीवदनुचराः। सर्वेऽपि च्छत्रिन्यायेन कक्षीवन्तः)। पज्रा घासाद्यन्नवन्तः। सन्तः। मदच्युतः मद स्राविणः। उद्वृत्तान् शत्रूणां मदस्य च्यावयितृन् वा। कृशनावतः सुवर्णमयनानाभरणयुक्तान्। कृशनमिति हिरण्यनाम। कृशनं लोहमिति तन्नामसु पाठात्। सुवर्णाभरणोपेतान्। अत्यान् सततगमनशीलान् अश्वान् उदमृक्षन्त अध्व श्रमजनितस्वेदापनयनाय उत्कृष्टं मार्जयन्ति॥

(Dinakara)

शोणाः लोहिताः चत्वारिंशत् अश्वाः दशरथस्य दशानां रथानां समूहो दशरथं तस्य श्रेणिं पङ्क्तिं सहस्रस्य पूर्वोक्तगोषष्टिसहस्रस्य अग्रे नयन्ति पुरस्तान्नयन्ति। दशानां रथानां मिलित्वा चत्वारिंशदश्वाः। अथ तान् कक्षीवन्तः कक्ष्या अश्वसम्बन्धिनी रज्जुः ("कक्ष्या रज्जुरश्वस्य" (नि.२.२) इति यास्कोक्तिः) तद्वन्तः, यद्वा अङ्गिरसः पुत्राः सर्वेऽपि कक्षीवन्तः, अथवा कक्षीवदनुचराः सर्वेऽपि छत्रिन्यायेन कक्षीवन्तः, पज्राः अन्नवन्तः सन्तः मदच्युतः मदस्राविणः उद्वृत्तान् शत्रूणां मदस्य च्यावयितृन् वा कृशनावतः सुवर्णनानाभारणयुक्तान् (कृशनमिति हिरण्यनाम "कृशनं लोहं कनकम्" (नि. १.२.७.) इति तन्नामसु पाठात्) अत्यान् सततगमनशीलान् अश्वान् उत् अमृक्षन्त अध्वश्रमजनितस्वेदापनयनाय उत्कृष्टं मार्जयन्ति॥९२॥

Forty bay-horses (chatvārimśad, representing the ten rays of the sun in each of the four directions), which are crimson-red in hue (śoṇāh, ef. also

10,20,9), belonging to the sun, who has chariots yoked in the ten directions (daśarathasya) lead (nayanti, from 'ṇīṅg prāpaṇe') the long lines (śreṇim) ahead of the complete day (sahasraya agre; sahasra signifying completion and 'agre' referring to dawn). The holders of the reins (Kakshīvantah, kakshi being the reins. cf. *Nirukta,* 2,2 'kakshyā rajjur aśvaya'), sprinkling happiness all over (mada-chyutah, from 'madī harshe') and projecting beautiful forms (kṛśanāvatah, cf. *Nirukta* 3,13 includes kṛśanā under rūpa-nāma) are the radiant flames of Agni on earth (pajrāh); and they intensify and purify the rays from above (atyān ut amṛkshanta from 'mṛjush śuddhau').

Note: The imagery is that of the sun (daśa-ratha) shining at dawn (cf. 6,49,11; 7,75,1-3 and 7,79,2-3); and the seers figure as the flames on earth. The expression 'Kakshīvan', the name of the seer of the hymn, is explained by Yāska (2,2) as 'the holder of the reins of the horse' (कक्ष्या रज्जुरश्वस्य तद्वन्तम्) and the horse is well-known as the symbol of the Sun. Further, he is intimately associated with Aṅgiras, a word derived from 'aṅg' which is the nasalized form of 'ag' which is the root of the word Agni. Thus Aṅgiras are the seers who shine forth as radiant lustres of Agni, as flames of fire. Kakshīvan, the seer here is significantly the offspring of Dīrgha-tamas, the long night, and a descendent of uśik (or uśij, meaning one who aspires to grow or increase, hence Auśija). Hence the imagery of dawn after night (cf. 7,10,5). The expression 'pajrā' refers to the sages belonging to the Aṅgirasa lineage; suggesting again the idea of flames of fire (cf. 4,3,15, 6,2,10, 'pajrāsah' in 1,117,10 यद्वां पज्रासो अश्विना ।; 'pajriya' in 1,120,5 वाचा यजति पज्रियो वाम् ।; 'pajre' in 1,122,7 पृक्षयामेषु पज्रे । 'pajra-hoshiṇau' in 6,59,4 जोषवाकं वदतः पज्रहोषिणा ।

(93)

ऋषिः कक्षीवान् दैर्घतमसः।
छन्दः त्रिष्टुप्।
देवता स्वनयः भावयव्यः॥

(संहितापाठः)

पूर्वामनु प्रयतिमा ददे वस्त्रीन् युक्ताँ अष्टावरिधायसो गाः।
सुबन्धवो ये विश्याइव व्रा अनस्वन्तः श्रव ऐषन्त पज्राः॥९३॥
(१.१२६.५)

(पदपाठः)

पूर्वाम्। अनु। प्रऽयतिम्। आ। ददे। वः। त्रीन्। युक्तान्। अष्टौ। अरिऽधायसः। गाः॥ सुऽबन्धवः। ये। विश्याःऽइव। व्राः। अनस्वन्तः। श्रवः। ऐषन्त। पज्राः॥९३॥

(अन्वयः)

(हे) सुबन्धवः, पूर्वां प्रयतिं अनुत्रीन् अष्टौ(च) युक्तान् अरिधायसः गाः(च) वः आ ददे। ये पज्राः। सुबन्धवः व्राः विश्याः इव अनस्वन्तः इव अनस्वन्तः श्रवः ऐषन्त॥

The seer of the mantra is Kakshīvān, son of Dīrghatamas; the metrical form is Trishṭup; and the deity mentioned is Svanaya.

(Sāyaṇa)

हे सुबन्धवः। पूर्वां प्रयतिं पूर्वप्रदानम्। अनु तमनुसृत्य। वक्ष्यमाणानि रथादीनि। वः युष्मदर्थम्। आददे स्वीकृतवान् अस्मि। कानि तानि? त्रीन् अष्टौ च। युक्तान्। रथान् इति शेषः। तथा। अरिधायसः अरिभिः ईश्वरैः धारणीया। बहुमूल्या असंख्याता गाश्च आददे। अत्र वक्ष्यमाणानि पूर्वं प्रतिगृहीतात् अधिकानीति युक्तम्।

इदानीं परोक्षेणाह। सुबन्धवः शोभना विद्यायोनि सम्बन्धिनो येषां ते तथोक्ताः। यद्वा। शोभनबान्धवोपेताः परस्परं अनुरागयुक्ता इत्यर्थः। विशः प्रजाः। तत्रभवा विश्वाः। व्रियन्त इति व्राताः॥

(Dinakara)

आनीतं धनं बन्धुभ्यो निवेदयन्नाह। हे सुबन्धवः पूर्वां प्रयतिं पूर्वप्राप्तां दक्षिणां वः युष्मदर्थम् आ ददे स्वीकृतवानस्मि। तथा युक्तान् अश्वैर्योजितान् धनैर्वा युक्तान् त्रीन् अष्टौ च रथान् तथा अरिधायसः अरिभिरीश्वरैर्धारणीयाः असंख्याता गाः च आ ददे। विश्या इव विशः प्रजाः तत्र भवा विश्याः व्राः व्रियन्त इति व्राः व्राता इत्यर्थः (तकारलोपश्छान्दसः) पज्राः अन्नवन्तो ये सन्ति ते अनस्वन्तः हविर्धानशकटोपलक्षितसोमयागवन्तः सन्तः श्रवः कीर्तिम् ऐषन्त इच्छन्ति। मदानीतधनेन यागान् कुर्वन्त्वित्यर्थः ॥९३॥

O dear ones who are Kinsmen to me (subandhavah), this gift given to us long ago (pūrvam) in accordance with long usage (anu prayatim) has been accepted by me (ā dade, viz., has been understood by me). It consists of (yuktān from 'yujir yoge') three (trīn, the three realms: earth, midregion and sky) and eight (eight directions, ashṭau) and most precious (aridhāyasah, from 'ṛi himsāyām', *Nirukta,* 5,7, lordly) sun's rays (gāh cha) filling them all.

O dear ones who are kinsmen to me (subandhavah). This gift given to us a long time back (pūrvām) in accordance with some universal order

(prayatim anu), has been accepted by me (ā dade, from 'ḍudāṅg dāne', viz. has been understood by me). It consists of (yaktān) three (trīn, the three realms) and eight (ashṭau, the directions). It is most precious and lordly (aridhāyasah). It is Sunlight (gāh cha). The people in groups (vrāh viśyah) serve as flames of the fire (pajrāh iva) mounted on the rays of the sun (anasvantah, from 'anah', cart) longing for renown (aishanta śravah, from 'ishu ichchhāyām).

Notes: 1. The expression 'aridhāyasah' (aribhih dhāraṇīyāh, tān) has been explained by Yāska thus (*Nirukta* 5,7).

(अरिः अमित्र ऋच्छतेः।) (from 'ṛi himsāyām') (ईश्वरोऽप्यरिरेतस्मादेव।) and cites 1,150,1 in support.

2. 'vrāh', from (व्रियन्ते इति व्राताः। छान्दसतकारलोपः)

3. 'parjāh', explained already.

(94)

ऋषिः कूर्मो गार्त्समदो गृत्समदो वा।
छन्दः त्रिष्टुप्।
देवता वरुणः ॥

(संहितापाठः)

पर ऋणा सावीरध मत्कृतानि माहं राजन्नन्यकृतेन भोजम्।
अव्युष्टा इन्नु भूयसीरुषास आ नो जीवान् वरुण तासु शाधि ॥९६॥
(२.२८.९)

(पदपाठः)

परा। ऋणा। सावीः। अध। मत्ऽकृतानि। मा। अहम्। राजन्।
अन्यऽकृतेन। भोजम्॥ अविऽउष्टाः। इत्। नु। भूयसीः। उषसः। आ।
नः। जीवान्। वरुण। तासु। शाधि॥

(अन्वयः)

वरुण, ऋणा परा सावीः। अध मत्कृतानि। राजन् अहं अन्यकृतेन मा भोजम्। भूयसीः उषसः अव्युष्टा इन्नु। तासु नः जीवान् आ शाधि॥९४॥

The seer of mantra is Kūrma, son of Gṛtsamada or Gṛtsamda himself; the metrical form is Trishṭup; and the deity invoked is Varuṇa.

(Sāyaṇa)

हे वरुण। ऋणा ऋणानि पित्रादिभिः कृतानि अस्माभिर्देयानि। परा सावीः परासुव। पराचीनं प्रेरय। षू प्रेरणे॥ अध अधुना। मत्कृतानि मया निष्पादितानि। ऋणानि। परा सुव। अपि च। हे राजन् स्वामिन्। वरुण। अहं अन्यकृतेन अन्यैरार्जितेन धनेन। मा भोजं भोगं मा लभेयम्।

किं कारणमिति चेदुच्यते। भूयसीः बहुतरा। उषसोऽव्युष्टा इन्नु। सत्यमव्युष्टा एव। अपररात्रेषूत्थाय ऋणानि चिन्तयतो जाग्रतो मम व्युष्टा अपि अव्युष्टकल्पा आसन्। हे वरुण, तासु उषःसु। नोऽस्मान्। जीवान् जीवनवत। आशाधि आ समन्तादनु शिष्टान् कुरु। ऋणानपकृत्य भोगपर्याप्तं धनं प्रयच्छेत्यर्थः॥

(Dinakara)

हे वरुण ऋणा ऋणानि पित्रादिभिः कृतानि परा सावीः परासुव (षू प्रेरणे छान्दसो लुङ्)। अध अधुना मत्कृतानि ऋणानि परासुव। अपि च हे राजन् अहम् अन्यकृतेन अन्योपार्जितेन धनेन मा भोजं मा भोगं लभेयम्। कारणमाह। नु सत्यं भूयसीः बह्वीः उषासः प्रातःकालाः ऋणचिन्तया अव्युष्टाः इत् व्युष्टा [अपि व्युष्ट-] भिन्ना एव आसन्। हे वरुण तासु उषस्सु नः अस्मान् जीवान् जीवनवतः आ आधि कुरु। ऋणान्यपाकृत्य भोगपर्याप्तं धनं प्रयच्छेत्यर्थः॥९४॥

O sovereign Varuṇa, take me beyond (parā sāvīh) the effects of transgression (ṛnā) committed thoughtlessly by me (matkṛtāni). Let me not enjoy (mā bhojam) the fruits of what others have done (anyakṛtena). Many are the dawns (bhūyasīh ushash) which have not yet broken to daylight (avyushṭā-innu). Help us, O Varuṇa, live well (nah jīvān), guiding us in all ways (ā śādhi).

NOTE

Sāyana takes ṛṇā in the sense of debt, and interprets the whole of the mantra in this light. But ṛṇā in the Vedic context means either transgression (intimately connected with Varuṇa's function) or obligation. In any case, it is negative in import. And there is a mantra (6, 12, 5), where the word 'ṛṇa' is employed in the sense of transgression: "like unto a thief (tāyu) who moves about as he should not" ऋणो न तायुः । Sāyaṇa rightly explains that 'ṛṇa' here means action, or movement (ऋणोतिर्गतिकर्मा). But it is movement that is negative (viz., is stealth). One must think, not only of the present, but of the long time he has yet to live. And he must live with honour and dignity, and with clear conscience.



(95)

ऋषिः कूर्मो गार्त्समदो गृत्समदो वा।
छन्दः त्रिष्टुप्।
देवता वरुणः॥

(संहितापाठः)

यो मे राजन् युज्यो वा सखा वा स्वप्ने भयं भीरवे मह्यमाह।
स्तेनो वा यो दिप्सति नो वृको वा त्वं तस्माद् वरुण पाह्यस्मान्॥९५॥
(२.२८.१०)

(पदपाठः)

यः। मे। राजन्। युज्यः। वा। सखा। वा। स्वप्ने। भयम्। भीरवे।
मह्यम्। आह॥ स्तेनः। वा। यः। दिप्सति। नः। वृकः। वा। त्वम्।
तस्मात्। वरुण। पाहि। अस्मान्॥

(अन्वयः)

राजन् वरुण, मे यः युज्यः वा सखा वा स्वप्ने भयं भीरवे मह्यं आह, यः स्तेनः वा वृकः न दिप्सति, तस्मात् त्वं अस्मात् पाहि।

The Seer of the mantra is Kūrma, son of Gṛtsamada, or Gṛtsamada himself; the poetic form of the mantra is Trishṭup; and the deity is Varuṇa.

(Sāyaṇa)

हे राजन् वरुण। मे मदीयः। युज्यः योजनसमर्थः। पित्रादिर्वा। सखा समानख्यानोऽन्यो बान्धवो वा। स्वप्ने दृष्टं त्वद्विषयम्। भयं। भीरवे भयशीलाय। मह्यम्। यः। आह ब्रूते। तथा स्तेनः चौरो वा। वृकोऽरण्यश्वा वा। यः। नः अस्मान्। दिप्सति जिघांसः॥ है वरुण, त्वं तस्मात्सर्वस्मादस्मान् पाहि।

(Dinakara)

हे राजन् वरुण मे युज्यः योजनसमर्थः पित्रादिः वा सखा वा अन्यो बान्धवो वा स्वप्ने दृष्टं भयं मह्यं भीरवे [यः] आह। [तथा] स्तेनः वा वृकः वा [यः नः] दिप्सति जिघांसति। तस्मात् अनिष्टात् त्वम् [अस्मान्] पाहि रक्ष॥१५॥

O sovereign Varuṇa, whatever that it is frightful (bhayam) has been communicated to us (mahyam āha) by my companion – friends (yujyah sakhā) or intimated to me in dreams (svapne), and whatever we fear from the harm (dispsati) that may come from the spirits of the dark like robbers or wolves (stenah, vṛko vā), protect us from all that (tasmād pāhi asmān).

NOTES

It is interesting to note that Yāska explains the expression स्तेन as स्तेनः कस्मात्? संस्त्यानमस्मिन् पापकमिति नैरुक्ताः॥ (3, 19), one that is compact with sinfulness, viz., the wicked one. The word is not given under the synonyms of 'stena' (thief, robber).

The word 'vṛka', which however has been included under the names of 'stena' in *Nirukta*, is derived from 'vṛśch', "to tear", and normally means an wolf or jackal. It also signifies an owl. That it means thunderbolt has been suggested in the *Nighaṇṭu* (2, 20). Yāska points out that it refers to the moon, especially when the light is concealed, distorted or far removed (5, 21).

वृकश्चन्द्रमा भवति। विवृतज्योतिष्को वा, विकृतज्योतिष्को वा, विक्रान्तज्योतिष्को वा॥

Both words are connected with the forces of darkness.



(96)

ऋषिः कूर्मो गार्त्समदो गृत्समदो वा।
छन्दः त्रिष्टुप्।
देवता वरुणः॥

(संहितापाठः)

माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः।
मा रायो राजन्त्सुयमादव स्थां बृहद् वदेम विदथे सुवीराः॥९६॥
(२.२८.११)

(पदपाठः)

मा। अहम्। मघोनः। वरुण। प्रियस्य। भूरिऽदाव्न। आ। विदम्। शूनम्। आपेः। मा। रायः। राजन्। सुऽयमात्। अव। स्थाम्। बृहत्। वदेम। विदथे। सुऽवीराः॥

(अन्वयः)

वरुण, मघोनः प्रियस्य भूरिदाव्नः अहं आपेः शूनं मा आविदम्। राजन्, सुयमात् रायः मा अव स्थाम्। (वयं) सुवीराः विदथे बृहत् वदेम॥

The seer of the mantra is Kūrma, son of Gṛtsamada, or Gṛtsamada himself; the poetic form is Trishṭup; and the deity invoked is Varuṇa.

(Sāyaṇa)

हे वरुण। मघोनो धनवतः। प्रियस्य अनुकूलस्य। भूरिदाव्नो भूरेः बहुलस्य दातुराढ्यस्य। अहं मा आविदं मा वेदयानि। आवेदनं मा करवाणि। किं तत् अनावेद्यम्? आपेः ज्ञातेः। शूनं शून्यं दारिद्र्यम्। वर्णलोपश्छान्दसः। यद्वा शूनं गतं प्राप्तं दारिद्र्यम्।

एतदुक्तं भवति। अस्मदीयाः पुत्रादयः क्षुधिता इति प्रभुसमीपेऽभिधाय याचमानो मा भूवमिति।

हे राजन्। सुयमात् सुष्ठु नियम्यते अनेन पुरुषो गृह इति सुयमः। तादृशाद्रायो धनान्मावस्थाम्। अवयुत्य स्थितो मा भूवम्। वयं सुवीराः शोभनपुत्राः। विदथे यज्ञे गृहे वर्तमानाः सन्तः। बृहत् प्रौढम्। स्तोत्रं। वदेम उच्चारयाम॥

(Dinakara)

हे वरुण मघोनः धनवतः प्रियस्य अनुकूलस्य भूरिदाव्नः भूरेः बहुधनस्य दाव्नः दातुः अहम् (मा) आ विदं [न] आवेदयानि। किमिति न आवेद्यम्? आपेः शूनं शून्यं दारिद्र्यम्। मदीयाः पुत्रादयः क्षुधिता इति मा याचामीत्यर्थः। हे राजन् सुयमात् सुष्ठु यम्यते गृहमिति सुयमं धनं तस्मात् रायः धनात् मा अव स्थां वियुज्य स्थितो मा भूवम्। सुवीराः शोभनपुत्राः [वयं विदथे] यज्ञे वर्त्तमानाः सन्तः बृहत् प्रौढं स्तोत्रं वदेम उच्चारयाम॥९६॥

इति दिनकरकृतौ ऋगर्थसारे द्वितीयाष्टकान्तर्गतानाम् ऋचां व्याख्या॥

O Varuṇa, may it not happen that I come to know (aham mā ā vidam) that my dear friend (priyasya āpeh), who is rich in the wealth of knowledge (maghonah), and generous in imparting it (bhūridāvnah), is reduced to naught (śūnam). May it not happen, O master, that the wealth of knowledge (rāyah), acquired with disciplined effort (suyamāt) become hidden and out of reach

(mā ava sthām). May it be given to us, equipped with courage and strength (suvīrāh), to talk (vadema) about this great truth (bṛhat) in the congregations meant for instruction (vidathe).

NOTES

The word 'āpeh' is from 'āpi' meaning friend, ally, companion.

'Śūna' (from śū) strictly means "the swollen state"; it emphasizes the hollowness within. It is emptiness or state of want (śūnya).

'Suvīra', signifies heroic, manly; consisting of valorous offsprings.

'Vidatha' (from 'vid jñāne') is knowledge which is imparted to others. It is employed in the Vedic passages in the sense of congregation, council, or assembly of wise people who are ready to instruct others (e.g. 2, 27, 8; 6, 51, 2 and 8, 39, 1).

(97)

ऋषिः विश्वामित्रः।
छन्दः त्रिष्टुप्।
देवता अग्निः॥

(संहितापाठः)

शतधारमुत्समक्षीयमाणं विपश्चितं पितरं वक्त्वानाम्।
मेळिं मदन्तं पित्रोरुपस्थे तं रोदसी पिपृतं सत्यवाचम्॥९७॥
(३.२६.९)

(पदपाठः)

शतऽधारम्। उत्सम्। अक्षीयमाणम्। विपःऽचितम्। पितरम्। वक्त्वानाम्॥
मेळिम्। मदन्तम्। पित्रोः। उपऽस्थे। तम्। रोदसी इति। पिपृतम्।
सत्यऽवाचम्॥

(अन्वयः)

रोदसी, शतधारं अक्षीयमाणं उत्सं विपश्चितं पितरं वक्त्वानां मेळिं, पित्रोः उपस्थे मदन्तं सत्यवाचं त्वं पिपृतम्॥

The seer of mantra is the renowned sage Viśvāmitra; the poetic form is Trishṭup and the deity invoked is Agni.

(Sāyaṇa)

(यस्मादुपादायाद्विश्वामित्रो वैश्वानराख्यं परं ब्रह्माज्ञासीत्तमिमं उपाध्यायमनयर्चा स्तौति।)

हे रोदसी द्यावापृथिव्यौ। शतधारं अपरिमितजलधारायुक्तं। अक्षीयमाणं न कदापि विच्छिन्नप्रवाहम्। उत्सं उत्समिव शतप्रवाहोपेतं स्रोत इवाविच्छिन्नवाक्सरणी समेतम्। विपश्चितं मेधाविनम्। सकलशास्त्राभिज्ञम्। पितरं शिष्याणां विद्योपदेशेन पालकम्। वक्त्वानां वक्तव्यानां वेदवाक्यानाम्॥

मेळिं मेलकम्। नानाशाखागतानां वाक्यानां एकस्मिन्नर्थे संकलय्य वक्तारम्। पित्रोः द्यावापृथिव्योः। उपस्थे समीपे। मदन्तं ज्ञानातिशयेन हृश्यन्तम्। अत एव। सत्यवाचं अज्ञातार्थाभावात् परप्रतारणे च कारणाभावात् सत्यवादिनम्। तमिमं उपाध्यायं। पिपृतं अपेक्षितफलप्रदानेन सम्पूर्णं कुरुतम्। यद्वा। पालयन्तम्॥

(Dinakara)

हे रोदसी शतधारम् अपरिमितधारायुक्तम् अक्षीयमाणं न कदपि विच्छिन्नप्रवाहम् उत्सम् उत्समिव शतप्रवाहोपेतं स्रोत इव अविच्छिन्नवाक्सरणीसमेतं विपश्चितं मेधाविनं सकलशास्त्राभिज्ञं पितरं शिष्याणां विद्योपदेशेन पालकं वक्त्वानां वक्तव्यानां नानाशाखागतानां वेदवाक्यानां तदर्थानां वा मेळिं मेलकं पित्रोः द्यावापृथिव्योः उपस्थे समीपे मदन्तं ज्ञानातिशयेन हृष्यन्तम्। पृथिव्यां स्वर्गे वा नैतादृशोऽस्तीत्यर्थः। सत्यवाचं अज्ञातार्थाभावात्परप्रतारणे च कारणाभावात् [सत्यवादिनं] तम् उपाध्यायं पिपृतं फलदानेन सम्पूर्णं कुरुतम् (पृ पालनपूरणयोः) ॥९७॥

The twin realms, heaven and earth (rodasī), are implored to fulfil the mission (piprtam) of Agni (tam), who functions in countless streams (śatadhāram), who is the inexhaustible fount (akshīyamāṇam utsam) of benefits, who is all-knowing (vipaśchitam), who is the protector of all the

instructors of mankind (vaktvānām pitaram), who integrates individuals in groups (meḷim), who abides happily close to the two realms (pitroh upasthe madantam, heaven and earth) and who articulates reality (satyavācham).

NOTES

This mantra is extracted from the twenty-sixth hymn (sūkta) of the third book (maṇḍala); it is the ninth and the last mantra in the hymn. The seer of the hymn is Viśvāmitra, who is also the chief seer of the entire maṇḍala.

Sāyaṇa explains that the mantra is in the nature of Viśvāmitra's praise for his teacher, who imparted to him the gnosis of the supreme reality, known as Vaiśvānarāgni.

यस्मादुपाध्यायाद्विश्वामित्रो वैश्वानराख्यं परं ब्रह्माज्ञासीत्तमिमुपाध्यायमनयर्चा स्तौति ॥

He does not, however, mention who this teacher was, or what the occasion for the instruction was. The mantra, or for that matter, the sūkta, does not contain anything to justify this explanation. Further, the explanation is far-fetched and unwarranted. The deity invoked in the mantra is obviously the heaven-and-earth (rodasī or dyāvā-pṛthivī). The mantra is expressly addressed to them. And the rest of the mantras in the sūkta have forms of Agni (like Vaiśvānara and the maruts) as devatā. It is strange that Sāyaṇa mentions 'the teacher of Viśvāmitra' (viśvāmitropādhyāyah) as the devatā of

the mantra. Kātyāyana's *Ṛksarvānukramaṇī* (kaṇḍikā 17, 20) no doubt refers to the mantra as "praise of the teacher" (नवम्या उपाध्यायस्तुतिः ।), but does not give the teacher as the devatā. *Bṛhaddevatā* (4, 97) likewise speaks of the mantra as eulogy of the teacher (शतधारं गुरुस्तवः ।), without naming that teacher as the devatā.

Interesting in this context are the two preceding mantras, especially the first of these (3, 26, 7), where the seer is given in the *Sarvānukramaṇī* as the supreme spirit (brahmā) himself (kaṇḍikā 17, 20):

सप्तमीवर्जस्य सूक्तस्य विश्वामित्र ऋषिः । सप्तम्या ब्रह्मवाक्यत्वात् यस्य वाक्यं इति न्यायेन ब्रह्मर्षिः ॥

And even Sāyaṇa concedes that this mantra as well as the next one discloses Viśvāmitra's own experience as identical with the all-pervasive supreme spirit, (viz., brahman) here Agni as Vaiśvānara:

साक्षात्कृतपरतत्त्वरूपोऽग्निर्द्व्यर्चेन स्वात्मनः सर्वात्मकत्वानुभवमाविष्करोति ॥

Further in his commentary, while referring to 'havis', he says:

अनेनाग्नेः सर्वात्मकत्वप्रतिपादनेन परब्रह्मत्वमुक्तं भवति ॥

The realization that made Viśvāmitra 'brhamarshi' was derived from the supreme spirit, called here Agni. And in this sense, Agni Vaiśvānara may be

described as his teacher (guru), and as the devatā of the mantra. That the expressions Viśvāmitra and Vaiśvānara are cognate lends further support to this surmise.

For detailed explanation of the two mantras mentioned above, please see Appendix One.

(98)

ऋषिः विश्वामित्रः।
छन्दः गायत्री।
देवता सविता॥

(संहितापाठः)

तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि।
धियो यो नः प्रचोदयात्॥९८॥ (३.६२.१०)

(पदपाठः)

तत्। सवितुः। वरेण्यम्। भर्गः। देवस्य। धीमहि।
धियः। यः। नः। प्रऽचोदयात्॥

(अन्वयः)

यः नः धियः प्रचोदयात् तत् देवस्य सवितुः वरेण्यं भर्गः धीमहि॥

The seer of this mantra is Viśvāmitra; the poetic form is Gāyatri and the deity invoked is Savitṛ.

(Sāyaṇa)

यः सविता देवः। नः अस्माकम्। धियः कर्माणि धर्मादिविषया वा बुद्धीः। प्रचोदयात् प्रेरयेत्। तत् तस्य। देवस्य सवितुः सर्वान्तर्यामितया प्रेरकस्य जगत्स्रष्टुः परमेश्वरस्य। वरेण्यं सर्वैरुपास्यतया

ज्ञेयतया च संभजनीयम्। भर्गः अविद्यातत्कार्ययोः भर्जनाद्भर्गः। स्वयंज्योतिः) परब्रह्मात्मकं तेजः। धीमहि वयं ध्यायामः॥ धारयामः। तस्याधारभूता भवेम इत्यर्थः॥ यद्वा यद्भर्गो धियः प्रचोदयात् तद्ध्यायेम इति समन्वयः॥ यद्वा। यः सविता सूर्यो धियः कर्माणि प्रेरयति। तस्य प्रसवितुर्देवस्य। द्योतमानस्य सूर्यस्यतत्सर्वैर्दृश्यमानतया प्रसिद्धं वरेण्यं सर्वैः संभजनीयं। भर्गः पापानां तापकं तेजो मण्डलम्। धीमहि ध्येयतया मनसा धारयेम॥

(Dinakara)

यः सविता देवः नः अस्माकं धियः कर्माणि धर्मादिविषया बुद्धीः [वा] प्रचोदयात् प्रेरयेत् तस्य देवस्य सवितुः सर्वान्तर्यामितया प्रेरकस्य जगत्स्रष्टुः परमेश्वरस्य वरेण्यं सर्वैरुपास्यतया ज्ञाततया च संभजनीयं भर्गः अविद्यातत्कार्ययोर्भर्जनाद्भर्गः स्वयंज्योतिः तत् तेजः परब्रह्मात्मकं धीमहि वयं ध्यायामः। यद्वा तदिति भर्गोविशेषणम्। सवितुः देवस्य तत् तादृशं भर्गः धीमहि। किं तदित्यपेक्षायाम् आह। यः इति लिङ्गव्यत्ययः। यद् भर्गः धियः प्रचोदयात् तत् ध्यायेमेति। यद्वा [यः] सविता सूर्यो धियः कर्माणि प्रचोदयात् प्रेरयति तस्य सवितुः सर्वस्य प्रसवितुः देवस्य द्योतमानस्य सूर्यस्य तत् सर्वैर्दृश्यमानतया प्रसिद्धं वरेण्यं सर्वैः संभजनीयं भर्गः पापानां तापकं तेजोमण्डलं धीमहि धारयामः तस्याधारभूता भवेमेत्यर्थः।

भर्गःशब्दस्यान्नपरत्वं चाथर्वणे ''वेदांश्छन्दांसि सवितुर्वरेण्यं भर्गो देवस्य कवयोऽन्नमाहुः।

कर्माणि धियस्तदु ते प्रब्रवीमि प्रचोदयन्तसविता याभिरेति'' (गो. ब्रा.१.३२)। (भर्गः भ्रस्ज पाके असुन्।)

भ्रस्जो रोपधयोः (पा० ६.४.४७) इति रोपधयोर्लोपो रमागमः न्यङ्क्वादिपाठात् कुत्वम्।

धीमहि ध्यायतेर्लिङि, बहुलं छन्दसि (पा० ६.१.३४) इति सम्प्रसारणम्। व्यत्ययेनात्मनेपदम्। यद्वा धीङ् आधारे लिङि, बहुलं छन्दसि (पां २.४.७३) इति विकरणस्य लुक्।

प्रचोदयात् चोदयतेर्लेट्यडागमः। यद्वृत्तयोगादनिघातः। वरेण्यमित्यत्र वरेणियमिति पाठाच्चतुर्विंशत्यक्षरमिति केचित्, इयदिपूरण इति पिङ्गलोक्तेः) ॥९८॥

We contemplate (dhīmahi) on the most excellent brilliance or light (vareṇyam bhargah) of the all-generating and divine principle (savituh devasya), which inspires (prachodayāt) our brooding minds (nah dhiyah).

NOTES

This celebrated mantra, known as Gāyatri (because of the chhandas) or Sāvitrī (as its deity is Savitṛ) occurs in *Ṛgveda* (3, 62, 10), Śukla *Yajurveda* (Vājasaneyi- samhitā, 3, 35; 22, 9; 30 , 2; 36, 3), *Kṛshṇa-yajurveda* (Taittīrīya-samhitā, 1, 5, 6, 4; 4, 1, 11, 1) and *Sāmaveda* (1462). It is repeated in *Taittīrīya āraṇyaka* (1, 11, 2). Among the poetic forms, Gāyatri has the pride of place. The collections of hymns, *Ṛgveda, Sāmaveda* and *Atharva-veda* begin with mantras in this chhandas. It is said to be the chhandas that Agni is fond of, even as Indra is fond of, Trishṭup and Viśvedevas of Jagatī.

The devetā of this mantra, Savītṛ, is a form of Sūrya, the sun. The solar orb is known as 'bharga', and is prescribed to be the object of contemplation. It is worthy of worship (vareṇyam). The devatā is the inner guiding spirit of all beings (sarva-antaryāmin), the creator of the universe, and the light for all phenomenal activities. This devatā is identical with Āditya (ṚV 1,50,10), Agni, and also Varuṇa (RV, 10, 85, 24; 4, 54, 3; 4, 53, 6 and 7, 89, 5) Bhaṭṭa-Bhāskara, the commentator on *Taittirīya-samhitā,* writes (1, 5, 6, 6).

यो देवः सविता विश्वस्य प्रसवितात्मकं धर्मादिगोचरा धियः प्रेरयति तस्य स्वभूतं वरेण्यं सर्वैर्भजनीयं भर्गः पापानां तापनं तेजोमण्डलात्मकं धीमही मनसा धारयामः। एवं बोधप्रकाशाभ्यां समस्तस्य प्रपञ्चस्योपकुर्वाणं श्रेयोऽर्थिभिः भजनीयं सूर्यात्मना स्थितं पारमेश्वरं तेजः उपास्यत्वेनोपदिश्यते ॥

And Mahīdhara, who commented on *Śukla-yajus-samhitā,* writes:

सवितुः प्रेरकस्यान्तर्यामिणो विज्ञानानन्दस्वभावस्य। हिरण्यगर्भोपाध्यवच्छिन्नस्य वा। आदित्यान्तपुरुषस्य वा ब्रह्मणः। भर्गः पापानां भर्जनसमर्थं तेजः। सत्यज्ञानान्दादिवेदान्तप्रतिपाद्यम्। वयं ध्यायामः ॥

(For details see the author's volume on Gāyatri in the Ṛgveda-darśana series, Volume three, Kalpatharu Research Academy, Bangalore - 19)

Appendix One

VIŚVĀMITRA AND VAIŚVĀNARA

Viśvamitra is the principal spokesman (ṛshi-drashṭā) of the third *Maṇḍala* of *Ṛgveda,* having more than five hundred mantras to his credit. The other mantras in this maṇḍala are from descendents of this sage, all called Kuśika (belonging to the lineage of Kuśa), like Ṛshabha, Utkila, Kata, Devaśrvas, Prajāpati and Vāchya. Viśvāmitra was the son of Gāthi, a ruler, whose father was Kuśanābha (son of Kuśa, who was the offspring of Brahmā the creator himself). The family of Viśvāmitra is also known as 'Gāthinah'. This Gāthin, the father of Viśvāmitra, is mentioned in *Sarvānukramaṇi* as Kuśika-putra. Viśvāmitra calls himself the son of Kuśika (3, 33, 5).

The name Viśvāmitra means 'friend of all' ('viśvam mitram asy eti.', viśvam mitram eshām te, *Nirukta,* 2,25, also 'viśvāmitrah, sarva-mitrah'). The irregularity of construction of the word (suggesting the quite opposite meaning, 'enemy of all') is explained by the grammatical aphorism (Pāṇini 6, 3, 130): मित्रे चर्षौ । If the word 'mitra' comes after any word indicating ṛshi, the former word ends with elongation.

He is referred to as an important personage is *Aitareya-āraṇyaka* (2, 2, 1), *Aitareya-brāhmaṇa* (6, 18, 1 and 6, 20, 3), *Taittirīya-samhitā* (2, 2, 1, 1, 2; 3, 1, 7, 3; and 5, 2, 3, 4); *Kāṭhaka-samhitā* (16, 19 and 20, 9), *Maitrāyaṇīya-samhitā* (2, 7, 19); *Kauśītaki-brāhmaṇa* (15, 1; 26, 14; 28, 1-

2; 29, 3), *Pañchavimśa-brāhmaṇa* (14, 3, 12 where Viśvāmitra is described as a ruler) and *Jaiminīya-upanishad-brāhmaṇa* 3, 3, 13 and 3, 15, 1).

In the third maṇḍala, the distribution of mantras (or ṛks) visualized by the sage Viśvāmitra is as follows:

Sūktas 1-12	=	140 mantras
Sūktas 24-32	=	117 mantras
Sūktas 33	=	9 mantras
Sūktas 34-35	=	22 mantras
Sūkta 36	=	10 mantras
Sūktas 37-53	=	144 mantras
Sūktas 57-62	=	56 mantras

In the ninth maṇḍala, the sūkta 67 has 3 mantras, ascribed to him. Thus there is a total of 501 mantras of Viśvamitra.

In this maṇḍala, there is also frequent reference to the descendants of Viśvāmitra (called Viśvāmitras or Kuśikas) as responsible for numerous mantras. The members of the Viśvāmitra family are named in RV 3, 1, 21; 3, 18, 4; 3, 53, 13 and also in 10, 89, 17.

विश्वामित्रा अरासत ब्रह्मेन्द्राय वज्रिणे
करदिन्नः सुराधसः ॥ (३,५३,१३)
जन्मन् जन्मन् निहितो जातवेदा
विश्वामित्रेभिरिध्यते अजस्रः ॥

(Agni Jatavedas is enkindled again and again by the descendants of Viśvāmitra) (3, 1, 21)

महर्षिर्देवजा देवदूतोऽस्तभ्नात्
सिन्धुमर्णवं नृचक्षाः।
विश्वामित्रो यदवहत् सुदासमाप्रियायत
कुशिकेभिरिन्द्रः॥ (३,५३,९)

(There is a reference here to the descendants of Viśvāmitra called here Kuśikas, who along with Viśvāmitra brought delight to Indra.)

(The expression 'nṛchakshā' in this mantra is interesting. It is usually referred to Agni, as the witness of all that mortals do (nārāṇām drashṭā), as the perceiver of the good and evil that is engendered by mortals (nṛṇām manushyāṇām śubhāśubha karmanām drashṭā) :

कविर्नृचक्षा अभिषीम चष्ट ऋतस्य योना विघृते मदन्ती॥ (3,54,6)

नृचक्षा रक्षः परिपश्य विक्षु
तस्य त्रीणि प्रति शृणी ह्यग्रा॥(10,87,10)

य इमे रोदसी उभे अहमिन्द्रमतुष्टवम्।
विश्वामित्रस्य रक्षति ब्रह्मेदं भारतं जनम्। (3,53,12)

(The mantra is addressed to the decedants of Viśvāmitra; the sage tells them that his mantra will protect the people of the Bharata clan; and that the eulogy in the mantra is for the Indra as well as the heaven-and-earth, dyāvāpṛthivī)

कुविन्मा गोपां करसे जनस्य कुविद्राजानम्
मघवन् ऋजीषन्।
कुविन्म ऋषिं पपिवांसं सुवस्य कुविन्मे
वस्वो अमृतस्य शिक्षाः॥ (3,43,5)

(The sage here seeks to be the protector of the people, gopā, the ruler, rājā, and the seer, ṛshī, by the grace of Indra).

The sage Viśvāmitra is described in *Nirukta* (2, 24) as the royal priest of the ruler Sudāsa, son of Devavanta (who in turn was the son of Pijavana, hence Sudāsa is called 'paijavana') ('viśvāmitra-ṛshih sudāsah-paijavanasya purohitah') विश्वामित्रऋषिः सुदासः पैजवनस्य पुरोहितः बभूव। विश्वामित्रः सर्वमित्रः। सर्वं संस्कृतम्। सुदाः कल्याणदानः। पैजवनः पिजवनस्य पुत्रः॥ The sage Vasishitha also was associated with the same ruler (*Aitareya-brāhmaṇa* 7, 34 एतमु हैव प्रोवाच वसिष्ठः सुदासे पैजवनाय।). It is related in the third maṇḍala that Viśvāmitra, after a ritual session with the ruler Sudāsa, went back to his heritage, crossing the confluence of two streams Vipāṭ and Śutudru (3, 33; 3, 53, 9-11 etc.). He helped the people of the Bharata clan also to cross over.

Divodāsa, also belonged to the Bharata clan, even as Viśvāmitra was (6,16,19). In the words of Yāska :

स वित्तं गृहीत्वा बिपाट्छुतुद्र्योः संभेदमाययै। अनुययुरितरे।
स विश्वामित्रो नदीस्तुष्टाव। गाधा भवत इति॥

We are also told that the Bharata clan had originally few members, and they were so weak that they were frequently attacked by enemies. It was when Vasishṭha became their clan priest that they became strong and their numbers also increased (7, 33, 6):

दण्डा इवेद्गो अजनास आसन्
        परिच्छिन्ना भरता अर्भकासः।
अभवच्च पुर एता वसिष्ठ आदित्
        तृत्सूनां विशो अप्रथन्त॥

(Note : Tṛtsu was another name for the Bharata clan
तृत्सूनामेव राज्ञां भरता इति नामान्तरेणोपादानम्।)

There was no doubt an intimate relationship between Vasishṭha and Viśvāmitra, although the stories concerning their rivalry and enmity were by and large false, and lack support from the Ṛgvedīc passages.

The epic *Mahābhārata* (Anuśāsana-parva, Dāna-dharma-parva, chapter 4) mentions that Viśvāmitra himself belonged to the Bharata clan. His lineage is given as follows :

1 Ajamīḍha (ruler)
2. Jahnu (of whom Gaṅgā was a daughter)
3. Sindhudvīpa (sage)
4. Balākāśva (rājarshi, ruler and sage)
5. Vallabha (exceedingly pious ruler, साक्षाद्धर्म इवापरः)
6. Kuśika
7. Gādhi (whose brilliance was like that of Indra, सहस्राक्षसमद्युति :)
8. Viśvāmitra (sage)

We have the names of Viśvāmitra's descendents also (all of them sages, muni), headed by Viśvāmitra's son Madhuchchandā, the celebrated seer of more than a hundred mantras (śatarchina) in Ṛgveda-samhitā :

1. Madhuchchandā
2. Devarāta
3. Akshīṇa
4. Śakunta
5. Babhru
6. Kālapatha
7. Yājñavalkya
8. Sthūṇa
9. Ulūka
10. Yamadūta
11. Saīndhavāyana
12. Valgu-jaṅghā
13. Gālava
14. Vajra
15. Sālaṅkāyana
16. Līlāḍhya
17. Nārada
18. Kūrchāmukha
19. Vāduli
20. Musala
21. Vakshogrīva
22. Āṅghrika
23. Naikadṛk
24. Chakraka
25. Mārutantavya
26. Vātaghna
27. Aśvalāyana
28. Śyāmāyana
29. Gārgya
30. Jābāli
31. Suśruta (celebrated physician and surgeon)
32. Kārīshi
33. Saṁśrutya
34. Para-paurava-tantavah (three of them)
35. Kapila (mahān ṛshih)
36. Jāḍagāyana (also a ṛshi)
37. Upagahana
38. Asurāyaṇa

39. Mārdama
40. Hiraṇyāksha
41. Jaṅghāri
42. Bābhravāyani
43. Bhūti
44. Vibhūti
45. Sūta
46. Surakṛt
47. Arāli
48. Nāchika
49. Chāmpeya
50. Ūjjayana
51. Navatantu
52. Bukanakha
53. Seyana (a yati)
54. Aṁbhoruha
55. Chāru-matsya
56. Hiraṇi
57. Gārdabhi
58. Ūrja-yoni
59. Udāpekshi
60. Nāradi (mahān ṛshih)

They are described as themselves progenitors of their own lineages, great sages and knowers of the supreme reality. ब्रह्मविदो गोत्रकर्तारः। सर्वे मुनयो ब्रह्मवादिनः ॥

Viśvāmitra and his family were greatly devoted to Agni, especially in the Vaiśvānara form, and to Indra. In the particular hymn from the third maṇḍala, Agni is eulogized. And the two mystic mantras that are given and explained here (3, 26, 7 and 58) belong to the 'adhyātmikya' variety, where the sage feels one with the supreme reality and narrates his ecstatic experience in the first person (cf. Yāska-Nirukta, 7, 2).

अथाध्यात्मिक्य उत्तमपुरुषयोगा। अहमिति चैतेन सर्वनाम्ना।
यथैतदिन्द्रो वैकुण्ठो लबसूक्तं (10,119) वागांभ्रणीयमिति (10,48)॥

Agni is extolled as supreme reality here, and Viśvāmitra becomes aware of Agni as his own being by raising himself to that level or diving into his deepest core.

अथात ऊर्ध्वगतिं व्याख्यास्यामः। महान्तमात्मानमेषगर्णः प्रवदन्ति।
आत्मजिज्ञासया आत्मानं प्रोवाच अगिनरस्मि जन्मन। जातवेदा इति।।

Therefore, the seer (ṛshi) and the deity (devatā) are in reality one: आत्मा ऋषिः। (अग्निः आत्मा वा देवता)

The *Anukramaṇi* mentions that this hymn of nine verses has as its devatā the form of Agni known as Vaiśvānara.

वैश्वानरं नव तृचौ वैश्वानरीयमारुतौ जागतौ द्वृच आत्मस्तुतिर्वा।

The first group of three mantras (tṛcha, 1-3) has Vaiśvānara as the devatā, while the second group (4-6) has Maruts as the devatā. The pair of two mantras (dvṛcha, 7-8) have Agni, Brahman or Ātman (Self) as the devatā. The seventh mantra is not formally ascribed to the sage Visvāmitra for he has here transcended his normal mortal self and has become one with the supreme reality. His self (which is the Self of all beings) is the devatā; hence the mantra is 'ātma-stuti'.

The hymn begins with the word Vaiśvānara, which is another name for Agni, who is to be realized in ones own interior, for he is in tune with reality.

This Agni is to be contemplated in ones own mind, and the mind itself is to be offered as an oblation. That is to say, the mind as a separate faculty must cease to exist; it must become one with Agni, the devatā towards whom it is directed; and in this state, the highest realm is reached.

वैश्वानरं मनसाग्निं मनसा निचाय्य हविष्मन्तं अनुषत्यं स्वर्विदम् ॥

(३,२६,१)

This Vaiśvānara, with whom the mortal devotee's mind has become compact, flashes forth in the mid-region where the form of Vāyu is assumed (mātariśvā, mātari anatarikshe śvasiti). The midregion of this verse

वैश्वानरं मातरिश्वानमुक्थ्यम् ।

(३,२६,२)

is the 'mind' (manas) of the previous verse. It is the heart which is the midregion of the mortal being. And it is here that the Maruts (the vigorous winds of aspiration and resolve) are active. They are all-knowing, altogether irresistible, and centered upon Agni, whose irradiations they are:

प्र यन्तु तविषीभिः ।

(३,२६,४)

अग्निश्रियो मरुतो विश्वकृष्टयः ॥

(३,२६,५)

अग्नेः भामं मरुतां ओजः ॥

(३,२६,६)

The Maruts, the loyal companions of Agni, are leaders in their own right (3, 16, 12 'imam naro marutah'); but they are distinguished by their vigour and power to pound and crush (from 'mṛi'), and their swiftness (*Nirukta,* 11, 14 'mahad dravantīti vā'). They are gods in general; all the known gods are 'martus', but their impact is limited as is their brilliance, compared with Agni's (hence *Nirukta,* op.cit., 'maruto mita-rāviṇo vā mita-rochano vā').

Nirukta discusses who this Vaiśvānara-agni is. The expression Vaiśvānara is in itself interesting. Sāyaṇa has this to say :

विश्वानर एव वैश्वानरः। स्वार्थे तद्धितप्रत्ययः। राक्षसवायसादिवत्।

The word 'viśvā-nara' becomes 'Vaiśvānara' (from a grammatical rule 'nare samjñāyām', the former word ends with an elongation), in the sense of belonging to Viśvānara (viśvānarasya idam)

तस्येदं (Pāṇini 4, 3, 120) अण् प्रत्ययः
तद्धितेष्वचामादेः (Pāṇini 7, 2, 117) आदिवृद्धिः
यस्येति च प्रत्ययपूर्व अकारस्य लोपः॥

Vaiśvānara in this sense is the offspring of Viśvānara (vīśvānarasya apatyam vaiśvānarah'). This needs some explanation.

Agni has three forms : (1) Agni on earth (pārthivāgni); (2) Agni in the midregion (vaidyutāgni); and (3) Agni in the sky (Āditya or Sūrya). There is a discussion about which of these is the Vaīśvānarāgni. Among the earlier

masters, Sākapūṇi, finds mention in Yāska's *Nirukta,* as holding the view that it is the first one (pārthivāgni) in fact that is Vaiśvānara, the offspring of the sun :

अयमेवाग्निर्वैश्वानर इति शाकपूणिः। विश्वा नरावेते
उत्तरे ज्योतिषी वैश्वानरोऽयं यत्ताभ्यां जायते। कथमेताभ्यां

जायत इति। यत्र वैद्युतः शरणमभिहन्ति यावदनुपात्तो भवति मध्यमधर्मैव तावद्भवत्युदकेन्धनः शरीरोपशमन उपादीयमान एवायं सम्पद्यत उदकोपशमनः शरीरदीप्तिः ॥

It may in this context be recalled that Agni has been interpreted by Yāska (*Nirukta,* 7, 15) as the leader or forerunner of all, and as invoked first in all sacrifies. He mentions the views of Śākapūṇi and Sthaulāshṭhīvi.

अग्निः कस्मात्? अग्रणीर्भवति। अग्रं यज्ञेषु प्रणीयते। अङ्गं नयति सन्नममानः। अवक्नोपने भवतीति स्थौलाष्ठीविः। न क्नोपयति न स्नेहयति। त्रिभ्यः आख्यातेभ्यः जायत इति शाकपूणिः। इति दग्धाद्वा नीतात्। स खल्वेतेराकारमादत्ते गकारमनक्तेर्वा दहतेर्वा नीः परः ॥

(The passage from Yāska has already been explained. See Notes to the first mantra in this compilation.)

Śākapūṇi holds that Pārthivāgni (the fire on earth) is different from Vaidyutāgni (the fire in the midregion). The former is the fire-principle present in all beings, and hence called 'Vaiśvānara'. It is the most important

detail on the earth, and most significant for biological existence. It represents the sun (Āditya) in all his functions and manifestations. We read in *Ṛgveda* (10, 88, 6).

स मूर्धा भुवो भवति नक्तिमग्निस्ततः सूर्यो
जायते प्रातरुद्यन्।
मायामू तु यज्ञियानामेतामपो
यत्तूर्णिश्चरति प्रजानन्॥

There is also a Brāhmaṇa passage with reference to kapāla-vidhi in sacrifice, which states that Vaiśvānarāgni is in effect the sun

भवत्यसौ वा आदित्योऽग्निर्वैश्वानरः॥

The Chhāndomika-sūkta as well as the Havishpāntīya-sūkta have Saurya-Vaiśvānara as the devatā. It is the sun that is described in Rg. 10, 88, 112 as Vaiśvānara:

विश्वस्मा अग्निं भुवनाय देवा
वैश्वानरं केतुमह्नामकृण्वन्॥
(आदित्य एव ह्युदयास्तमयाभ्यां अहानि करोति। तेन वयं एतैर्हेतुभिः सूर्यो वैश्वानर इति पश्याम॥)

Yāska refers to the rising sun, Vaiśvānara, as the dispeller of darkness:

अहश्च कृष्णं अहरर्जुनं च विवर्तेते रजसी वेद्याभिः।
वैश्वानरो जायमानो न राजा वा तिरज्ज्योतिषाग्निस्तमांसि॥
(वैश्वानरो जायमान इव उद्यन्नादित्यः सर्वेषां ज्योतिषां राजा वाहन्नग्निर्ज्योतिषा तमांसि॥)

Durgāchārya explains:

यथा हि उद्यन् आदित्यस्तमांसि अपहन्ति दिवा एवं अग्निरपि रात्रावपहन्ति ।।

Even as the sun drives away darkness during daytime, Agni drives away darkness in night, viz., lights up)

Yāska (7,23) also quotes another mantra from *Ṛgveda* (1,98,1) to illustrate the identification of Vaiśvānara with the sun.

वैश्वानरस्य सुमतौ स्याम राजा हि
कं भुवनानामधिश्रीः ।
इतो जातो विश्वमिदं वि चष्टे
वैश्वानरो यतते सूर्येण ।।

(इतो जातः सर्वमिदमभिविपश्यति वैश्वानरः संयतते सूर्येण राजा यः सर्वेषां भूतानामभिश्रयणीयः तस्य वयं वैश्वानरस्य कल्याण्यां मतौ स्याम ।। Nirukta, 7,23)

The Vaiśvānara-fire is the most adorable light, energy and inspriration for all human beings; it represents the sun for them we can see here the underlying thought current of the celebrated Gāyatri mantra of Viśvāmitra, which is also included in the third maṇḍala. Savitr, the devatā of this mantra, is indeed the Vaiśvānara form of Sūrya. Durgāchārya explains Yāska's statement

विश्व एनं नरा नयन्तीति वा। अपि वा विश्वानर एव स्यात् प्रत्यृतः सर्वाणि भूतानि तस्य वैश्वानरः ।।

(विश्वान् नरान् इतो लोकात् अमुं लोकं सर्वासु प्रवृत्तिषु नयति। अथवा सति तस्मिन् सर्वाः प्रवृत्तयः फलवत्यो नराणां भवन्तीति सर्वासु प्रवृत्तिषु अयमेव नरान् प्रवर्तयति ।।)

Vaiśvānara leads all mortals from here to hereafter, from the earth to the region of the sun. He being present, all the activities of the mortals become effective, for he indeed it is that inspires all activities. This is what is implicit in the expression 'prachodayāt' in the Gāyatri mantra.

(cf, विश्वे नरा एनं नयन्ति। स नीयमानः तासु तासु क्रियासु अङ्गभावं नरैः कर्म सम्पद्यते ॥

विश्वानि ह्यसै। भूतानि प्रतिष्टः विश्वानरः। तस्य अपत्यं वैश्वानरः॥ (प्रविष्टः जाठराग्निरूपेण)

Appendix Two

(1)

(अष्टक ३ अध्याय १ वर्ग २६-२७; मण्डल ३ अनुवाक २ सूक्त २६ मन्त्र ७)

ऋषिः विश्वामित्रः। आत्मा वा।
छन्दः त्रिष्टुप्।
देवता अग्निः॥

(संहितापाठः)

अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन्।
अर्कस्त्रिधातू रजसो विमानोऽजस्रो घर्मो हविरस्मि नाम॥७॥

(पदपाठः)

अग्निः। अस्मि। जन्मना। जातऽवेदाः। घृतम्। मे। चक्षुः। अमृतम्। मे। आसन्॥ अर्कः। त्रिऽधातुः। रजसः। विऽमानः। अजस्रः। घर्मः। हविः। अस्मि। नाम॥

(अन्वयः)

अग्निः जन्मना जातवेदाः अस्मि। घृतं मे चक्षुः। अमृतं मे आसन्। त्रिधातुः अर्कः। रजसः विमानः। अजस्रः। धर्मः। हविः। अस्मि। नाम॥

अग्निः अस्मि	Agni am I
जन्मना जातवेदाः	all- knowing from my very birth (by nature)

घृतम्	light; clarity; clarified butter
मे चक्षुः	is my very eye; vision
अमृतम्	immortality; undying
मे आसन्	is in my mouth; in my own person
त्रिधातुः अर्कः (अस्मि)	the solar principle made firm three-fold (I am)
रजसः	of the world, of the midregion
विमानः (अस्मि)	the measurer; foundation; shaper (I am)
अजस्रः	the enduring; undying; unintermittent
घर्मः (अस्मि)	heat and light, the sun (I am) (in the sky)
हविः अस्मि नाम	I am indeed the fire on earth; oblation.

(Sāyaṇa)

(साक्षात्कृतपरतत्त्वरूपोऽग्निः द्व्यर्चेन स्वात्मनः सर्वात्मिकत्वानुभवं आविष्करोति।)

हे कुशिकाः। भोक्तृभोग्यभावेन द्विविधं हीदं सर्वं जगत्। एतावद्वा इदमन्नं, चैवान्नादश्च। सोम एव अन्नं अग्निरन्नादः। इति श्रुतेः। तत्र सकलभोक्तृवर्गरूपेण अन्नादोऽग्निः। स च अग्निवाय्वादित्यभेदेन त्रेधा भूत्वा पृथिव्यन्तरिक्षद्युलोकानधितिष्ठति। तदुक्तं वाजसनेयके – स त्रेधात्मानं व्यभजत। आदित्यं तृतीयं वायुं तृतीयमिति॥

तत्र सोऽग्निरहं जन्मनैव जातवेदा अस्मि। श्रवणमननादिसाधननिरपेक्षेण स्वभावतः एव साक्षात्कृतपरतत्त्वस्वरूपोऽस्मि। घृतं मे चक्षुः। यदेतद्विश्वस्य विभासकं मम स्वभावभूतप्रकाशात्मकं चक्षुः तद् घृतम्। इदानीमत्यन्तं दीप्तम्। यदेतमृतं कर्मफलं दिव्यादिव्य विविधविषयोपभोगात्मकं तन्मे ममासन्। आस्ये वर्तते। सकलभोक्तृवर्गात्मना स्वयमेव अवस्थानात्।

एवं स्वात्मनः पृथिव्याधिष्ठातृरूपतां अभिधाय वाय्वात्मना अन्तरिक्षाधिष्ठातृतामाह। अर्को जगत्स्रष्टा प्राणः।... स प्राणोऽहं। त्रिधातुः त्रेधात्मानं विभज्य। तत्र वाय्वात्मना। रजसः अन्तरिक्षस्य। विमानो विमाता अधिष्ठाता। अस्मि।

तथा आदित्यरूपेण द्युलोकाधिष्ठातृतामाह। अजस्रो घर्म इति। अजस्रः अनुपक्षीणः। घर्मः प्रकाशात्मा। द्युलोकाधिष्ठाता आदित्यः अहमस्मि। एवं भोक्तृरूपमात्मनोऽनुसन्धाय भोग्यरूपतामपि अनुसन्धत्ते। यद्धविर्भोग्यं प्रसिद्धमस्ति तदप्यहमेवास्मि।

यद्वा। अहमग्निरस्मि। देवानां हविष्प्रापणादङ्गनादिगुणयुक्तोऽस्मि।

किञ्च। जन्मना उत्पत्त्या। जातवेदाः जातप्रज्ञः। अस्मि। उत्पत्तिक्षण एव सर्वज्ञः अहमस्मि। अथवा। जातं सर्वं स्वात्मरूपतया वेत्तीति जातवेदाः। सर्वात्मक इत्यर्थः। तत् कथं इत्युच्यते। घृतं मे चक्षुः। यदेतद् घृतं प्रसिद्धमस्ति तन्मे चक्षुःस्थानीयम्। यथा लोके चक्षुः भासकमेवं घृतं मयि प्रक्षिप्तं ज्वालामुत्पादयन् मम भासकम्।

अमृतं प्रभारूपम्। यदमृतं अविनाशि ज्योतिः। मे मम। आसन् आस्ये। वर्तते। त्रिधातुः प्राणापानव्यानात्मना त्रिधा वर्तमानः। अर्कः अर्चनीयः। यः प्राणोऽस्ति सोऽप्यहमेव। अस्मि। तथा च। रजसः अन्तरिक्षस्य। विमानः विशेषेण माता परिच्छेत्ता। वायुश्च अहमस्मि।

किञ्च। अजस्रो घर्मः। नैरन्तर्येण सन्तापकारी सूर्यश्च अहमस्मि।

किं बहुना? आज्यपुरोडाशादिरूपं यदेतद् हविरस्ति तदुपलक्षितं सर्वमप्यहमस्मि। 'सर्वं खल्विदं ब्रह्म' इति श्रुतेः। नामशब्दः प्रसिद्धौ। तदनेन अग्नेः सर्वात्मकत्वप्रतिपादनेन परब्रह्मत्वमुक्तं भवति॥

The sage Viśvāmitra is speaking here in a state of mystic trance. He is one with Agni-Vaiśvānara who is the devatā of the hymn. It is not a state that is acquired or accidental. It is his very nature (janmanā). And he is all-knowing (jata-vedāh) in this state. The sage harrates that his vision is all too clear and perfect (ghṛtam chakshuh). And the principle of immortality (amṛtam) is right there, in his own person (āsan, āsye). The light that is the adorable solar energy (arkah) manifests itself in three forms (tri-dhātū). It shapes the mid-region (rajaso vimānah) and becomes its foundation. It is the

uninterrupted light and heat that is the sun (ajasro dharmah), manifest in the sky. And it is the well-known fire on earth to which oblations are offered (havih nāma).

NOTES

1. Jātavedāh is explained by Yāska as one that is aware of everything that has come into existence (jātāni veda); one of whom all the living beings are aware (jātāni vainam viduh); one that is present in all things as they come into existence (jāte jāte vidyata iti vā); one for whom all wealth (viz., knowledge) originates (jātavitto, jātadhanah); one who comes to know or experience directly (jātavidyo vā jātaprajñānah) (*Nirukta,* 7, 20). The sage has this omniscience most naturally and spontaneously (janmanā), independent of any effort and without growth or unfoldment (sādhana-nirapekshena, svabhāvatah). The realization is both direct and immediate.

For Jātavedāh, see RV 2, 4, 1; 6,4,2 and 6,12, 4. The expression means more specifically the fire that is hidden in the faggots but comes out when rubbed, cf 3, 29, 2 (अरण्योर्निहितः जातवेदाः) 1, 3, 29, 3 (जातो अग्नी रोचते प्रकाशम्।) Agni is present in all things that have appeared (viz., born), and becomes manifest when contemplated (mathanānantaram).

2. घृतं मे चक्षुः ।। Ghṛtam, commonly meaning clarified butter offered to the fire during sacrifice, means etymologically light and clarity (cf. RV, 2,3,11; 2,5,6; 5,5,1; 8,39,3; 8,102,21; 10,12,3; 10,51,8 and 10,69,2). The

word ‘chakshuh’ is derived from ‘chakshing’, meaning “to perceive”, “to see”, or alternately from ‘khyāteh’, meaning “to manifest”, “to reveal” (ख्यातेर्वा चष्टेर्वा *Nighaṇṭu-Nirukta,* 4,3). The sentence ‘ghṛtam me chakshuh’ would therefore signify clarity of vision, the mind which flows like a clear stream revealing the bottom. All that exists is made manifest with precision and comprehension, and the sage recognizes all as his own very self.

3. अमृतं म आसन्॥ Amṛta is the principle of eternity, immortality, undyingness (*Nirukta,* 2,20 ‘maraṇadharma-rahitam’). It is the light that is never extinguished (prabhārūpam avināśi-jyotih’). (cf *Pāṇini-sūtra,* 6,2,116). The sage envisions the light that is at once undying and all-revealing. And this light is the very nature of Agni, with whom the sage identifies himself. Agni is this principle of immortality (amṛtam) which is in his own person (āsan, āsye). It is immediately available to him.

4. The word ‘dhātu’ in the Vedic context is establishment, making firm (from ‘dhā’ “to ordain”, “to establish”), and refers to the three realms of existence: earth, midregion and heaven (representing agni, vāyu and āditya), or prāṇa (ascending breath), apāna (descending breath) and vyāna (the breath that spreads all over). This three-fold establishment is related to the sun, the light (sūrya, āditya)

(‘Arka’ is from ‘archa pūjāyām’; कृदाधारार्चिकअभ्यः कः *Uṇādi-sūtra* 3,320)

5. रजसो विमानः॥ ‘vimānam’ is “measure” (cf. 3,3,4), ‘vimānah’ is “measurer”, and the expression ‘vi-mitām’ (4,7,6) is employed in the sense of “shaping”; ‘rajasah’ is “of the world” (as in 10,187,5, यो अस्य पारे रजसः

शुक्रो अग्निरजायत।) or "of the midregion" (as in 4,1,11 महो बुध्ने रजसो अस्य योनौ।). Agni is the one who shapes or establishes the world or the midregion. Sāyaṇa takes the world 'vimānah' as meaning foundation-provider (adhishṭhātā).

The import is clear. Agni (on earth) is the one who functions as Vāyu in the midregion, and as Āditya in the upper realm:

त्रेधात्मनं विभज्य वाय्वात्मना रजसः अन्तीरक्षस्य विमानः अधिष्ठाता अस्मि।
तथा आदित्यरूपेण द्युलोकाधिष्ठातृत्वम्॥
स्वात्मनः पृथिव्यधिष्ठितरूपता, वाय्वात्मनाऽन्तरिक्षाधिष्ठातृता॥

Vāyu is also described as 'prāṇa' (the vital principle) (*Śatapatha-brāhmaṇa,* 10,6,5). 'Arka' as light may indeed refer to Vāyu, who represents midregion. The word 'rajasah' indeed mean may more specifically the midregion, as *Nirukta* (4,19) suggests:

रजो रजतेः। ज्योती रज उच्यते। (अन्तरिक्षलोकः)

This seems plausible because the Sun in the upper realm is referred to subsequently.

6. 'ajasra' (from 'jasu mokshaṇe', "to release", "to let go"; or 'jasa upakshaye', "to wane", "to get scattered"; ajasra has the negative sense) is continuous (satata), uninterrupted (nairantaryeṇa), same at all times. This refers to 'gharma', the sun who makes everthing warm and heated up (santāpakārī). Yāska lists the world among the names of daylight (ahar-nāma,

Nirukta, 3,19), or in other words the sun, who shines in the heavenly region (dyuloka).

7. हविरस्मि नाम॥ 'Havis' means oblation, offering; and the expression 'nāma' signifies "well-known', "indeed" (prasiddhau). The term points to the fire on earth (Agni), to whom oblations are offered. This is in keeping with the mention of Vāyu in the midregion (arka) and sun (gharma) in the heavely realm. The three realms are referred to as 'tridhātu'.

(2)

(३,२६,८)

(संहितापाठः)

त्रिभिः पवित्रैरपुपोद्ध्य१र्कं हृदा मतिं ज्योतिरनु प्रजानन्।
वर्षिष्ठं रत्नमकृत स्वधाभिरादिद्द्यावापृथिवी पर्यपश्यत्॥८॥

(पदपाठः)

त्रिऽभिः। पवित्रैः। अपुपोत्। हि। अर्कम्। हृदा। मतिम्। ज्योतिः। अनु।
प्रऽजानन्॥ वर्षिष्ठम्। रत्नम्। अकृत। स्वधाभिः। आत्। इत्।
द्यावापृथिवी इति। परि। अपश्यत्॥

(अन्वयः)

(अग्निः) हृदा मतिं ज्योतिः अनुप्रजानन् पवित्रैः त्रिभिः अर्कं अपुपोद् हि। वर्षिष्ठं स्वधाभिः रत्नं अकृत। आदित् द्यावापृथिवी पर्यपश्यत्॥

त्रिभिः	by means of the three factors (Agni, Vāyu, Āditya)
पवित्रैः	which are purifying (sanctifying)
अपुपोद् हि	verify (he) purified (sanctified) himself
अर्कम्	his own worship-worthy nature, which is light; the sun
हृदा	in his own heart
मतिम्	contemplation-worthy; sublime thoughts or aspirations
ज्योतिः	light

अनुप्रजानन्	having carefully understood
वर्षिष्ठं	the most excellent (self)
रत्नं	exquisite jewel (treasure)
अकुरुत	made (for himself)
स्वधाभिः	through the manifest forms that bear themselves (Agni, Vāyu, Āditya)
आदित्	immediately (instantaneously)
द्यावापृथिवी	(also) heaven and earth
पर्यपश्यत्	beheld as expressions of himself.

Agni thoroughly comprehended (anu prajānan) the excellent light (jyotih), which is worthy of contemplation (matim) in ones own heart (hṛdā), and indeed sanctified (apupod hi) his own excellent nature (arkam), through the three sanctifying forms (fire, air and sun) (tribhih pavitraih) that he assumed. He also rendered (akuruta) his own magnificent self (varshishṭam) most pleasing (ratnam), by projecting the forms that support and nourish to worlds (svadhābhih, viz, fire, air and sun); and instantaneously (ādit) he beheld (paryapaśyat) the heaven and earth (dhyāvā-pṛthivī) as but his own self-expressions.

(Sāyaṇa)

सर्वात्मकोऽग्निः। हृदा अन्तःकरणवृत्त्या। मतिं मननीयम्। ज्योतिः स्वप्रकाशरूपं परब्रह्माख्यं तेजः। अनु प्रजानन् श्रवणमननादिक्रमेण, प्रकर्षेण संशयविपर्यासभावनाबुद्धिनिरासेन स्वात्मरूपतया

जानानः सन्। पवित्रैः पावनैः। अग्निवायुसूर्यैः। अर्कं अर्चनीयं स्वात्मानम्। अपुपोत् हि। तेभ्योऽपि निर्मलतया पावनं परिचिच्छेद खलु। यथा दशापवित्रेण सोमं पावयति तद्वत्॥

एवं जानानोऽग्निः। वर्षिष्ठं स्वात्मानं उत्तमम्। स्वधाभिः, स्वेन लोकान् दधातीति स्वधा, तैः। अग्निवायुसूर्यैः। रत्नं रमणीयम्। अकुरुत अकार्षीत्। आदित् अनन्तरं एवं आत्मनि ज्ञाते सति। द्यावापृथिवी तत्र परिकाल्पिते। द्यावापृथिव्यौ तदुपलक्षितं सर्वं जगत् च। पर्यपश्यत् परितः सर्वतः स्वात्मतया अदर्शयत्। 'आत्मनि विज्ञाते सर्वं इदं विज्ञातं भवती' ति श्रुतेः॥

1. त्रिभिः पवित्रैः अपुपोद्धि॥ The three purifying factors are the three dhātus mentioned in the previous mantra: They are what make the world firm; agni on earth, vāyu in the midregion and āditya in the sky. The three sanctify all existence; and with these three forms Agni sanctified himself. These three are later called 'svadhās' (स्वधाभिः)

2. अर्कं हृदा मतिं ज्योतिः अनुप्रजानन्॥ Arka, also figuring in the previous mantra, refers to the adorable light, the Sun. It is self-luminous (jyotih), It must be realized in ones own heart (hṛdā), by arousing sublime aspirations (matim) (anuprajānan). The knowledge that thus arises is of the form of light itself, clear and complete.

The word 'arka' is included in the names of, deva, mantra, anna and vṛksha (*Nirukta*, 5,4) and vajra (3,11). *Śatapatha-brāhmaṇa* (10,6,5).

3. वर्षिष्ठं रत्नं अकुरुत स्वधाभिः॥ This Self-nature (Agni, Ātman) is the most excellent and desirable gain (varshishṭam ratnam) for the mortal man. And this realization of the self (as Agni) is made possible by the forms that nourish

the worlds and that are self-supporting (sva-dhā), viz. Agni, Vāyu and Āditya. These forms are collectively called 'arka'. This excellent jewel is what results, from the knowledge (pra-jānan), spoken of earlier.

Sva-dhā is included in the names of water (*Nirukta*, 2,24); food (3,9) and the heaven and earth (3,22 dyāvā-pṛthivī).

4. आदित् द्यावापृथिवी पर्यपश्यत्॥ When this knowledge dawns, there is immediately and spontaneously (ādit) the direct and comprehensive vision to be had (pari apaśyat) that the heaven and earth are but projections of his own Self. The word 'svadhā' used earlier is cognate with 'dyāvā-prithivī' (cf. *Nirukta,* 'dyāvāprithivī svadhe', 3,22), and means the supporters of all the world by their own power (स्वेन लोकान् दधातीति स्वधा।), they being Agni, Vāyu and Āditya.

[द्यौश्च पृथिवी च द्यावापृथिव्यौ। Pāṇini 6,3,29 दिवो द्यावा। dyāvādeśa for 'div'; and Pāṇini 6, 2, 141 देवताद्वन्द्वे च। सुपां सुलुक्॥]